ISSN– 2320– 5911

# प्रज्ञालोकः

(रामकृष्णमिशन्-विवेकानन्दशैक्षिकशोधसंस्थानस्य
संस्कृताध्ययनदर्शनविभागस्य शोधपत्रिका)

## षष्ठः अङ्कः

उपदेष्टा

स्वामी आत्मप्रियानन्दः

सम्पादकमण्डली

राकेशदाशः
गोपीकृष्णन् रघुः
वेङ्कटरमणभट्टः
नागराजभट्टः
नीरजकुमारभार्गवः

संस्कृताध्ययनदर्शनविभागः
रामकृष्णमिशन्-विवेकानन्दशैक्षिकशोधसंस्थानम्
वेलुडमठम्

प्रज्ञालोकः
(संस्कृताध्ययनदर्शनविभागस्य वार्षिकी द्विभाषामयी विशेषज्ञसमीक्षिता शोधपत्रिका)
*Prajñāloka*
(Annual Bi-lingual **Peer-reviewd Research Journal** of the Department of Sanskrit Studies & Philosophy)

ISSN– 2320–5911

सम्पादकमण्डली–
राकेशदाशः
गोपीकृष्णन् रघुः
वेङ्कटरमणभट्टः
नागराजभट्टः
नीरजकुमारभार्गवः
Board of Editors–
Rakesh Das
Gopikrishnan Reghu
Venkataramana Bhat
Nagaraja Bhat
Neeraj Kumar Bhargave

प्रकाशकः– कुलसचिवः
रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य
वेलुडमठस्थस्य, हावडामण्डले, पश्चिमवङ्गेषु
Publisher– Registrar
Ramakrishna Mission Vivekananda Educational and Research Institute
Deemed to be University
Belur Math, Howrah, West Bengal

©प्रकाशकस्य
©Publisher

प्रकाशनवर्षम्– २०१८
Year of Publishing– 2018

मूल्यम्– ₹ ७०/–
Price– ₹ 70/-

Powered by LaTeX 2ε

# सूचीपत्रम्


| क्रमः | निबन्धः निबन्धकारश्च | पुटम् |
|---|---|---|
| १. | निवेदनम् | i |
| २. | Foreword<br>Swami Atmapriyananda | iii |
| ३. | आचारप्रभवो धर्मः<br>सुनीता एम् के | 1 |
| ४. | साम्बपुराणदिशा सूर्यमूर्तिलक्षणम्: निर्माणकलासु स्वातन्त्र्यं विचित्र्यं च<br>अभिषेकघोषः | 7 |
| ५. | ब्रह्मानन्दीयोक्तप्रथममिथ्यात्वपरिष्कारा:<br>पि.आर्.वासुदेवन् | 15 |
| ६. | अद्वैतिनाम् अनात्मोपादानविवादे शुद्धशाङ्करनयः<br>स्वामी वेदार्थानन्दः | 19 |
| ७. | अद्वैतविशिष्टाद्वैतनययोः सादृश्यवैसादृश्यात्मकमध्ययनम्<br>त्रिदिवरायमण्डलः | 32 |
| ८. | क्रममुक्तौ आवृत्त्यनावृत्तिविचारः<br>कार्तिकमेटे | 40 |
| ९. | शब्दस्य ब्रह्मत्वनिर्णयः<br>शैवाल-आचार्यः | 48 |
| १०. | धातूनामनुबन्धविचारः<br>जयदेवदिण्डा | 54 |
| ११. | हरिनामामृतव्याकरणे द्वयसंज्ञाविमर्शः<br>नित्यानन्दमान्ना | 65 |

१२. जयकृष्णानुसारं लकाराणां शक्तिविमर्शः 71
विष्णुपदपालः

१३. अतो रोरप्लुतादप्लुते इति सूत्रस्य विमर्शः 85
सौमित्र-आचार्यः

१४. प्रसिद्धपाणिनीतरव्याकरणानां प्रत्याहारसूत्रविमर्शः 95
सुजितमाइतिः

१५. वैयाकरणालङ्कारिकाभिमतं ध्वनितत्त्वम् 102
कृष्णगोपालपात्रः

१६. गजानन-बालकृष्ण-पळसुलेवर्यस्य भासोऽहासः-समीक्षणम् 109
शुभ्रजित्सेनः

१७. रसगङ्गाधरीयमङ्गलपद्यविमर्शः 124
सुजितदासः

१८. रघुवंशमहाकाव्ये इन्द्रादिदेवकृतविष्णुस्तुतौ अद्वैतचिन्तनम् 137
सुजितपरामानिकः

१९. अलङ्कारसर्जनवैचित्र्ये न्यायवैशेषिकसम्मतस्य कार्यकारणभावस्य उपयोगः 150
सोनालीमुखोपाध्याया

२०. षट्सु संस्कृतरूपकेषु आत्मत्यागस्य विमर्शनम् 156
पालोपाह्वा शम्पा

२१. विश्वसभ्यतायां स्वामिनो विवेकानन्दस्य योगदानम् 165
तन्मयकुमारभट्टाचार्यः

२२. बालसाहित्यशब्दकोषः 170
राकेशदाशः

२३. मनूपदिष्टायाः शिक्षाव्यवस्थायाः साम्प्रतिक-प्रासङ्गिकत्वविमर्शः 178
स्वपनमाझिः

२४. वर्तमानसन्दर्भे सम्पादनात्मकशोधप्रविधिविमर्शः 186
सच्चिदानन्दस्नेही

२५. त्रिपुराराज्यस्य राजशासनकाले शिलालेखेषु संस्कृतभाषायाः व्यवहारः 198
शिप्राराय़ः

२६. मानवजीवनस्य गुणवत्ताज्ञापने कठोपनिषत् 202
दीपिकादासः

२७. Reappraisal of Medical Ethics in Indian Socity: Spotlight on *Caraka-saṁhitā* 207
Debanjan Maity

२८. Vision Of Royal Policy As Reflected In *Śiśupālavadham* Of *Māgha* And Its influence in the Modern Indian Constitution 217
Anupama Ryali

# निवेदनम्

षड्भ्यः समाभ्यः प्रकाश्यमानायाः प्रज्ञालोकाख्याया विबुधमुदातानिकायाः पत्रिकाया इयं षष्ठी सञ्चिका। अत्र चतुर्विंशतिः सुरगिरा निबद्धाः प्रबन्धाः द्वौ च आङ्ग्लेयप्रबन्धौ स्थानम् अलभन्त। लेखानां चयने विशेषज्ञानां मतम् एव अङ्गीकृतम्। प्राबन्धिकानां परिचयम् अज्ञातवन्तः समीक्षकाः प्रबन्धानां समीक्षाम् अकुर्वन्। तेषां समीक्षकाणां कृते कार्तज्ञ्यं प्रकटयामः।

पत्रिकायाः प्रकाशनार्थं नियतम् अस्मान् प्रोत्साहितवद्भ्यः सम्माननीयकुलपतिभ्यः, पत्रिकायाः प्रकाशकेभ्यः विश्वविद्यालयस्य माननीयकुलसचिवेभ्यः, पत्रिकायाः टङ्कनकार्ये अक्षरपरिष्कारादिकार्ये च साह्यम् आचरितवद्भ्यः अस्माकं विभागस्य शोधच्छात्रेभ्यः, संस्कृताध्ययनविभागस्य समायोजकेभ्यः स्वामिजपसिद्धानन्देभ्यः, मुद्रकेभ्यः, सर्वेभ्यः प्राबन्धिकेभ्यः च वयं सविनयं धन्यवादं वितरामः अस्मिन् प्रसङ्गे।

भगवतः अनुकम्पया पत्रिकायाः प्रकाशनस्रोतः अविच्छिन्नं भवत्विति सम्प्रार्थ्य विरमामः।

सम्पादकाः

**RAMAKRISHNA MISSION VIVEKANANDA EDUCATIONAL AND RESEARCH INSTITUTE**

(Formerly known and Ramakrishna Mission Vivekananda University)

(Declared by Government of India under Section 3 of UGC Act, 1956)

PO Belur Math, Dist Howrah 711202, West Bengal, India

# Foreword

ॐ वाङ्मे मनसि प्रतिष्ठिता। मनो मे वाचि प्रतिष्ठितम्। आविराविर्म एधि। वेदस्य म आणीस्थः श्रुतं मे मा प्रहासिनीरनेनाधीतनाहोरात्रान् सन्दधाम्यृतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु मामवतु वक्तारम्।

ॐ शान्तिः शान्तिः शान्तिः ॥

Om. May my speech be established in the mind, and in turn let my mind be established in speech. O Self-effulgent Brahman (the Supreme Being)! Reach me through and through! May my speech and mind be capable of revealing to me the inner meaning of the Vedic mantras. Let my learning never leave me [but be a constant source of inspiration and guidance]. May I be attuned day and night to the spirit of the Holy Scriptures that I have learnt. May I be truthful in speech and in thought. May the Supreme Being (Brahman) protect me (the disciple). May Brahman protect my teacher. [I repeat,] may He protect me and protect my teacher. May He protect my teacher. Om Peace, Peace, Peace!

The present issue of our Research Journal *Prajñāloka* of the Department of Sanskrit Studies, which has since been rechristened as the Department of Sanskrit and Philosophy with enlarged scope of academic achievement, under the School of Indian Heritage, Ramakrishna Mission Vivekananda Educational and Research Institute, is now being published after some delay. It was to have been published on the occasion of the University

Foundation Day on 4 July 2018. This journal, as mentioned in my Foreword to an earlier issue, is a reverential attempt to worship surabharati by our faculty of the Department of Sanskrit Studies. Our hearty congratulations to the faculty members of the Department on this sustained effort and tenacious pursuit of this literary endeavour. May Surabharati Medhadevi Vagdevi Saraswati illumine our hearts by making them Her eternal abode and bless us with the awakening and blazoning of the Light of Wisdom, *Prajñāloka*, is the humble prayer of

Swami Atmapriyananda
Vice Chancellor

Belur Math
17 July 2018

# आचारप्रभवो धर्मः
## सुनीता एम्.के*

यः एव वेदस्य परमार्थः स एव पुराणानां, काव्यानां वा परमार्थः आनन्दरूपः। स च धर्माधर्मविज्ञानात् तदनुष्ठानात् च भवति। श्रुतिस्मृतीतिहासादयो धर्माधर्मप्रबोधकाः सन्तः तादृशकर्माणि प्रवर्तयितुं प्रयतन्ते। कार्याणि तु विशेषतः वैचक्षण्यप्रदायकानि[१] भवन्ति, यानि रसात्मकानि आनन्दनिष्यन्दीनि च। उक्तम्– चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि। काव्यादेव ...इति विश्वनाथेन आर्षदृष्टेः रामायणस्य वेदसम्मितत्वात्[२] तत्र वैदिकस्य, तदुपबृंहितस्य पुराणवाङ्मयस्य सारभूतं तत्त्वं प्रतिबिम्बितमेव।

"आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति"[३] इत्यादिश्रुतिप्रमाणमुररीकृत्य–

आनन्दमयस्य पथः अवबोधनपरं रामायणं श्रीरामादीनामाचारात्मक-पथप्रदर्शनेन सह करुणरसानुभूतिमपि जनयन्ति। शास्त्रार्थानुष्टानमिन्द्रियजयः इति कथयन् कौटिल्यः[४] शास्त्रार्थानुष्ठानस्य इन्द्रियजयलक्ष्यत्वं प्रतिपाद्य अनुष्ठानरूपस्य, आचाररूपस्य धर्मस्य प्राधान्यं प्राचीकटत्।

मनुरपि[५] 'आचारश्चैव साधूनामिति', 'वेदः स्मृतिः सदाचारः' इति च सतामाचारस्य श्रुतिस्मृतिप्रतिपादितधर्मातिरिक्तता आचाररूपस्यापि धर्मस्य गणनां

---

*सहायकाचार्या, आराद्विद्यानिदेशालये, राष्ट्रियसंस्कृतविद्यापीठे, तिरुपतिस्थिते

[१]धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्॥ भा.का. १

[२]इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितम्॥ इति। १।१।१८
रामायणं वेदसमं श्राद्धेषु श्रावयेद्बुधः॥ ७।१११।४

[३]तैतरीयोपदनिषद् ३।६

[४]अर्थशास्त्रम् १।६।३

[५]वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥
वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्॥ मनुस्मृतिः २।६।१२

चकार, यस्य श्रीरामादीनामाचारः मूलभूतः। रामायणपात्राणि आचाररूपधर्मस्य बोधकानि धर्मस्य हानौ शप्तानि।

## रामो-रमयतां वरः

श्रीमद्वाल्मीकिरामायणे श्रीरामस्य चारित्र्यकमनुसृत्य पितृवाक्यपरिपालन-रूपो धर्मः अत्यन्तप्रसिद्धो समजनि। नायं राजधर्मत्वेन प्रत्युत पुत्रधर्मत्वेन प्रसिद्धः। दशरथस्य अभिप्रायः[६] इति कैकेय्याः मुखादेव श्रुत्वापि श्रीरामः पितुरभिप्रायमेव शिरसा गृहीत्वा अरण्यं जगाम।

यद्यपि अरण्यवासस्य रावणवधस्याङ्गीभूतस्य कर्तव्यानुसरणेन साकं शापमोचनरूपादीनामङ्गभूतानां कर्तव्यानामनुपालनस्य दृश्यमानत्वेऽपि पितृवाक्यपरिपालनार्थमेव वनं जगामेति श्रीरामस्याचरणस्यैवाङ्गित्वमधिगतम्।

पुत्राणां वा शिष्याणां प्रथममध्यमाधमभेदेन त्रैविध्यरूपः पितुः गुरोर्वा अभिप्रायस्य वाक्यस्थानुसरणमनुसृत्य कश्चन विभागः दृश्यते। यः पुत्रः पितुः अभिप्रायं ज्ञात्वैव कर्मणि प्रवर्तते स उत्तमः, पित्रा उक्तः सन्, कर्मणि प्रवर्तमानो मध्यमः, पित्रादिष्टो सत्यपि यः न आचरति सः अधम इति पुत्राणां शिष्याणां वा व्यपदेशः।[७]

रामस्य आचारे पितुः उद्देश्यमेव उररीकृत्य रामो वनं जगाम। मात्रा प्रायोपवेशनेन निषिद्धोऽपि पितुः वचनानुपालनं सर्वेषां धर्मः इत्युक्त्वा वनं जगाम रामः। पितुः आदेशं तिरस्कृत्य पित्रा शप्ताः विश्वामित्रपुत्राः।

विश्वामित्रः त्रिशङ्कोः सदेहेन स्वर्गप्राप्तिकामानां पूरयितुं क्रियमाणे यज्ञे

---

[६]यदि सत्यप्रतिज्ञं त्वं पितरं कर्तुमिच्छसि।
आत्मानं च नरश्रेष्ठ मम वाक्यमिदं शृणु॥
सन्निदेशे पितुस्तिष्ठ यथानेन प्रतिश्रुतम्।
त्वयारण्यं प्रवेष्टव्यं नव वर्षाणि पञ्च च॥
भरतश्चाभिषिच्येत यदेतदभिषेचनम्।
त्वदर्थे विहितं राज्ञा तेन सर्वेण राघव॥
सप्त सप्त च वर्षाणि दण्डकारण्यमाश्रितः।
अभिषेकमिदं त्यक्त्वा जटाजीरधरो भव॥ रामायणम् २।१८।३४-३७

[७]अनाज्ञप्तोऽपि कुरुते पितुः कार्यं स उत्तमः।
उक्तः यः पुत्रः स मध्यम उदाहृतः॥

सहयोगं दातुं वसिष्टपुत्रान्[6] महोदयादीन् अभ्यर्थ्य तैः तिरस्कृतः तानपि शशाप। सन्दर्भेऽस्मिन् अन्ये च ये ऋषयः यज्ञार्थमाहूताः–

अग्निकल्पो हि भगवान् शापं दास्यति रोषतः।

इति भीत्या तमनुसस्रुः। एतेनापि राजर्षिपदभाक् विश्वामित्रः अत्यन्तं क्रोधी इति प्रतिपादितं भवति। तथा सुलभक्रोधावेशगः विश्वामित्रः मारीचसुबाहू न शशाप। उक्तवाँश्च–

न च मे क्रोधमुत्स्रष्टुं बुद्धिर्भवति पार्थिव।
तथा भूता हि सा चर्चा न शापस्तत्र मुच्यते॥ इति।

इति स्वात्मनः बुद्धेः शापदानेऽननुकूलतां प्रकटय्य स्वनिग्रहमपि द्योतयामास। एवं स्वात्मनः निग्रहे समर्थोऽपि विश्वामित्रः शुनःशेपाय ऋषीकपुत्राय प्राणरक्षणाभयं दत्त्वा तत्प्राणरक्षणार्थं स्वपुत्रान् आत्मात्यागाय प्रचोदितवान्–

यत्कृते पितरः पुत्राञ्जनयन्ति शुभार्थिनः।
परलोकहितार्थाय तस्य कालोऽयमागतः॥
अयं मुनिसुतो बालो मत्तः शरणमिच्छति।
अस्य जीवितमात्रेण प्रियं कुरुत पुत्रकाः॥
सर्वे सुकृतकर्माणः सर्वे धर्मपरायणाः।
पशुभूता नरेन्द्रस्य तृप्तिमग्नेः प्रयच्छत॥ इति।

पितुः विश्वामित्रस्य वचनं श्रुत्वा मधुच्छन्दादयः सुताः साभिमानम्–

---

[6]यद्दूषयन्त्यदुष्टं मां तप उग्रं समास्थितम्॥
भस्मीभूता दुरात्मानो भविष्यन्ति न संशयः।
अद्य ते कालपाशेन नीता वैवस्वतक्षयम्॥
सप्तजातिशतान्येव मृतपाः संभवन्तु ते।
श्वमांसनियताहारा मुष्टिका नाम निर्घृणाः॥
विकृताश्च विरूपाश्च लोकाननुचरन्त्विमान्।
महोदयश्च दुर्बुद्धिर्मामदूष्यं ह्यदूषयत्॥
दूषितः सर्वलोकेषु निषादत्वं गमिष्यति।
प्राणातिपातनिरतो निरनुक्रोशतां गतः॥
दीर्घकालं मम क्रोधाद्दुर्गतिं वर्तयिष्यति।
एतावदुक्त्वा वचनं विश्वामित्रो महातपाः।
विरराम महातेजा ऋषिमध्ये महामुनिः॥ इति रामायणम् १।५९।१७-२२

कथमात्मसुतान् हित्वा त्रायसेऽन्यसुतं विभो।
अकार्यमिव पश्यामो श्वमांसमिव भोजने॥

इति प्रत्यस्पन्दन्। तच्छ्रुत्वा क्रोधसंरक्तनयनः तान् श्वमांसभोजिनो भवतेति शशाप।

पुत्राः न केवलं पित्रार्जितवसूनामेवाधिकारिणः पितुः वचनस्य, पितुः अभिप्रायस्य रक्षणोद्युक्ताः भवेयुः। परन्तु विश्वामित्रसुताः पितुरवहेलनां कृत्वा तत्क्रोधभाजः तदनु शापभाजश्च बभूवुः। एवं यदुरपि पित्रा शप्तः।

पितुः दशरथस्याभिप्रायमात्रमवगत्यापि श्रीरामः राज्यं त्यक्त्वा अरण्यं गत्वा युगयुगान्तरेष्वपि आदर्शः पुरुषो बभूव।

श्रीरामस्य जीवने श्रीरामस्य कथायां प्रधानघट्टेषु मुख्यतमौ द्वौ भवतः, श्रीरामवनवासः, सीतायाः वने परित्यागश्च। उभयत्र विद्यमाने पात्रे निमित्तमात्रे एव। प्रथमे घट्टे कैकेयी[९] देवकार्यनिर्वहने पात्रीभूता, द्वितीये तु साधारणः कश्चित् पौरः विष्णोः भृगुशापयाथार्थ्यसम्पादने[१०] निमित्तो बभूव।

श्रीरामस्य सीता वियोगे मुख्यं प्रबलं कारणं भृगुशापः[११] देवीभागवम्[१२] अनुसृत्य लक्ष्म्या एव शापः। श्रीरामोत्पत्तेः प्रागेव विष्णुः भृगुना, लक्ष्म्या वा शप्तः। शापोऽयं प्रजाभिमतानुसरणरूपाचारस्य धर्मस्याङ्गभूतो बभूव।

---

[९] रामायणम् २।१८।३४-३७

[१०] देवीभागवतम् १।७७-७९

[११] ततस्तां निहतां दृष्ट्वा पत्नीं भृगुकुलोद्वहः।
शशाप सहसा क्रुद्धो विष्णुं रिपुकुलार्दनम्॥
यस्मादवध्यां मे पत्नीमवधीः क्रोधमूर्छितः।
तस्मात् त्वं मानुषे लोके जनिष्यसि जनार्दन॥
तत्र पत्नीवियोगं त्वं प्राप्स्यसे बहुवार्षिकम्।
शापाभिहतचेतास्तु स्वात्मना भावितोऽभवत्॥ इति। रामायणम् ७।५१।१४-१६

[१२] विनापि कारणेनाद्य कथं हास्यस्य सम्भवः।
सपत्नीव कृता तेन मन्येऽन्या वरवर्णिनी॥
ततः कोपयुजा जाता महालक्ष्मी तमोगुणा।
तामसी तु तदा शक्तिस्तस्याः देहे समाविशत्॥
केनचित् कालयोगेन देवकार्यार्थ सिद्धये।
प्रविष्टा तामसी शक्तिः तस्याः देहेऽति दारुणम्॥ इति। देवीभागवतम् १।७७-७८

वाल्मीकिरामायणमनुसृत्य सीतापरित्यागे कारणं लोकापवाद[१३] एव।

अयं तु मे महान् वादः शोकश्च हृदि वर्तते।
पौरापवादः सुमहाँस्तया जनपदस्य च॥ रामायणम् ७।४५।११, १२

सीतापरित्यागं निरुह्य नितान्तं खिद्यन्तं लक्ष्मणम् आश्वासयितुं मन्त्री सुमन्त्रः भृगोः शापं विशदयामास। परं सीतापरित्यागः प्रजारञ्जनार्थमेवेति निरूप्य, प्रजारञ्जनमेव राज्ञां परमो धर्मः इति श्रीरामः कथयामास। वाल्मीकेरभिप्रायम् अत्यन्तहृद्यं चकार भवभूतिरपि[१४]।

राज्ञां यद्यपि विशेषाधिकारः भवति शासनविषये तेषामपि जनसाधारण्याभिप्रायस्य स्वीकरणं तदनुसरणञ्चात्यन्तं मुख्यमेव। रामायणं राजधर्मनिरूपणपरं काव्यमात्रं नास्ति, जनसाधारणस्यापि आत्मोन्नत्यै अपेक्षिताः रमणीयाः पन्थानः सन्ति तस्मिन्। न्यायमूर्तिः पि.कोदण्डरामय्यमहोदयोऽपि अभिप्रायमेव समर्थयति[१५]

धर्मसूत्राध्ययनान्न धर्मानुष्ठानप्रतिष्ठा सम्भवति। सूत्रितानां धर्माणां समुचितोपाख्यानायोजनया रूपं दत्त्वा वैचक्षण्यप्रदानेनैव तेषां कार्यान्वयने अनुकूलप्रवृत्तिर्भवति मानवानाम्। श्रीरामस्य पितृवाक्यपरिपालनरूपाचारः युगानतिक्रम्येदानीमपि प्रतिबिम्बते। एवमेव लोकाभिमतमनुसृत्यैव राज्ञा व्यवहर्तव्यं, न च स्वाभिमतमनुसरन्निव सीतापरित्यागे श्रीरामः स्वजीवनमेव उदाजहार।

स्वकर्तव्यनिर्वहने विघ्नैः पुनः पुनः प्रतिहन्यमानाः अपि उत्तमगुणाः

---

[१३]शुभाशुभानि वाक्यानि कान्याहुः पुरवासिनः।
श्रुत्वेदानीं शुभं कुर्यां न कुर्यामशुभानि च॥
कथयस्व च विस्रब्धो निर्भयं विगतज्वरः।
कथयन्ति यथा पौराः पापा जनपदेषु च॥ इति। ७।४३।१०-११

[१४]स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा॥ इति। उत्तररामचरितम्

[१५]We will not be able to acquire necessary strength and courage to practice the Dharma, precepts such as truth compossion and charity unless we see or hear the practice of those precepts by some humanbeing. Swami Vivekananda emphasised this and said ‘We can grasp an idea only when it comes to us through a materialised ideal person. We can understand the precept through the example’. (The light of Ramayana p.no.1)

स्वकार्यान्न निवर्तन्ते इति प्रसिद्धिः श्रीरामादीनामेवाचारप्रवणजीवनात् आदर्शात् सर्वत्र व्यापृता दरीदृश्यते।

पितुः दशरथस्य खिन्नता वार्ता तदनु मरणवार्ता वा रामं स्वकार्यात् पितुराज्ञानुवर्तिरूपत्वात् तद्रूपवनवासस्वीकारात् न निवर्तयामासतुः।

पितुर्वचन निर्देशात् पितुर्वचनगौरवात्।
वचनं कौशिकस्येति कर्तव्यमविशङ्कया॥ [रामायणम् १।२६।२]
कैकेय्याः प्रतिपत्तिर्हि कथं स्यान्मम वेदने।
यदि तस्या न भावोऽयं कृतान्तविहितो भवेत्॥ [रामायणम् २।२२।१६]

धर्मपरिरक्षणार्थं, विशेषतः राजधर्मप्रतिष्टापनार्थं श्रीरामेण भ्रातुः लक्ष्मणस्यापि राज्यात् बहिष्कृतवान्। राज्यबहिष्कारः प्राणहरणसदृश एवेति मत्वा लक्ष्मणं सततं सत्पथे वर्तमानमपि स्वापराधानुगुणं राज्यात् बहिश्चकार[१६]।

एवं श्रीरामस्य विभीषणस्याश्रमप्रदाने– मातृभ्यां कैकयीसुमित्राभ्यामादरप्रदाने सुमन्त्रस्यादरप्रदाने वा एवं सर्वत्रापि तस्य व्यवहाराः, आचाराः, आचारप्रभावस्य धर्मस्य प्रतिमाः भवन्ति।

-★-

---

[१६]"Time is indeed very powerful. Do not give up your promise and if you give up the promise the righteousness will perish and if the righteousness has gone the three worlds, both moving and stationary and the hosts of divine sages shall perish; and hence act according to the promise". Thereupon, Sri Rama said to his brother: Lakshmana, I am deserting you. Slaying or desertion is the same for the pious. Lakshmana forthwith went to the River Sarayu even without going to his place and sat on the banks performing Yoga restraining senses. (The light of Ramayana p.no.288)

# साम्बपुराणदिशा सूर्यमूर्तिलक्षणम् : निर्माणकलासु स्वातन्त्र्यं वैचित्र्यं च


## अभिषेकघोषः*


मूर्तिनिर्माणविद्या खलु यौगपद्येन कला विज्ञानञ्च। मूर्तिनिर्माणकलात्मकेषु शास्त्रेषु यद्यपि वास्तुविद्यादयः स्वातन्त्र्येण वर्तन्ते, तदात्मकं मानोन्मानादिकानां सिद्धान्तानां सारवत्तापि अविसंवादिनी, तथापि पुराणशास्त्रेषु अलोच्यमानेषु विषयबाहुल्येषु मूर्तिकलापि अन्यतमा तात्पर्यवाहिनीति परिदृश्यते। अतः मूर्तिकलाविद्यासु पुराणशास्त्राणाम् अपि महान् उपयोगः।

पुराणशास्त्रेषु महापुराणां यथा गौरवः परिदृश्यमानः तथैव उपपुराणानाम् अपि न खलु कश्चित् लाघवः वर्तते उपेतिशब्दयोगात्। उपपुरणेषु सौराचारात्मकं साम्बपुराणं खलु स्वातन्त्र्येण वर्तमानमिति। भारतवर्षेषु सूर्यार्चने इदानीं वैदेशिकी प्रथा प्रसृता जायते। क्रमेण सा देशान्तरोद्भूता संस्कृतिः भारतभूमौ स्वाङ्गीकृताभूत् प्रतिष्ठां च लेभे। साम्बपुराणस्य सङ्कलनकालः राजेन्द्रचन्द्रहाजरामहाभागेन स्थिरीकृत आसीदिति यद् विद्वद्भिरपि बाहुल्येन स्वीक्रियते। वस्तुतस्तु साम्बपुराणस्य सङ्कलनं न खलु एकस्मिंश्चित् काले सम्बद्धं न चापि एतत् पुराणं केनाप्यभिन्नेन पुराणकृता कृतं स्वतन्त्रा वा कृतिः। अतः पुराणस्यास्य आदिमः सृजनकालः ५००-८०० ईशवीयाब्दे काले सीमायिता इति हाजरामहोदयस्याभिप्रेतम्।[१]

साम्बपुराणे प्रतिमालक्षणाख्ये एकत्रिंशत्तमे अध्याये सूर्यमूर्तिनिर्माणकला तदात्मकं च मानोन्मानादीनां गणनं निवेशितमिति।[२]

अयमध्यायः अपि पूर्वोद्धृते आदिमे कालपरिसरे विद्यते। परन्तु केषाञ्चित् अध्यायानां सृजनं उत्तरकालवर्ति इत्यप्यनुमीयते। तदात्मकं महान् सृजनकालः ९००-१५०० ईशवीयाब्दे कालपरिसरे सीमायितः स्वातन्त्र्यञ्चापि विचार्यमित्यपि।

साम्बपुराणे आदित्यमूर्तेः प्रतिष्ठापनं सूचितम् तदर्थं च मूर्तिकलासम्बन्धिनी

---


*सहायकाचार्यः, संस्कृतविभागे, बागनानमहाविद्यालये


[१]Studies in the Upapurāṇas, p. 93

[२]श्रीसाम्बपुराणम्, अध्यायः ३१

निर्माणविधिः ज्ञापिता अभिहितञ्च निर्मातव्यमादित्यरूपम्।[३]

असौ पद्मास्यः रविदेवः सस्मितं चारुविम्बाधरान्वितश्च। शिरसि तस्य रत्नकिरीटः शोभमानः। कटकाङ्गदहाराव्यङ्गमणिकुण्डलपदबन्धादिभिः बहुशः सुशोभितः भवेत् सुबाहुः सुशोभनः सः देवः। साम्बपुराणे एवम्बिधायाः सूर्यमूर्तेः अर्चनं विहितम्। शिल्पज्ञैः जनैः तु सा दारुप्रतिमा साधु कार्या; मौलिपाणिपादांसादीनामङ्गानां मानं यथाविधि करणीयम्। आदित्यप्रतिमायाः मानबाहुल्यमपि सर्वथा स्वीक्रियते इति साम्बपुराणदिशा ज्ञापनीयम्। परन्तु मानमेकमेवोत्तमं फलदायकमित्यपि विज्ञाप्यते। तन्मानानुसारमेव सार्धत्रिहस्तपरिमेया प्रतिमा उत्कृष्टा इति ज्ञापितम्। एवम्बिधा आदित्यमूर्तिस्तु सुभिक्षक्षेमकारिकेति वर्ण्यते।[४] प्रतिमायाः अस्याः अर्चनात् आहार्याभावः यथा न विद्यते तथा स्वाभीष्टानां लाभः अपि भूयते प्रेप्सुना। रवेः प्रतिमा तु चतुरशीत्यङ्गुलपरिमेया भवेदिति साम्बपुराणम्।[५]

शिल्पी तु स्वाङ्गुलिभिरेव प्रतिमायाः मानमेतत् स्थिरीकुर्यात्। चतुरशीत्यङ्गुलानामेषः उल्लेखस्तु साम्बपुराणदिशा विशिष्टतया प्रतिभाति। साम्बपुराणे सूर्यात्मकेषु बहुलेषु विषयेषु इयं चतुरशीत्यपि संख्या स्वातन्त्र्येण प्रतीयमाना इति सूक्ष्मदर्शनोद्भूतं कौतूहलोद्दीपकञ्च। साम्बपुराणे चतुरशीतिः इति संख्यायाः गौरवं कस्मात् प्रतीयते? एषा संख्या यदि द्विधा विभज्यते ततः द्विचत्वारिंशत् इति संख्या प्राप्तव्या। एषा संख्या तु यथा द्वादशमासैः सम्बद्धा तथैव दशेन्द्रियैरपि। रिपुषड्कानां यथा अन्तर्भावः अत्र भाव्यः तथैव चतुर्दशभुवनानामपि। अतः द्वादशादीनां संख्यानां संयोगात् द्विचत्वारिंशदिति संख्या एव प्राप्यते। अथवा त्रिंशद्दिवसात्मकैः मासैः वर्षस्य द्वादशात्मकानां मासानां संयोगात् एषा संख्या प्राप्यते। षोडशकलाभिः वा चतुर्दशभुवनैः मनुभिर्वा सप्तसंख्येयैः अहोभिः इन्द्रियपञ्चकैः चेति समन्विता एषा संख्या। उत्तरायणे काले सूर्यदेवस्य गगनमार्गेण परिभ्रमणं त्रिचत्वारिंशदिति संख्यया यथा संयोज्यते तथैव दक्षिणायने अपि। अतः तयोः संयोगात् चतुरशीतिः इति संख्या प्राप्यते। सूर्यात्मके साम्बपुराणे अध्यायाः यथा चतुरशीतिसंख्येयाः तथैव सूर्यदेवस्य सांवात्सरिकरथयात्रायां सूर्यानुचरैः अपि

---

[३]तदेव, ३१।१७-१८

[४]तदेव, ३१।४

[५]अङ्गुलैः स्वैर्भवेन्मूर्तिरशीतिचतुरङ्गुला। तदेव, ३१।७

संबद्धा एषा संख्या। अपि च, आदित्यमूर्तिनिर्माणकलासु अपि प्रतिमामानमपि अनया संख्यया संयोज्यते यथा सूर्यमूर्तिस्तु चतुरशीत्यङ्गुलपरिमिता भवेदिति साम्बपुराणम्।

साम्बपुराणे आदित्यविग्रहस्य माननिर्णयः यथोपस्थाप्यते तदित्थमुपस्थापनीयम्। विग्रस्याननं भवेत् द्वादशाङ्गुलपरिमेयम्। वदनन्तु त्रिधा विभाज्यमानम्। ललाटनासिकाचिवुकैः च आननं विभज्येत। नसिकया समरेखवर्ति भवेत् कर्णयुगलम्। अपि च, पाणियुगलादेव उच्चैः वर्तते कर्णयुगलम्। नेत्रद्वयमेव द्यङ्गुलपरिमेयं भवेत्। तारके च भवेतां नेत्रयोः भागत्रयेषु भागद्वयं विहाय भागैकव्यापिणौ। तारकयोः तृतीयः भागस्तु प्राङ्गैरेव सम्पाद्येत। ललाटशिरोदेशौ च सममानान्वितौ भवेताम्। शिरोभागस्य परिणाहः विस्तारः वा द्वात्रिंशदङ्गुलिः भवेदित्युच्यते। आननहृदययोः मध्यभागवर्ती कण्ठदेशस्तु नासिकया समानः इति ज्ञापितम्। उरसः मध्यभागस्तु आननस्य मानमनुवर्तते। नाभिकुण्डली अपि तादृशी भवेत्। ततस्तु मेढ्रदेशः रचनीयः। मुखमानस्य विस्तारः यथा भवेत् प्रतिमायाः वक्षोभूमिरपि तथैव भाव्या। कटिदेशस्तु तदर्धमानान्वितः भवेत्। दीर्घौ च वाहू उरूजङ्घे च तत्तुल्ये भवेताम्। गुल्फस्याधस्तात् पाददेशः चतुरङ्गुलमितः उच्छ्रितः भवेत् विस्तारश्च भवेत् षडङ्गुलपरिमेयः। अङ्गुष्ठस्य मानमङ्गुलत्रयमिति ज्ञापितम्। पाददेशस्यायामः चतुर्दशाङ्गुलः भवेत्।[६]

अङ्गानां संयोगादेव प्रतिमायाः लम्बमानं चतुरशीत्यङ्गुलमितं भवेदिति साम्बपुराणदिशा अस्माभिः ज्ञायते। परन्तु साम्बपुराणदिशा आदित्यविग्रहस्य यन्मानं ज्ञापितम् तस्मात् चतुरशीत्यङ्गुलिभिः मेया भवेत् आदित्यप्रतिमा इत्यस्मात् स्पष्टतया न प्रतिभाति। अतः मनविषयकः विचारः कीदृशः भवेत् इति अन्येभ्यः आकरेभ्यः ज्ञातव्यम्।

भारतीयमूर्तिकलाविद्यायाः मानगणनासु अङ्गुलमानं खलु सुप्राचीनं मानज्ञापकमिति परिलक्ष्यते। अङ्गुलमानमपि त्रिधा विभज्यमानम्।[७] तेषु मानाङ्गुलस्य विशेषतया प्राधान्यम् परिदृश्यते। बृहतसंहितायां तु पञ्चविधं मानं पुरुषपञ्चकेभ्यः स्थिरीकृतमिति। षण्णवत्यङ्गुलमितः पुरुषस्तु हंसः इति नाम्ना

[६]श्रीसाम्बपुराणम्, ३१।९-१४

[७]साम्बपुराण, पृ.– ९३, पादटीका १

ज्ञायते। नवनवत्यङ्गुलमितः पुरुषस्तु हंसः इति नाम्ना ज्ञाप्यते। नवनवत्यङ्गुलमेयः पुरुषः खलु शश इत्याख्यया भूषितः। द्व्यधिकं शतमितिपरिमितः पुरुषः रुचकाख्यः। पञ्चाधिकं शतमितिपरिमितः पुरुषः भद्रः इति ज्ञायते। अष्टाधिकं शतमित्यनेन परिमितः पुरुषः मालव्याख्यः भवेत्।[८]

वस्तुतस्तु देवप्रतिमानां निर्माणन्तु आद्यमन्तिमं च मानद्वयमाधारीकृत्य भूयते। साम्बपुराणदिशा ज्ञायते यत् आदित्यप्रतिमा चतुरङ्गुलिभिः परिमेया भवेत्। बृहत्संहिता (६८।१८) ज्ञापयति यत् एषा भद्राख्या पुरुषप्रतिमा खलु चतुरशीत्यङ्गुलमेया भवेत्। अपि तु वैखानसागमदिशा सूर्यप्रतिमा भवेत् षोडशाधिकं शतमित्यङ्गुलमानमेया इति सूच्यते।

प्रतिमासु मानगणनायां एककद्वयं निर्धार्यते इति दृष्टम्। एकन्तु अङ्गुलमानमितरं पुनः तालमानमिति। तालमानाङ्गुलमानौ तु द्विधा विभज्यमानौ। तयोः एकन्तु स्वाश्रयमानमितरन्तु सहायकमानम्।[९]

मत्स्यपुराणे पुनः मानवैचित्र्यं मानगणनासु च भेदबाहुल्यमुपस्थापितम्। तेषु रजः-रोमः-लिक्षा-यूका-यवाङ्गुल-काल-भाग-किष्कु-दण्ड-प्रमाण-प्राजापत्य-धनुर्मुष्टि-धनुग्ररहादयः विशेषतया सूचनीयाः। त्रसरेण्वष्टकेन वालाग्राख्यं मानं परिमीयते। वालाग्राष्टकेन एका लिक्षा इति मानं धार्यते। लिक्षाष्टकेन यूका इति मानं यथा निर्धार्यते तथैव यूकाष्टकेन यवमानमपि। यवाष्टकेन तु अङ्गुलमानमेकं सम्पाद्यते।[१०]

सहायकमानमपि मात्राङ्गुलदेहाङ्गुलाभ्यां विभाज्यते। देहाङ्गुलाख्यं मानमित्थं परिमीयते। प्रतिमायाः लम्बमानं यदि चतुर्विंशत्यधिकं शतं विंशत्यधिकं शतं वा षोडशाधिकं शतं वेति समभागैः विभज्यते ततस्तु यन्मानं प्राप्यते तदात्मकं भागमेकं देहाङ्गुलाख्यं[११] भवेत्। चतुर्विंशतिविधेषु देहाङ्गुलमानेषु गोलकब्राह्मणेन्द्रियमूर्तीन्दुकलाग्निगुणकालराम-वर्णवेदजातिभूतादयः विशेषतया

[८]तदेव, पादटीका २

[९]प्राचीनभारतीय प्रतिमाविज्ञाने मानगणना ओ मत्स्यपुराण : एकटि संक्षिप्त समीक्षा, पृ.– १९०

[१०]मत्स्यपुराणम्, २५८।१७-१८

[११]प्राचीनभारतीय प्रतिमाविज्ञाने मानगणना ओ मत्स्यपुराण : एकटि संक्षिप्त समीक्षा, पृ.– १९२

स्मरणीयाः।[१२] वराहमिहिरेणोच्यते यत् नवतालपरिमेया काचित् प्रतिमा उत्तमा इति परिगण्यते।[१३]

भवेयुः देवदानवकिन्नराश्च नवतालपरिमेयाः प्रतिमानिर्माणकलासु। वामनप्रतिमा तु सप्ततालान्विता भवेत्। रामादयः पौराणिकाः वीरास्तु दशतालपरिमिताः भवन्तीति सूच्यते। मानमिति प्रतिमायाः उच्छ्रितेनान्वितमिति। मुखमानन्तु तालमानस्य भित्तिरूपम्। दशतालपरिमेया काचित् प्रतिमा तु तद्गतात् मुखमानात् दशगुणात्मिका बृहती भवेत्। यदि वा तालमानं विभज्यते खलु देहाङ्गुलाख्यं मानन्तु प्राप्यते पुनः। अतः तालमानस्य क्षुद्रतमं रूपं तु देहाङ्गुलमानेन प्राप्यते इति भावः।

इदानीं साम्बपुराणदिशा प्राप्तव्या मानगणनात्मकः निर्देशः स्मर्यते पुनः। साम्बपुराणोक्ता सूर्यप्रतिमा तु आसीना इति मन्यते। अतः एषा आसनप्रतिमा। यतः एवंविधा या प्रतिमा सा पुनः स्थानकमूर्तेः खर्वकायाः लघ्वी वा उच्छ्रितेन भवेत्। बृहत्संहितादिशा प्रतिमायाः आदर्शममानन्तु नवतालात्मकं भवेदिति सूच्यते। कश्चित् नवतालात्मकः विग्रहस्तु स्थानकत्वात् प्रतिभाति। सूर्यदेवस्तु रथारोही। एषः सप्ताश्ववाहिनं रथमारुह्य गगनमार्गेन एति इति शास्त्रेषु स्पष्टतया विवृतम्। रथारोही भानुदेवः दण्डायमानः उत आसीनः इति चिन्तनीयम्। आदित्यस्य दण्डायमानः विग्रहः शास्त्रेषु उपस्थाप्यते।[१४] साम्बपुराणे अपि तद्देवस्य ऊरुजङ्घे पुनः ज्ञापिते प्रतिमानिर्माणकला-वर्णनावसरे।[१५]

तथापि सूर्यदेवस्य आसनप्रतिमायाः कल्पनमेवास्माभिः क्रियते। यतः चतुरशीत्यङ्गुलमितानां मानानामुपयोगः इत्थमेव स्पष्टतया प्रतीयमानः भवेदिति। उपविष्टस्य विग्रहस्यापि ऊरुदेशस्य मानमुपस्थापनीयम्। अतः एषा प्रतिमा दण्डायमाना इत्यस्मात् न प्रमाणीभूतमिति भावः। पुनश्चापि, साम्बपुराणे सूर्यदेवस्य जङ्घाद्वयं पदद्वयञ्च यद्यप्युपस्थाप्यते, तथापि शास्त्रेषु भानोः उपानहान्विता प्रतिमा ख्याता। पुनरपि मूर्तौ तत्पादद्वयमेव नोपलभ्यते अदर्शनत्वात्। यतः तेजोराशिभिः आवृतं भास्करस्य पदद्वयमित्यादयः पौराणिकी वार्ता।

[१२]तदेव

[१३]आपादतलमस्तको नवतालो भवेत्तु यः, मत्स्यपुराणम्

[१४]प्रतिमाशिल्पे हिन्दु देवदेबी, पृ.– ९७

[१५]श्रीसाम्बपुराणम्, ३१।१२



साम्बपुराणदिशा प्रकल्पिता आदित्यप्रतिमाः काल्पनिकं चित्रणम्

अपि च, आसीना प्रतिमा यदि पद्मासनस्था भवेदतः चतुरशीत्यङ्गुलात्मकेषु उच्छ्रितेषु ऊरुजङ्घात्मकस्य देहस्याधोभागः न हि संयोज्यते। यतः सा प्रतिमा आसीना ततः उपविष्टायाः तस्याः उच्छ्रितिः शिरोदेशादारभ्य कटिदेशादधः एव परिगणनीया। अतः इदानीं अस्माभिः यादृशी परिगणना प्राचीनमानादिषु प्रकल्पिता, तस्मात्तु एषः आसीनः विग्रहः न चतुरशीत्यङ्गुलमेया मन्ये। अतः यदि सा प्रतिमा पीठे उपविष्टा भवेत्, ततः देहस्य मानं विहाय पीठमानन्तु चतुरशीत्यङ्गुलात्मकेषु मानसमुदायेषु परिगणनीयम्। यदि वा पादद्वयं भूमौ निधाय उपविश्यते ततस्तु अस्माभिः प्रकल्पिताः मानपरिगणना व्यख्येया भवेत्। एवम्बिधायाः आसीनायाः प्रतिमायाः निदर्शनं मथुराप्रत्नागारे रक्ष्यते (५२२ संख्येया), यदपि वृन्दावनोद्भवा खलु।[१६]

---

[१६] *Sūrya* : Iconographical Study of the Indian Sun God, Plate no. XI

उपविष्टायाः सूर्यप्रतिमायाः अधोदेशस्य मानं भवेत् चतुर्विंशाङ्गुलपरिमेयम्। दण्डायमानासु तु प्रतिमासु पुनः चतुर्विंशत्यङ्गुलात्मकं मानं अधिकतया संयोज्यते ऊरुदेशस्य संयोगात्। तस्मात् विग्रहस्तु अष्टाधिकं शतमित्यङ्गुलमेयः भाव्यः। अतः सा प्रतिमा नवतालात्मिका भवेत्। उपविष्टायाः दण्डायमानायाः वा प्रतिमायाः जानु पुनरपि चतुरङ्गुलपरिमेयम् भवेत्। चतुरशीत्यङ्गुलात्मकं मानमतः यथाविधि उपलब्धम्। कस्मात् एवम्बिधं चतुरशीत्यङ्गुलात्मकं मानं साधनीयम्? कथं वा विग्रहस्याङ्गानां मानं स्वातन्त्र्येण ग्रहणीयम्? तन्मानसमष्टिः वा कथमेव चतुरशीत्यङ्गुलमेया भवेदिति इदानीमुपस्थाप्यते।

सार्धत्रिहस्ता सूर्यप्रतिमा भवेत् शुभफलदायिनी उत्तमा चेति साम्बपुराणम्।[१७]

यदि सार्धत्रिहस्ता प्रतिमा भवेत् चतुरशीत्यङ्गुलप्रमिता अतस्तु हस्तस्यैकस्य मानं चतुर्विंशत्यङ्गुलमेयं भवेदिति लक्ष्यते। यदि वा मुखमानेन विग्रहस्य विभज्यमानानामङ्गानां मानानि स्वातन्त्र्येणानुमीयते ततस्तु सप्तधा विभाज्या भवेत् काचित् प्रतिमा। ततः अंशानां मानं स्वातन्त्र्येण द्वादशाङ्गुलमेयं भवति। मुखहृदये यथा स्वातन्त्र्येण सममानात्मके भवेतां तथा नाभिकुण्डल्यान्वितः हृदयस्याधोभागः कटिदेशश्च। वाहू प्रवाहू च समानौ भवेताम्। अतः तयोरपि मानं द्वादशाङ्गुलात्मकम्। एतेषामंशानां सर्वेषां मानानि तु द्वादशाङ्गुलप्रमेयानि भवेदिति वक्तव्यम्। कस्यचित् उपविष्टस्य देवविग्रहस्य जङ्घे एकैकञ्चापि चतुर्विंशत्यङ्गुलमिते भवेतामिति। यदि वा विग्रहः दण्डायमानः भवेत् ततः ऊरुदेशस्य संयोगात् प्रतिमा अष्टाधिकं शतमित्यङ्गुलमेया भवेदिति आदौ उक्तम्। मुखस्य विस्तारः द्वादशाङ्गुलात्मकः आननञ्चापि त्रिधा विभाज्यते। चिवुकललाटौ नासिका चेति। मुखस्य उच्छ्रितमपि यदि द्वादशाङ्गुलैः परिमेयं भवेदित्यस्माभिः कल्प्यते ततस्तु अस्याः समस्यायाः यौक्तिकं समाधानं प्राप्तव्यम्। कस्माच्च सापि समाधेया? यदि मुखमानं त्रिधा विभज्यते, ततस्तु तदन्तर्वर्ती नासिकाख्यः मध्यभागः चतुरङ्गुलपरिमेयः भवेदिति भावः। इदानीमेतदपि स्मरणीयं यत् मुखहृदययोः अनर्वर्तिनी ग्रीवा भवेत् नासिकया समाना यत उच्यते– "तुल्या नसिकया ग्रीवा

---

[१७]तथा सार्ध-त्रिहूस्ता वा सवितुः प्रतिमा शुभा, श्रीसाम्बपुराणम्, ३१।२

मुखेन हृदयान्तरम्।"[१८] यदि च विग्रहस्य ग्रीवानासिके सममानात्मिके ततः पुनस्ते चतुरङ्गुलमिते भवेतामित्युपलभ्यते। पादयोः गुल्फद्वयमपि चतुरङ्गुलमेयं भवति उच्छ्रितेन जानु चापि तु। चतुरङ्गुलात्मकं मानं यदेवावशिष्यते तदेव जानुनः मानं भवेत् यद्यपि तत् साम्बपुराणे प्रत्यक्ष्यतया नोच्यते। यदि पुनः एषा युक्तिः ग्रहणीया भवेत् ततस्तु साम्बपुराणदिशा सूर्यप्रतिमायाः मानविषयिणी चर्चा भवेत् पुष्टा सफला च। सूर्यप्रतिमायाः मानोन्मानात्मकस्य सिद्धान्तितस्यापि यौक्तिकः परिणामः भाव्यः इति शेषः।

-★-

[१८] श्रीसाम्बपुराणम्, ३१।११

# ब्रह्मानन्दीयोक्तप्रथममिथ्यात्वपरिष्कारा:

पि.आर्.वासुदेवन्*

मिथ्याशब्दः अनिर्वचनीयतावचनः इति पञ्चपादिकोक्तरीत्या सदसत्वानधिकरणत्वम् प्रथममिथ्यात्वम् इति ज्ञायते। अनिर्वचनीयत्वं च सत्वेन असत्वेन वा निर्वक्तुमशक्यत्वम्। तत्त्वं सदसत्वानधिकरणत्वपर्यवसितम्। तस्य चतुर्धा परिष्काराः भवितुमर्हन्ति। तच्च इत्थम्– (१) सत्वाभावविशिष्टासत्वाभावः (२) सत्वाभाव-असत्वाभावरूपं धर्मद्वयम् (३) सद्भेदविशिष्टासद्भेदः (४) सद्भेद-असद्भेदरूपम् धर्मद्वयम्।

प्रथमद्वयम् विशेष्यविशेषणभावापन्नानापन्नम् अत्यन्ताभावघटितम्।

अन्तिमद्वयं च विशेष्यविशेषणभावापन्नानापन्नं भेदघटितम्।

अत्र क्रियमाणविचारस्तु लक्षणचतुष्टयसाधारण एव।

अद्वैतसिद्धौ आदौ न्यायामृतकारेण प्रथममिथ्यात्वं विकल्प्य दूषितम्। तथा हि– सदसत्वानधिकरणत्वरूपम् अनिर्वाच्यत्वम् कीदृशम्? (१) असत्वविशिष्टसत्वाभावो वा (२) सत्वात्यन्ताभावासत्वात्यन्ताभावरूपं धर्मद्वयम् आहोस्वित् (३) सत्वात्यन्तिाभाववत्वे सति असत्वात्यन्ताभावरूपं विशिष्टम् इति। नाद्यः, सिद्धसाधनात्। जगति माध्वेन सत्वस्यैव अङ्गीकारात् सत्वविशिष्टासत्वस्य चानङ्गीकारात् तदभावस्तु सिद्धः इति सिद्धसाधनम्। न द्वितीयः, सत्वात्यन्ताभाववति धर्मिणि असत्वस्यैव सम्भवात् असत्वाभावासम्भवात् सत्वात्यन्ताभावसामानाधिकरण्यम् असत्वाभावे व्याहतम् इति। निर्धर्मके ब्रह्मणि सत्वस्य असत्वस्य चाभावेऽपि सद्रूपत्वाच्च यथा न मिथ्यात्वम्, तथा प्रपञ्चेऽपि सत्वस्य च असत्वस्य चाभाववत्वेऽपि सद्रूपत्वेन स्यादमिथ्यात्वम् इति अर्थान्तरम्। इदं दूषणद्वयं तृतीयविकल्पेऽपि समानम् इति पञ्चपादिकोक्तम् मिथ्यात्वलक्षणं सर्वथा दुष्टम् इति पूर्वपक्षिणः न्यायामृतकारस्य आशयः।

अद्वैतसिद्धौ च एतेषां दूषणानां समाधानम् इत्थं वदन्ति मधुसूदनसरस्वतिस्वामिपादाः– प्रथमपक्षस्तु अद्वैतिना न स्वीक्रियते इति कृत्वैव सः दोषः नात्र समुन्मिषति। द्वितीये तृतीये च पक्षे न कश्चित् दोषः इति

---

*सहाध्यापकः, वेदान्तविभागे, माद्राज्-संस्कृत-महाविद्यालस्य

तात्पर्यम्। तथाहि- व्याहतिरेव द्वितीयविकल्पे प्रथमदोषः आसीत्। सा च नास्ति। व्याहतिश्च द्वेधा भवति परस्परविरहरूपत्वम्, परस्परविरहव्यापकत्वं च। यदि तयोः धर्मयोः अन्यतरत् अस्ति तदा भवेत्, न तु एतद्द्वयमपि अद्वैतिविवक्षितसत्वासत्वयोः अस्ति। प्रकृते च कीदृशं सत्वं निवेशितमस्ति, कीदृशम् असत्वं निवेशितमस्ति इति लक्षणकर्त्रा वक्तव्यम्। सत्वाभावविशिष्टासत्वाभवः इति लक्षणे निविष्टं सत्वं भवति त्रिकालाबाध्यत्वं, तदभावरूपः सत्वाभाव एव विशेषणम्। असत्वं च न त्रिकालाबाध्यत्वरूपसत्वाभावः किन्तु क्वचिदप्युपाधौ सत्वेन प्रतीयमानत्वानधिकरणत्वम्। तद्भावरूपः असत्वाभाव एव लक्षणे विशेष्यो भवति इति। तथा च अनयोः धर्मयोः परस्परविरहरूपत्वं नास्ति इति तत्स्वरूपकथनेनैव ज्ञायते। परस्परविरहव्यापकत्वं च अनयोः धर्मयोः नास्ति। तथाहि– यत्र यत्र सत्वाभावः शुक्तिरूप्ये तत्र तत्र असत्वम् इत नास्ति इत कृत्वैव व्यापकत्वभङ्गो अस्ति। परस्परविरहव्याप्यत्वं च व्याहतिप्रयोजकं नास्ति, परस्परविरहव्याप्ययोरपि गोत्वाश्वत्वयोः अभावौ एकस्मिन् उष्ट्रे भवितुमर्हतः इति सत्वासत्वयोरपि परस्परविरहव्यापकत्वेव तयोः अभावयोः एकत्र सत्वं न विरुद्धम् इति प्रथमदूषणं खण्डितम्।

ब्रह्मणः सद्रूपस्य सर्वानुगतत्वात् तदध्यस्तत्वेनैव 'घटः सन्' 'पटः सन्' इत्यादि व्यवहारस्य उपपत्तेः प्रत्येकं प्रपञ्चे सद्रूपत्वकल्पने मानाभावः इति कृत्वैव नार्थान्तरम्। किंच यदि प्रत्येकं सद्रूपत्वं प्रकल्प्येत तर्हि अनुगतव्यवहारः न निरुह्येत, अननुगतेन अनुगतव्यवहारनिर्वाहासम्भवात् इति अर्थान्तरशङ्कैव नास्ति। किंच यदि भेदघटितपरिष्कारः स्वीक्रियते– सद्भेदासद्भेदरूपधर्मद्वयं वा सद्भेदविशिष्टासद्भेदः विशिष्टो वा, तथापि न अर्थान्तरं यतो हि– प्रपञ्चे सद्भेदे साधिते पुनः सद्रूपतामादाय नास्ति अर्थान्तरम् इति अद्वैतसिद्धिकाराणाम् आशयः।

अत्र ब्रह्मानन्दस्वामिनः विचारयन्ति– अत्र तावत् मिथ्यात्वलक्षणे प्रविष्टं सत्वं किम् इति शंकायां त्रिकालाबाध्यत्वम् इति वक्तव्यम् अर्थात् कालानवच्छिन्नः बाध्यत्वाभावः इति आगतम्। अत्र अभावप्रतियोगिभूतं बाध्यत्वं च किम् इति शङ्कायां मिथ्यात्वम् इति वक्तव्यम्। तथा च मिथ्यात्वलक्षणे मिथ्यात्वस्य प्रवेशेन आत्माश्रयः इति दोषः आगतः। आत्माश्रयः च इत्थं वारयन्ति– यत् बाध्यत्वम् अभावप्रतियोगिभूतं विवक्षितमस्ति, तत् तु न प्रथममिथ्यात्वस्वरूपं किन्तु ज्ञाननिवर्त्यत्वरूपं तृतीयमिथ्यात्वमेव। ज्ञप्तौ अन्योन्याश्रयोऽपि नास्ति। यतः यद्यपि प्रथमलक्षणे तृतीयलक्षणस्य प्रवेशः अस्ति, तथापि तृतीयलक्षणेन

प्रथमलक्षणस्य प्रवेशोऽस्ति इति।

ततोऽपि प्रश्नः भवति– यदि प्रथमं लक्षणं परिष्क्रियते, तर्हि असत्वाभावदलं व्यर्थम्। तथाहि– तृतीयलक्षणस्य प्रवेशे ज्ञाननिवर्त्यत्वाभावः एव सत्वम् इति आयाति, तद्भावश्च सत्वाभावः ज्ञाननिवर्त्यत्वम्। तच्च तृतीयलक्षणे वक्ष्यमाणरीत्या ज्ञानप्रयुक्तावस्थितिसामान्यविरहप्रतियोगित्वं भवति। तत्त्वं न असति वर्तते इति कृत्वा असति अतिव्याप्तिवारणाय योजितम् यत् द्वितीयदलं तद्व्यर्थं स्यात् इति। तत्र इदं समाधानम्– असत्वाभावस्यैव लक्षणे मुख्यविशेष्यत्वात् मिथ्यात्वस्वरूपत्वात् असत्वाभावस्य न व्यर्थता सम्भवति, यथा धूमेनैव वह्निसाधनसम्भवे धूमप्रागभावरूपं हेत्वन्तरं यथा न व्यर्थं तथा इति। तथापि सत्वाभावविशिष्टत्वेनैव निवेश्यते असत्वाभावोऽपि, असत्वाभावत्वेन निवेशे न प्रयोजनं किञ्चित् उपलभामहे यतः सामानाधिकरण्यरूपं वैशिष्ट्यम् एवास्ति लक्षणे। इदं च वैशिष्ट्यम् असदन्तर्भावेन न भवति, यतः असतः किञ्चिन्निरुपिताधिकरणत्वासम्भवात्। तथा च तादृशविशिष्टाभावत्वेन असत्वाभावमुख्यविशेष्यकं प्रथममिथ्यात्वलक्षणम् इति। किन्तु इत्थम्भूतम् अवैयर्थ्यं विशेषणविशेष्यभावरहितपक्षे न सम्भवतीति अभावद्वयत्वेन निवेशे अयं दोषः समुन्मिषत्येव इति। किञ्च न केवलम् असत्वाभावस्य वैयर्थ्यं बोध्यत्वाभावः इत्यत्र यत् बोध्यत्वं तस्यैव मिथ्यात्वस्वरूपसिद्धिसम्भवे तदन्यस्य सर्वस्यापि वैयर्थ्यप्रसङ्गः इत्यपि दूषणं स्थिरमेव। अतः एतादृशदोषपरिजिहीर्षया ब्रह्मानन्दस्वामिनः प्रकारान्तरेण परिष्कुर्वन्ति। किंच इत्थं निवेशयितुं नैव शक्यते च। दोषान्तरसत्वात्। कोऽयं दोषः इति चेत्– यदा लक्षणमेकं क्रियते, तदा वादिप्रतिवादिसम्मतं स्यात् लक्षणम्। तत्र ज्ञाननिवर्त्यत्वं नाम ज्ञानप्रयुक्तावस्थितिसामान्यविरहप्रतियोगित्वम् इति परिष्कृतमस्ति। इदं तु सत्कार्यवादाङ्गीकारे एव द्वेधा अवस्थितिः भवतीति सत्कार्यवादानभ्युपगन्तृनये (नैय्यायिकमते माध्वमते च) इदं न सम्भवति इत उभयवादिसम्मतम् इदं न भवति। किञ्च भेदघटितपरिष्कारे सत्वावच्छिन्नप्रतियोगिताकभेद एव प्रथमदलम् इति वक्तव्यम्। तत्र सत्वं नाम ज्ञानानिवर्त्यत्वम्, तदवच्छिन्नप्रतियोगिताकः भेदः साध्यते इति वक्तव्यम्।

किन्तु अयं भेद एव अप्रसिद्धः इति आशयः। तथाहि– ज्ञानानिवर्त्यत्वरूपः यः धर्मः स ब्रह्मणि एव अस्ति नान्यत्र। तद्वत् ब्रह्ममात्रविषयकं एकं ज्ञानं स्वीकृत्य तद्धीविशेष्यत्वम् इति धर्मान्तरं च यदा स्वीक्रियते तयोः द्वयोरपि

ब्रह्ममात्रवृत्तित्वेन "समनियतत्वात्, समनियते सम्भवति लघौ गुरौ तदभावात्" इति न्यायेन तद्धीविषयत्वरूपे धर्मे ज्ञानस्य तद्यक्तित्वेन प्रवेशात् लघुत्वात् गुरुधर्मे अवच्छेदकत्वासम्भवतात् तादृशज्ञानानिवर्त्यत्वावच्छिन्नप्रतियोगिताकभेद एव अप्रसिद्धः इति कथं तादृशभेदस्य लक्षणे निवेशः सम्भवति। न च इष्टापत्तिः, यदि तद्धीविषयत्वम् प्रतियोगितावच्छेदकं स्वीकृत्य तदवच्छिन्नप्रतियोगिताकः भेद एव लक्षणे निवेश्यते तदा माध्वमते भवति सिद्धसाधनम्।

तथाहि– एतादृशब्रह्ममात्रविषयकं ज्ञानमेकं तद्यक्तित्वेन उपादाय तदवच्छिन्नप्रतियोगिताकभेदस्तु प्रपञ्चे सत्ये माध्वेन अङ्गीकृते सिद्धमस्ति। असद्भेदोऽपि सिद्धः अस्ति इति भवति सिद्धसाधनम्। अतः तथा न निवेश्यते। किन्तु सत्यं 'सर्वं वाच्यम्' इत्याकारकं शब्दजन्यं ज्ञानं तद्यक्तित्वेन उपादाय तादृशधीविषयत्वमेव सत्वम्, तदवच्छिन्नप्रतियोगिताकः भेदः निवेश्यते लक्षणे। तथा च माध्वेन सिद्धसाधनं वक्तुमशक्यम्। यतः निरुक्तज्ञानविषयत्वम् अस्मन्मते ब्रह्मण्येव भवति, माध्वमते तु ब्रह्मणि प्रपञ्चे च भवतीति तादृशतद्धीविषयत्वमेव माध्वमते सिद्धम्, न तु तदभावः इति तदवच्छिन्नप्रतियोगिताकभेदस्य असिद्धत्वात् न सिद्धसाधनम्। अत्र च तद्धीविषयत्वं यदवच्छेदकं, तत्तु न मुख्यविशेष्यत्वरूपं किन्तु प्रकारितासांसर्गिकविषयतान्यविषयतात्वावच्छिन्नम्। इदं च निरुक्तान्यविषयतात्वं निर्विकल्पकविषयतायामपि वर्तते, तथा सविकल्पकज्ञानीयप्रपञ्चनिष्ठविषयतायामपि इति न कथमपि सिद्धसाधनम्। अत्र सर्वपदमहिम्ना व्यापकत्वलाभो भवति। सत्यत्वव्यापकविषयतायाः प्रतियोगितावच्छेदकतालाभः इति आशयः। अन्यथा यत्किंचित् घटादिवृत्तिविषयतामादाय तदवच्छिन्नप्रतियोगिताकभेदः पटे सिद्धः इति सिद्धसाधनं स्यात्। सत्यत्वव्यापकविषयता च यत्किञ्चित्-घटादिवृत्तित्वविशिष्टविषयता न भवति इति तद्व्युदासः। तथा च सद्भेदासद्भेदरूपधर्मद्वयम् इति लक्षणे सद्भेदश्च निरुक्तप्रकारेण 'सत्यं सर्वं वाच्यम्' इति शब्दजन्यज्ञानं तद्यक्तित्वेन उपादाय तद्धीविषयत्वावच्छिन्नप्रतियोगिताकभेद इत्येवं परिष्करणीयः इति शम्॥

-★-

# अद्वैतिनाम् अनात्मोपादानविवादे शुद्धशाङ्करनयः

स्वामी वेदार्थानन्दः*

## ०. भूमिका

शाङ्करवेदान्ते औपनिषदब्रह्मस्वरूपक आत्मैव वस्तु, अनात्मभूतं त्वखिलमवस्त्विति सिद्धान्तितम्। अवस्तु चेत् कथमनात्मा प्रतीतिविषयताम् भजत इत्यत्र लौकिकीम् उपपत्तिमन्विषतां शाङ्करवेदान्तिनां मध्ये विप्रतिपत्तिः काचन वर्षसहस्रं यावदिह प्रवृत्ता। अनात्मन उत्पत्तिरस्ति वा नास्ति वेति तत्र प्रथमो विवादविषयः। अस्ति चेत् तत्र किं स्यादुपादानम् इत्यपरं विवादस्थानम्। यद् अनात्मन उपादानां तदेव अनात्मोपस्थापकस्य अध्यासस्यापि उपादानं स्यात्। सर्वथापीयं विप्रतिपत्तिः अद्वैतवेदान्तसम्प्रदाये अप्पय्यदीक्षितकालं यावत् नवनवव्याख्यानप्रस्थानानां समुत्थाने हेतुरभवत्। आधुनिककाले तु श्रीसच्चिदानन्देन्द्रसरस्वतीस्वामिनः[१] (१८८०-१९७५) शुद्धशाङ्करवादमुपस्थाप्य नूनमस्य विवादस्य मुखमेव पर्यवर्तयन्। अद्वैतवेदान्ते अनात्मोपस्थापकस्य अध्यासस्य उपादानस्वरूपमाश्रित्य प्रवृत्तेऽस्मिन् विवादे पञ्चपादिकाकारादीनाम् पूर्वाचार्याणाम् मूलाविद्यापक्षम् प्रति आधुनिकानां शुद्धशाङ्करवादिनाम् पक्षः पूर्वपक्षावगमनसौकर्यमुद्दिश्य अत्र प्रस्तूयते।

## १. प्राचीनाचार्याणां नयः– अध्यासः सोपादानः

भाष्यकारभगवत्पादानाम् अनन्तरम् तेभ्योऽपि पूर्विकाणाम् औपनिषदानाम् भिन्नाः पक्षाः तदा तदा कैश्चिदाचार्यैरवतार्य विचारिताः। तत्र प्रसङ्ख्यानवादमाश्रित्य कश्चनाभवद् विवादः। मण्डनमिश्रः वाचस्पतिमिश्रश्च प्रसङ्ख्यानवादपक्षीयौ। सुरेश्वरभगवत्पादाः, पद्मपादाचार्याः, प्रकाशात्मयतिचरणाश्च तद्विरोधिपक्षीयाः। अपरस्तु कश्चन विवादो दृष्टिसृष्टिवादमाश्रित्य समजनि। दृष्टिसृष्टिवादिनः अवस्थात्रयप्रक्रियायाम् बद्धाधिकादराः, यथा प्रकाशानन्दसरस्वतीस्वामिनः, नानादीक्षितः इत्यादयः। सृष्टिदृष्टिवादिनः अवस्थात्रयविचारे अदर्शिताधिकादराः

---

*शोधच्छात्रः, संस्कृतविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य

[१]इतः परम् इमेऽत्र "स्वामिनः " इत्येवम् प्रायो निर्दिष्टाः।

मूलाविद्यावादिनः।

दृष्टिसृष्टिवादस्य सृष्टिदृष्टिवादस्य च मध्ये शाङ्करवेदान्तदर्शनं दीर्घकालं यावद् दोलायते स्म। अनात्मन उद्भवहेतुस्वरूपादिकं केन्द्रीकृत्यासीत् तत्र मुख्या विप्रतिपत्तिः। दृष्टिसृष्टिमाश्रिताः प्रायेण अनात्मनोऽवस्तुत्वमेव मेनिरे। सृष्टिदृष्टिवादिनस्तु अनात्मनोऽपारमार्थिकीं काञ्चित् सत्ताम् उत्पत्तिञ्च निरूपयन्ति। दृष्टिसृष्टिवादे जीवेन अनुभूयमानाम् अवस्थाम् अतिरिच्य काऽप्यन्या अविद्या न सिध्यति। सृष्टिदृष्टिवादे तु जीवावस्थाव्यतिरेकेण सृष्टिकारणभूता काचिद् अविद्या सिध्यति। इयं समस्तजगदुपादानभूता जीवस्य बन्धे मोक्षे चानुवर्तमाना त्रिगुणात्मिका भावरूपा ब्रह्मशक्तिरेव मूलाविद्या मता बहूनामपि भाष्यव्याख्यातृणाम् आचार्याणाम्।

शङ्करभगवत्पादानन्तरकालीना प्राचीना बहवोऽप्याचार्याः यन्नास्ति तदपि प्रतीयेत इति पर्यगृह्णन्। असतोऽपि प्रतीयमानस्य पारमार्थिकसत्तातो भिन्नां काञ्चित् सत्ताञ्चाब्रुवन्। तस्य च सत्ताविशेषसमन्वितस्य व्यावहारिकस्य पदार्थस्य मिथ्यात्वम् परिभाष्य समानसत्ताविशेषयुक्तम् उपादानञ्च किमपि मूलाविद्याख्यं तत्त्वं सांख्यानाम् प्रधानमिव परिगृह्य ते वेदान्तव्याख्यानाय प्रावर्तन्त।

पञ्चपादिकायान्तु शारीरकमीमांसाभाष्ये परिभाषिताम् अविद्याम् अध्यासरूपां कार्यत्वेन स्वीकृत्य तदुपादानभूता काचन अनिर्वचनीया जडा चाविद्याशक्तिरुक्ता। सा च अव्याकृतप्रकृतिमायालयाग्रहणनिद्राक्षरादिशब्दशब्दिता जगत्प्रागवस्था ब्रह्मणो ब्रह्मभावावभासप्रतिबन्धिकेति च समुद्घोषितम्। अध्यासोपादानवादोऽयं न पञ्चपादिकाकारैः ऐदम्प्राथम्येन प्रोक्तः, अपि तु भगवत्पादकालादपि पूर्वं कैश्चिदौपनिषदैराश्रित एवासीदिति स्वमिभिः ब्रह्मसिद्धिकारवचनादनुमीयते[२]। पञ्चपादिकाकाराः स्वप्रकाशस्य ब्रह्मणः बन्धावस्थायां स्वरूपावभासम् प्रति प्रतिबन्धकरूपेण मूलाविद्याम् अङ्गीकुर्वन्ति– "प्रत्यगात्मनि तु चित्स्वभावत्वात् स्वयम् प्रकाशमाने ब्रह्मस्वरूपानवभासस्य अनन्यनिमित्तत्वात् तद्गतनिसर्गसिद्धाविद्याशक्तिप्रतिबन्धादेव तस्य अनवभासः। अतः सा प्रत्यक्चिति ब्रह्मस्वरूपावभासम् प्रतिबध्नाति, अहङ्काराद्यतद्रूपप्रतिभासनिमित्तञ्च भवति, सुषुप्त्यादौ चाहङ्कारादिविक्षेपसंस्कारमात्रशेषं स्थित्वा पुनरुद्भवति"[३] इति।

---

[२]द्रष्टव्या– वेदान्तप्रक्रियाप्रत्यभिज्ञा, पृ० २८२

[३]पञ्चपादिकायाः प्रथमवर्णके "मिथ्याज्ञाननिमित्तः" इति भाष्यांशस्य व्याख्यानावसरे।

अपि च पञ्चपादिकाकारैः आत्मानात्मनोर्मध्ये सहानवस्थानलक्षणो विरोधो नास्तीति वदद्भिः[४] ब्रह्मव्यतिरेकेण सत्त्वं किञ्चिद् अनात्मनोऽस्तीति सूचितम्। अनिर्वचनीयसत्तावत्या अविद्याशक्तेः मूलाविद्याऽपरशब्दवाच्यायाः ह्युपपादनमेवम् आचार्यैरिष्यते।

भामतीकारः ब्रह्मसिद्धिकार इव लयविक्षेपसंज्ञिके कार्यकारणरूपेऽनिर्वचनीये द्वेऽविद्येऽङ्गीकरोति। पञ्चपादिकोपात्ताविद्याशक्तिशब्दोऽपि भामत्यां क्वचित् प्रयुज्यते। पञ्चपादिकायां यथा तथाऽत्रापि प्रपञ्चस्य प्रकृतिरेव विद्याशक्तिशब्देन व्यपदिश्यते। परन्तु शङ्कास्पदञ्चास्ति किञ्चिदत्र ग्रन्थे। तदाहुः स्वामिनः– "तत्र किमग्रहणम् अध्यासलक्षणाविद्यानिमित्तभूतं कारणाविद्याशब्देन न व्यपदिश्यते, किं सापि ब्रह्मसिद्ध्युक्तप्रकारेण लयलक्षणाविद्यात्वेनाभ्युपगम्यते इत्येतत्तु न स्पष्टतया कुत्राप्युक्तम् भामत्याम्"[५] इति।

विमुक्तात्माचार्याणाम् इष्टसिद्धौ तु मूलाविद्यावादः सुस्पष्टमुपन्यस्तः। "अध्यासमेवाविद्यात्वेन स्वीकुर्वाणस्यापि यदा अविद्याशक्तिरवश्याङ्गीकार्या अभूत् तदा प्रपञ्चस्याविद्याशक्त्युपादानकत्वमेवालम् अद्वैतसिद्धान्तस्थापनायेति भामतीकारेणाप्यनुमतमेव भवति, तत्किं नवीनप्रक्रियान्तराह्वानविडम्बनया इति विमुक्तात्माचार्या मेनिरे। ...विमुक्तात्माचार्यास्तु न केवलम् भेदाभेदवादे, किन्तु मण्डनवाचस्पत्युभयादृताद्वैतप्रक्रियाभेदेऽपि अनुपपत्तिग्रासो दुर्निवारण इति स्वनिबद्धायाम् इष्टसिद्धौ मूलाविद्यावादोपबृंहणपूर्वकं दिदर्शयिषन्ति"[६] इति इष्टसिद्धिप्रक्रियापरीक्षाम् अवतारयन्ति स्वामिनः। अनिर्वचनीयाविद्यामायाकार्यं हि जगदभ्युपगतं विमुक्तात्माचार्यैः। जीवन्मुक्तावपि अविद्यालेशाभ्युपगमेन इष्टिसिद्धिकाराः विदेहमुक्तिमेव आत्यन्तिकीं सर्वथाऽविद्याविरहिताम् मन्यन्ते।

विवरणकारैस्तु पञ्चपादिकाप्रस्थानस्य उक्तानुक्तदुरुक्तचिन्तापुरस्सरं विस्तारः कृतः। इष्टसिद्ध्यादृतयुक्तीश्च विवरणकाराः संक्षिपन्ति। मिथ्याज्ञानोपादानकोऽध्यास इति विवरणाचार्याणाम् मतम्। अध्यासोपादानभूतेयमविद्या च माया च अभिन्ना। मायाविद्ययोर्भेदं निरस्य तयोरैक्यं द्रढयन्तो विवरणाचार्याः

---

[४]पञ्चपादिकायाः प्रथमवर्णके "विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायाम्" इति भाष्यांशस्य व्याख्यानप्रसङ्गे। पृ० ३५

[५]वेदान्तप्रक्रियाप्रत्यभिज्ञा, पृ० ३९९

[६]वेदान्तप्रक्रियाप्रत्यभिज्ञा, पृ० ४६४

प्रकृतिभूतयोर्मायाविद्ययोः तद्विकारयोश्च अध्यासमाययोः लक्षणाभेदात् एकत्वमेव मेनिरे। किञ्च जीवन्मुक्त्यवस्थायां कस्यापि अविद्या कार्त्स्न्येन न निवर्तते इत्यङ्गीकृत्य विवरणाचार्या ब्रह्मसिद्धाविव अविद्यासंस्कारावशेषपक्षम् इष्टसिद्धाविव अविद्यालेशावशेषपक्षञ्च समाश्रयन्ति। विवरणप्रस्थानपरीक्षाम् उपसंहरन्तः स्वामिनः प्राहुः– "दर्शनान्तरवादसरण्यनुसरणेन आत्मैकत्वविद्याप्रतिपत्त्यङ्गभूता अध्यारोपापवादप्रक्रिया श्रौती किञ्चिन्मलीमसेवाभूदिति तु निर्विवादम्। सर्वथापि तु शाङ्करप्रस्थानं नाम विवरणप्रस्थानमेव प्रायश इतीदानीन्तनानां वेदान्तिनाम् अभिनिवेशः। अत एव यत्र क्वचिदपि शाङ्करविवरणप्रस्थानयोर्वैलक्षण्यं लक्ष्यते चेत् तत्र सर्वत्र सर्वसाहसेनैकवाक्यताकरणे बद्धादराः सम्प्रतितना विद्वांसः। अभियुञ्जते च वैलक्षण्यस्थापनपरान् असम्प्रदायवित्त्वेनेति महदिदं साक्ष्यं विवरणमहिम्नीत्यस्मदभिप्रायः।"[७] इति। अपि चाहुः– "विवरणप्रकाशनात् परस्तात् अद्वैतविचारे प्रस्थानान्तरोपस्थापनलालसा वेदान्तिषु नाभूत्। अद्वैतिप्रक्रियाभेदानाम् प्रयत्नपूर्वकम् एकवाक्यतामङ्गीकृत्य द्वैतखण्डनेन जिज्ञासूनाम् अद्वैते रुच्युत्पादनमेव वरीय इति नूतनग्रन्थकारा मेनिरे।"[८] इति।

एवञ्च एभिराचार्यैरन्यैश्च बहुभिः भगवत्पादानन्तरमवतीर्णैः येयमविद्या अध्यासकारणभूता अङ्गीकृता सैव मूलाविद्येति विमुक्तात्माचार्यकृतपरिभाषया प्रसिद्धिं गता। मूलाविद्याङ्गीकारेण एतैरद्वैतिभिः साङ्ख्यानां जातिवादस्य गौडभगवत्पादानाम् अजातिवादस्य च मध्ये कश्चन मध्यममार्गः समुत्थापितः। एवम्प्रकारेण अद्वैतदर्शने विवर्तवादस्य समुत्पत्तिः, जगदुत्पत्तेः "अद्वैताविरोधेन" स्वीकृतिश्च जाता।

कया युक्त्या पञ्चपादिकाकारादयः भावरूपां काञ्चित् मूलाविद्यामङ्गीकुर्वन्तीत्यत्र विवरणाद्यवलम्बिनां स्पष्टताऽस्ति। तथा हि मूलाविद्या कथं सिद्ध्यतीत्यत्र पूर्वाचार्याणामिष्टाम् उपपत्तिम् प्रदर्शयन् श्रीमान् एस् एस् राघवाचार् आह–"अध्यासः यदा विश्लेष्यते तदा तत्त्वाग्रहणम् अतत्त्वविक्षेपणञ्चेत्यंशद्वयं तत्रान्तर्भूतमुपलभ्यते। ...अनयोरंशयोः तत्त्वाग्रहणम् आधारभूतम्, अन्यथाग्रहणञ्च आधेयस्थानीयम्। अग्रहणमिदम् तदुद्भाविन्याः

[७] वेदान्तप्रक्रियाप्रत्यभिज्ञा, पृ० ५९८

[८] वेदान्तप्रक्रियाप्रत्यभिज्ञा, पृ० ५९९

भावरूपायाः यस्याः कस्याश्चित् प्रतिबन्धकशक्तेरभावेऽसम्भवम् मन्यन्ते पञ्चपादिकाकाराः। सा शक्तिरेव मूलाविद्या प्रोच्यते।"[९] इति।

## २. स्वामिनां नयः– अध्यासो निरुपादानः

## २.१. सोपादानाध्यासानुपपत्तिः

एवम् अविद्यायाः सकारणत्वं यदुक्तम् प्राचीनाचार्यैः तदध्यासम् पुरस्कृत्यैव यदि स्यात् तर्हि अध्यारोप एव तैरयं कृतः स्यात्। ततश्चापवादेनाध्यासे निवृत्ते सह कार्येण अविद्याऽशेषतो निवर्तेत इत्यपि वक्तव्यम्। नैवं तैरुच्यते। मूलाविद्यावादिभिः जीवन्मुक्तस्यापि अविद्यालेशोऽनुवर्तते इति खलूच्यते, यत् परिहसन् श्रीमान् श्रीनिवासरावः आह– "शुद्धचितोऽविद्यायाश्च सहावस्थानरूपं शक्यकल्प्यम् अतिसूक्ष्मं द्वैतम् मूलाविद्यावादिभिर्बन्धावस्थायाम् अङ्गीकृतमिति यत् तद् अयुक्तमेव, किन्तु तद् द्वैतं तैर्जीवन्मुक्तावप्यङ्गीकृतमिति यत् तत्तु अयुक्ततरम्।"[१०]इति। अतोऽध्यासपरिधेर्बहिरेव विद्यमानं किमपि कारणमिदं तैरुद्भावितमिति स्थितम्। एवमुद्भाविते चाद्वैतविरोधो भवेदिति विशङ्क्य ते तत्परिहाराय भावाद्वैत-सत्ताद्वय-सत्तात्रयादिवादान् आश्रयन्ते स्म। एवञ्च अध्यारोपापवादप्रक्रियापरिधिः सङ्कुचिता जाता एतेषामाचार्याणां नये।

भाष्यकारभगवत्पादानां नये तु अध्यासपुरस्सरा एव लौकिकाः वैदिकाश्च सर्वे प्रमाणप्रमेयव्यवहाराः[११]। अध्यासस्य हेतून्नयनमप्यध्यासपरिधिं नोल्लङ्घते। अतोऽध्यासकारणं यदुद्भावितं तदप्यध्यारोपापवादप्रक्रियाक्षेत्रेऽन्तर्भवति। अध्यासे विनिवृत्ते अध्यारोपितम् अखिलमप्यशेषतो विनिवर्तते। अतो भाष्यकारभगवत्पादैराश्रितया अध्यारोपापवादप्रक्रियया तेषां विरोधो दृढ इत्ययम् प्रथमो दोषः। तथा हि, इयं या मूलाविद्या जीवाध्यासप्राग्भाविनी अध्यासबाधेन अबाध्यमाना चिदात्मना सह सततम् अनुवर्तमाना सती आत्माद्वैतसिद्धान्तविघटनासमर्थाऽपि अध्यासादिसकलानर्थसङ्घटनपटीयसी

---

[९]भामतीसमालोचनम्, तत्र च एस् एस् राघवाचार् महोदयेन विरचिता भूमिका (Forword)।

[१०]Vedanta Without Maya?, "Striking At The Very Root: Sacchidanandendra Saraswati's Refutation Of Saptavidhanupapatti", P. 253

[११]"तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासम् पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि"– अध्यासभाष्यम्। [ब्रह्मसूत्रशाङ्करभाष्यम् (मोतिलाल् बनारसीदास्) १।१।१, पृ० २०]

पञ्चपादिकादीनाम् प्रचलितसम्प्रदायानाम् अवलम्बिभिः समादृता, तस्याः कार्याणि आत्मानात्मनोरितरेतराध्यासस्थले आरोप्यन्ते इत्यङ्गीकृतम्। एवञ्च अध्यासे यदारोप्यं तत् अध्यासात् पूर्ववर्ति इति मतमागतम्। किन्तु कथमिदम् भाष्यवाक्यैः साङ्गत्यम् भजते। अध्यासभाष्ये अहम्प्रत्ययिनोऽशेषस्वप्रचारसाक्षिणि चिदात्मन्यध्यासः, चिदात्मनश्चान्तःकरणादिष्वध्यासो भवतीत्युक्तम्। तत्र भाष्यवाक्ये अनात्मनः तद्धर्माणाञ्च आत्मनि, आत्मनः तद्धर्माणाञ्च अनात्मन्यध्यासो भवतीति साक्षादेवानुक्त्वा अहम्प्रत्ययिनश्चिदात्मनि, चिदात्मनोऽन्तःकरणादिषु चाध्यासो भवतीत्येवोक्तम्। अन्तःकरणादिकमेव अनात्मा उपाधिः। चिदात्मा च आत्मा। तत्र आनात्मानोऽध्यासात् पूर्वमेवोपस्थिताश्चेत् अन्तःकरणादीनाम् उपाधीनाम् अनात्मनाम् आत्मन्यध्यास इत्येवमध्यासवर्णनम् आरम्भणीयमस्ति। प्रत्युत तत्र भगवत्पादा अहम्प्रत्ययिन आत्मन्यध्यासोक्त्या आरम्भं कृतवन्तः। कोऽयम् अहम्प्रत्ययीति चेत्तदुच्यते– जीव एवायम्[१२]। अन्तःकरणोपाधिविशिष्टं चैतन्यमेव, सोपाधिक आत्मैव अयम् अहम्प्रत्ययी। अस्य सोपाधिकस्यात्मनः शुद्धात्मनि, शुद्धात्मनश्च उपाधिषु अध्यास उक्तो भाष्यकारभगवत्पादैः। किमत्र कारणम्। उच्यते– अध्यासः कस्य भवतीति प्रश्ने सोपाधिकस्य आत्मन एवाध्यासो भवतीति सिद्ध्यति। यथा रजतस्य अध्यासो भवति। किन्तु रजतम् अध्यासानन्तरमेव सिद्ध्यति। अध्यासानन्तरं यत्सिद्धं तदेव अध्यासप्रक्रियायाम् आरोप्यत्वेन वयं गृह्णीमः– रजतं शुक्तौ अध्यस्यते इति व्यवहारः। एवमेव उपाधिमात्रस्य अध्यास इति वक्तव्ये सोपाधिकस्य आत्मनोऽध्यास इति व्यवहारः। किन्तु सोपाधिक आत्मा अध्यासानन्तरमेव सिद्ध्यति। तथापि स एव सोपाधिक आत्मा आत्मानात्मनोरितरेतराध्यासे आरोप्यकोटौ भाष्यकारभगवत्पादैर्गृहीतः। तस्माद् भगवत्पादैरध्यासपरिधेर्बहिः कार्यरूपं वा कारणरूपं वा किमप्यनृतं नैवोपदिष्टमवगम्यते, येन मूलाविद्यावादः पुष्येत।

किञ्च सुषुप्त्यवस्थायाम् मूलाविद्यायाः सत्त्वं यदुक्तम् पूर्वाचार्यप्रक्रियानुसारिभिः तत्र न किमपि कारणम् अवस्थापरीक्षणपरायणैः उद्दृश्यते। सुषुप्तौ अग्रहणात्मिका अवस्था या काचनानुभूयते सा भावरूपा मूलाविद्याऽस्तीति यदुच्यते तदपि न परिशुद्ध्यति। तथा ह्याह श्रीनिवासरावः– "सुषुप्तौ मिथ्याज्ञानाभावेऽपि ब्रह्मस्वरूपं

[१२] "जीवं कल्पयते पूर्वं ततो भावान् पृथग्विधान्।"– माण्डूक्यकारिका २.१६

न गृह्यत इत्येतत् तत्रावस्थायाम् अविद्याया अस्तित्वम् प्रति मूलाविद्यावादिभिः प्रबलमेकम् प्रमाणमभिमतम्। मिथ्याज्ञानस्य अत्यन्ताभावेऽपि ज्ञानं नोदेति चेत् तत्र कारणं सुषुप्तावभिव्याप्तस्य भावरूपस्य कस्यचिदज्ञानस्य सत्त्वमेव स्यात्। अस्य पक्षस्य निरासोऽपि विस्तरेण क्रियते सच्चिदानन्देन्द्रसरस्वतीस्वामिभिः। सुषुप्तौ ज्ञानानुदयम् प्रति ज्ञानोपदेशाभाव एव कारणं वदन्ति स्वामिनः। केवलं ज्ञानोपदेशेनैव तस्यामवस्थायां ज्ञानाभावो निवर्तेत इति तेषामभिप्रायः।"[१३] इति।

न च सुषुप्त्यवस्था स्वप्नाद्यवस्थानां कारणम् भवति। तत्त्वाग्रहणं स्वप्नजागरितावस्थयोरपि वर्तते। तच्च तत्त्वाग्रहणं न किमपि वस्तुसत् येन खलु तत् परिणमेत। तस्मात् सुषुप्तावनुभूयमानस्य कस्यचित् भावरूपस्य अग्रहणात्मकस्याज्ञानस्य परिणामेन जाताः स्वप्नजाग्रदवस्थाकाः पदार्थाः इति तु नास्ति। साक्षिस्वरूपभिन्नं विषयेन्द्रियजातम् अखिलमपि मन एव। मन एव जगत्, मन एव स्वप्नो जाग्रच्च। सुषुप्त्यवस्था तु न मनः, ग्रहीतृग्रहणग्राह्यानां तदा अननुभवात्। ननु स्वप्नजागरितावस्थयोः यन्मनः तदेव सूक्ष्मरूपेण स्वकारणात्मना वा सुषुप्तावप्यासीद् इत्यङ्गीकार्यमिति चेद् अवश्यं तन्न। अर्थापत्तिप्रमाणेन खल्वेवं तर्क्यते, अनुभवस्तु ततोऽपि दृढतरम् प्रमाणम्। अर्थापत्त्या कल्पितं साधु, सर्वास्वप्यवस्थासु निर्बाधं व्यवस्थितेन सार्वत्रिकपूर्णानुभवेन सिद्धन्तु असाधु इति किमिदम् परीक्षणपटुत्वम्। सार्वत्रिकः पूर्णश्च योऽनुभवः अवस्थात्रयपरीक्षाश्रयः तेन इदमेव सिद्धम्– सुषुप्तौ मनो नास्ति, स्वप्नजागरितयोः मनः प्रतीयत इति। अस्य सार्वत्रिकपूर्णानुभवसिद्धस्य सिद्धान्तस्य अप्रामाण्यम्, अर्थापत्त्या कल्पितस्यार्थस्य प्रामाण्यञ्चेति तु परीक्षकैरङ्गीकर्तुमयोग्यं वचः।

आत्मानात्मनोर्मध्ये सहानवस्थानलक्षणं विरोधं निरस्य परस्परानात्मतालक्षणविरोधमेव स्वीकुर्वद्भिः पञ्चपादिकाकारैः भाष्यतात्पर्यम् अन्यथाकृतमिति स्वामिनो मन्यन्ते। तथा हि पञ्चपादिकायाम् आत्मानात्मनोर्मध्ये द्विविधो विरोधः सम्भावितः। तत्र प्रथमो विरोधः सहानवस्थानलक्षणः। द्वितीयस्तु परस्परानात्मतालक्षणः। द्विविधयोरनयोर्विरोधयोः द्वितीयमङ्गीकुर्वन्ति पञ्चपादिकाकारा आचार्याः।[१४] एवञ्च प्रथमस्य विरोधस्य अनभीष्टत्वं हि सूचितम्।

---

[१३] Vedanta Without Maya?, "Striking At The Very Root: Sacchidanandendra Saraswati's Refutation Of Saptavidhanupapatti" , P. 254

[१४] पञ्चपादिका (महेशानुसन्धानसंस्थानम्), पृ० ३४-३६

आत्मानात्मनोर्मध्ये सहानवस्थानेऽनभीष्टे सहावस्थानमेव अभीष्टमिति पर्यवस्यति। किन्तु आत्मानात्मनोः तमःप्रकाशवत् सदसतोः विरुद्धस्वभावत्वे शास्त्रदृष्ट्या सिद्धान्तिते तत्र पुनः सहावस्थानन्तु तयोः सम्भवतीति नैव युक्तं वक्तुमिति स्वामिनामाशयोऽवगम्यते। केवलम् आत्मन एव सत्त्वमिति दृष्ट्या हि शास्त्रीयया आत्मानात्मनोर्विरोधो भाष्यकारभगवत्पादैः सिद्धान्तितः, तत्र तयोः सहावस्थानं वदता पञ्चपादिकाकृता द्वयोरपि तयोः सत्त्वमङ्गीकृतम्। अनात्मा तु नास्त्येव, कथं तस्य आत्मना सहावस्थानमुच्यते। ननु अनात्मा नाभावरूपः प्रतीयमानत्वात् इति चेन्न, अभावस्वरूपोऽपि प्रतीयते यथा शुक्तिरजतं यथा वा रज्जुसर्पो यथा वा द्वितीयचन्द्रः।

ननु अत्यन्तासतः अयं न दृष्टान्तः अपि तु वन्ध्यापुत्रो वा शशशृङ्गो वा तस्य दृष्टान्तो वाच्यः, तौ च न प्रतीयेते इति चेन्न, बुद्धौ प्रतीयत एव अन्यथा त्वयाऽत्र न निदर्शयेत। एवञ्च अत्यन्तमसत् अप्रतीयमानञ्चेत्यत्र नास्ति किमपि निदर्शनम्। तस्मात् शुक्तिरजतादिकं शशशृङ्गादिकञ्चेति अविद्यमानपदार्थेषु कोटिद्वयं यत्सम्भावितं कैश्चित् वेदान्तिभिः तन्न सङ्गच्छते।

ननु आत्मानात्मनोः तमःप्रकाशवदिति दृष्टान्तो भाष्यकारभगवत्पादैः प्रदर्शितः, तमश्च नाभावरूपमिति पूर्वतन्त्रीयैराचार्यैः सिद्धान्तितम् इति चेन्न, तमः अभावरूपमित्येव भाष्यप्रक्रियामाश्रितानां सिद्धान्तः। पूर्वतन्त्रीयैरुक्तं सर्वं तथैव गलादधःकर्तव्यमिति तु नास्ति राजाज्ञा। अन्यथा कर्मणैव मुक्तिरित्यपि गृहाण। शुक्तावध्यस्तं रजतम् असदेव, न तु त्रिकालेऽप्यस्ति तत्, यस्तु भावस्तस्य प्रतीयते सोऽधिष्ठानगत एवेत्ययं हि भाष्येषु साक्षाच्छ्रुतः सिद्धान्तः। तद्यथा– "न हि रज्ज्वाम् भ्रान्तिबुद्ध्या कल्पितः सर्पो विद्यमानः सन् विवेकतो निवृत्तः"[१५], "न हि मनोविकल्पनाया रज्जुसर्पलक्षणाया रज्ज्वाम् प्रलय उत्पत्तिर्वा"[१६], "असदेव तर्हि सर्वं यद्गृह्यते रज्जुरिव सर्पाद्याकारेण। न, सत एव द्वैतभेदेन अन्यथागृह्यमाणत्वात् न असत्त्वं कस्यचित् क्वचिदिति ब्रूमः। यथा सतोऽन्यद्वस्त्वन्तरम् परिकल्प्य पुनस्तस्यैव प्रागुत्पत्तेः प्रध्वंसाच्चोर्ध्वम् असत्त्वम् ब्रुवते तार्किकाः, न तथा अस्माभिः कदाचित् क्वचिदपि सतोऽन्यदभिधानम् अभिधेयं वा वस्तु परिकल्प्यते। सदेव तु

[१५] माण्डूक्यकारिकाभाष्यम् १।१७; श्रीशङ्करग्रन्थावलिः, भागः ८, पृ० ४२०

[१६] माण्डूक्यकारिकाभाष्यम् २।३२; श्रीशङ्करग्रन्थावलिः, भागः ८, पृ० ४४५

सर्वमभिधानमभिधीयते च यदन्यबुद्ध्या, यथा रज्जुरेव सर्पबुद्ध्या सर्प इत्यभिधीयते"[१७] इति।

एवम् पूर्वाचार्यप्रक्रियानुसारिणाम् अध्यासोपादानत्वेनाभिमतायाः मूलाविद्यायाः स्वीकारे बहुविधदोषकालुष्यापातमुद्भावयन्तोऽनुरुन्धते स्वामिनः– "अध्यासस्योपादानत्वेन अभिमतम् अज्ञानं किम् आध्यासिकम् उत नेति वक्तव्यम्। तत्र आध्यासिकत्वे कथम् पूर्वसिद्धस्याध्यासस्य स्वकल्पिताज्ञानोपादानकत्वं सम्भवि। अनाध्यासिकत्वे त्वात्मवत् तस्यापि सत्यत्वमेव प्राप्नोतीत्यनिष्टप्रसङ्गः"[१८] इति, "मिथ्याभूतम् अज्ञानम् अध्यासोपादानकारणमिति कालकर्मादिलक्षणतन्निमित्तरूपेणापि परिणमत इति च ब्रुवता वक्तव्यम्, किं कार्यकारणभावो नाध्यासिकः, परिणामप्रक्रिया वा नाध्यासिकीति। यद्युभयत्राप्याध्यासिकत्वाभ्युपगमः, ततोऽध्यासकृतस्य कथम् अध्यासहेतुत्वम्। अथानभ्युपगमः, तर्हि संसारकारणमज्ञानम् अध्यासादिरूपेण सदैव परिणंस्यते कस्तस्य निवारकः स्यात्। न ह्यनध्यस्तं ज्ञानेन शक्यनिवर्तनमिति वृथैव ज्ञानोपदेश इति पुनरप्यनिष्टप्रसङ्ग एव।"[१९] इति च।

## २.२. अध्यासस्य नास्त्युपादानम्।

अध्यासस्य यदिदम् भावरूपम् अज्ञानम् उपादानमुच्यते तद्वस्तुतोऽध्यासेन समुत्पन्ना भ्रान्तिरेवेति स्वामिनः।

अध्यासो निरुपादान इति शुद्धशाङ्करनये स्थिते केचन मूलाविद्यासमर्थकाः विद्वांसः स्वामिनामेवमुपपादने हेतुमन्विषन्तो विभ्राम्यन्ति। पूर्वपूर्वाध्यासेनैव उत्तरोत्तराध्यासाः सिध्यन्तीति मत्वा स्वामिनो निरुपादानम् अध्यासं वदन्तीति केचिदाहुः। मूलाविद्यां तिरस्कुर्वतः वेदान्तव्याख्यातॄन् दूरतः कटाक्षयन् श्रीमान् राजेश्वरशास्त्री द्राविडः आह– "अथ कश्चनाक्षेप उन्नीयेत। तथा हि, देहेन्द्रियादीनाम् अध्यासः निरन्तरप्रवाहरूपो भवतीत्यतः पूर्वपूर्वाध्यास उत्तरोत्तराध्यासम् प्रति हेतुर्भवति। एवं सति अध्यासकारणसिद्ध्यर्थम् मूलाविद्याङ्गीकारोऽनावश्यकः"[२०] इति। अत्र शास्त्रिणा स्वामिनाम् मतम् पूर्वपक्षीकृतमिति खलु केचन मन्यन्ते। नैतत् साधु। अध्यासे कार्यकारणभावं निराकुर्वन्तः स्वामिनः पूर्वपूर्वाध्यासा

---

[१७]छान्दोग्योपनिषद्भाष्यम् ६।२।३; श्रीशङ्करग्रन्थावलिः, भागः ९, पृ० ३४८

[१८]सुगमा, पृ० १४

[१९]सुगमा, पृ० १५

[२०]Preceptors of Advaita, Amalananda (Article No.24), P.162

उत्तरोत्तराध्यासम् प्रति कारणम् भवन्तीति न स्वीकुर्वन्ति। प्रत्यध्यासम् अविवेको निमित्तम् , न त्वेकम् अध्यासम् प्रति अपरोऽध्यासो निमित्तम्। अत एव स्वामिभिरध्यासभाष्यव्याख्यानावसरे 'पूर्वबुद्ध्यध्यासात् संस्काराद्यध्यासः, ततस्तादृगुत्तरबुद्ध्यध्यास इति प्रवाहात्मना प्रवाह्युपादानजाड्यात्मना वा अनादित्वम्' इति मतम् पूर्वपक्षत्वेन उल्लिख्यते[२१]। भाष्यकारभगवत्पादैः अध्यासभाष्ये प्रयुक्तानि अनाद्यनन्तनैसर्गिकविशेषणानि त्रीणि समाश्रित्य प्रवृत्तमिदम् मतम् 'एकदेशिनां व्याख्यानम्' इति निर्दिष्टं स्वामिभिः। एकदेशिमतं तैरित्थं निराकृतम्– "तदेतत्सर्वं व्याख्यानजालं कार्यकारणाध्यासद्वयनिराकरणेन अनिर्वचनीयवस्तूत्पत्तिनिराकरणेन च निराकृतप्रायमित्युपेक्ष्यते"[२२] इति।

## २.३. प्रक्रियोक्तस्य तत्परिधेरन्यत्रानवस्थानम्

प्रक्रियया कल्पितस्य तत्परिधेर्बहिरवस्थानासम्भव इति कमपि न्यायं स्वामिनां सोपादानाध्यासवादप्रत्याख्यानप्रणाल्याम् आद्यन्तमुपलभामहे। तथा हि सर्वानुभवसिद्धयोः आत्मतद्विषयकमिथ्याज्ञानयोः सर्वव्यवहारेष्वनुस्यूतत्वमस्ति। आत्मस्वरूपविचाररूपस्य वेदान्तशास्त्रस्यापि आत्मतद्विषयकमिथ्याज्ञानपूर्वकत्वम् अवितथम्। तस्मात् वेदान्तशास्त्रेण यदुच्यते तत्रापि मिथ्याज्ञानानुस्यूतता न व्यभिचरति। नन्वेवं सति वेदान्तशास्त्रं किमर्थम् उपासनीयमिति चेदुच्यते– मिथ्याज्ञानपूर्वकत्वेऽपि मिथ्याज्ञाननिवर्तकत्वादुपासनीयं तत्। तद्यथा शोधकर्म[२३]। क्वचिदर्थे काञ्चित् समस्याम्[२४] आश्रित्य हि शोधः क्रियते। समस्यायाः समाधानमुद्दिश्य काचन शोधप्रक्रिया[२५] प्रणीयते, तद्वारा च शोधप्रवृत्तिरारभ्यते। शोधनस्य प्रक्रिया समस्यानुगुणैव भवति। अत एवेयं समस्या शोधप्रवृत्तौ आन्तम् अनुवर्तते। यदा समस्यायाः समाधानमुपलभ्यते तदा शोधः समाप्तिमेति। समस्या हि शोधस्य मूलम्। समाधानोन्नयनेन तस्यां निवृत्तायां तामाश्रित्य विरचिता शोधप्रक्रियाऽपि साङ्गोपाङ्गा विनिवर्तते, तस्याः कृतकृत्यत्वात्। शोधप्रक्रियया कल्पितानां पदार्थानाञ्च आ समाधानोपलब्धेरवस्थितिः।

---

[२१]सुगमा, पृ० ९७

[२२]सुगमा, पृ० ९८

[२३]शोधकर्म– Research.

[२४]शोधसमस्या– Research Problem.

[२५]शोधप्रक्रिया– Research Methodology.

समस्याविषयपरिधेर्बहिः शोधप्रक्रियाज्ञानाम् आनर्थक्यमेव भवति। एवमेव आत्मविषयकमिथ्याज्ञानमाश्रित्य प्रवृत्तेन वेदान्तशास्त्रेण तस्य मिथ्याज्ञानस्य निवारणमुद्दिश्य प्रणीतायां हेयमिथ्याज्ञानानुस्यूतायाम् अध्यारोपापवादप्रक्रियायां व्यक्ताव्यक्तव्यष्टिसमष्टिमायाशक्त्यादिपदार्थविषयेऽपि ज्ञेयम्। यस्माद्धि वेदान्तशास्त्रेण समाश्रिता प्रक्रिया आत्मविषयकमिथ्याज्ञानपरिधिं नातिवर्तते तस्मादेव वेदान्तप्रक्रियायाम् आत्मतत्त्वनिर्धारणाय कल्पितस्य सर्वस्यापि पदार्थस्य तत्त्ववेदनेनैव उपक्षयः भवति, प्रक्रियया कल्पित एव हि सः, न तस्य मिथ्याज्ञानपरिधेर्बहिः सत्त्वमस्ति। शास्त्रप्रक्रियागतं सर्वं मिथ्याज्ञानेन कल्पितमेव, प्रक्रियया विचारान्ते सम्यग्ज्ञानोत्पत्तौ च तदखिलम् बाध्यते। तस्य तु तस्मात् मिथ्याज्ञानादपि पूर्वं सिद्धिरस्तीति पक्षो न युक्तः। प्रक्रियोक्तस्य व्यावहारिकप्रपञ्चेन तुल्ययोगक्षेमः कदापि नास्ति, आत्मविषयकमिथ्याज्ञानस्य अनायाससिद्धम् फलं हि व्यवहारः, स च सर्वविधप्रमाणप्रमेयजातम् अभिव्याप्नोति। तद्व्यवहारव्याप्यो हि शास्त्रीयव्यवहारः। शास्त्रञ्च अभ्युदयनिःश्रेयसोभयविधफलकमिति शास्त्रीयव्यवहारव्याप्यो वेदान्तशास्त्रव्यवहारः। तत्र मिथ्याज्ञानसमुच्छेदाय अध्यारोपापवादस्वरूपकाः प्रक्रियाभेदाः कल्पिताः। कथं हि ताः कल्पनाः वेदान्तशास्त्रीयव्यवहारादन्यत्र व्यवहारे सार्थकाः भवेयुः। प्रक्रियार्थं कल्पिता ह्यविद्या च माया चेत्यर्थः। प्रक्रियार्थं कल्पितस्य वास्तविकता नास्ति। तस्मात् अविद्या वा माया वा जगत्कारणभूता वस्तुतो नास्ति, कल्पनैकविषयत्वात्।

## २.४. अनेकसत्तावादनिरासः

ननु यदि प्रक्रियया कल्पिता अविद्या जगतोऽपि कल्पितत्वात् जगत्समानयोगक्षेमम् भजेत तर्हि यावद्ब्रह्मविद्यं जगदिव अविद्याप्यस्तीत्यापतति। व्यावहारिकसत्यत्वम् अविद्याया इति यावत्। एवञ्च विवरणादिभिरुक्तमेव आगतम्। तैः भावरूपत्वोक्त्या ब्रह्मसमानभावरूपत्वं नेष्टम् अपि तु व्यावहारिकभावरूपत्वमेवेष्टम्। इमां शङ्कान्तु जगतो व्यावहारिकसत्तामेव निराकृत्य समादधते स्वामिनः।

तथा हि व्यावहारिकी सत्तेति सत्तैव नास्ति। एकैव सत्ता, सा च ब्रह्म। जगत् वस्तुतो नास्त्येव। ब्रह्मैव अस्ति। तद्ब्रह्म बोधयितुं कृतायाम् प्रक्रियायाम् अविद्या माया जगदित्यादिकं सर्वं कल्पितम्। नैतत् सर्वं वस्तुतोऽस्ति। चिदात्मन्यध्यस्ता अनात्मानो मूलाविद्यया उत्पद्यन्ते इत्येवं स्थिते तत्त्वद्वयं ह्यद्वैतवेदान्तिभिरनवधानाद् अङ्गीकृतमित्यारोपं निवारयितुं

हि विवरणाचार्यादिभिर्मूलाविद्याया ब्रह्मसत्ताभिन्ना सत्ता काचिदभ्युपगम्यते। एवं हि सत्ताद्वयवादः समुत्पन्नः। भिन्नसत्ताकानि वस्तूनि सम्भवन्तीति लौकिकदृष्टान्तैरुपपादयितुं प्रातिभासिकसत्तायामप्यङ्गीकृतायां सत्तात्रयवादः समुत्पन्नः। इममनेकसत्तावादम् भाष्यविरुद्धमाहुः स्वामिनः। तथा हि भाष्याकारभगवत्पादा अध्यस्तस्य वस्तुतोऽसत्त्वमेव मेनिरे। तद्यथा सूत्रभाष्ये– "शुक्तिकां रजतम् प्रत्येतीत्यत्र शुक्तिवचन एव शुक्तिकाशब्दः। रजतशब्दस्तु रजतप्रतीतिलक्षणार्थः। प्रत्येत्येव हि केवलं रजतमिति, न तु तत्र रजतमस्ति।"[२६] इति सुस्पष्टम् अध्यस्तस्याभावः प्रोक्तः। एवञ्च प्रपञ्चस्य व्यावहारिकसत्तानिराकरणपूर्वकं प्रक्रियान्तर्भूताविद्यादि-पदार्थानामपि व्यावहारिकसत्ता निषिद्धा स्वामिभिः।

ननु तर्हि कथम् प्रक्रियया कल्पितानाम् अविद्यादिपदार्थानां जगत्समानयोगक्षेमता ततश्च व्यावहारिकसत्ता चाद्रियते वेदान्ताध्येतृभिरिति चेद् अध्यासेनेत्युच्यते। अतिमूढः पुमान् शास्त्रविहीनः संसारमेव हि सत्यम् मन्यते। अज्ञोऽपि अधीतशास्त्रस्तु शास्त्रात् श्रुतम् ब्रह्मतत्त्वं स्वरूपतोऽविदितमपि श्रद्धया परमार्थसत्यमिति, संसारं ततोऽवरं किमप्यन्यत् सत्यमिति च मनुते। शास्त्रन्तु ब्रह्मैव केवलं सत्यमिति बोधयति, न कदापि जगतो व्यावहारिकं किमपि सत्यत्वमपि ब्रूते, किन्तु स श्रोता तत् कल्पयति स्वयमेव। एवं श्रोत्रा ब्रह्म पारमार्थिकं सत्यम्, जगच्च व्यावहारिकं सत्यमिति विभक्तम्। तदनन्तरञ्च श्रुत्या केवलसत्यबोधनाय कृतया प्रक्रियया जगत्कारणत्वेन यद्यदध्यारोपितं तस्य सर्वस्यापि स्वेनाध्यस्तस्य जगतो यथा किमपि सत्यत्वं स्वीकृतं तथैव सत्यत्वं स्वीकरोति। एवं हि अविद्यामायादीनां भावरूपत्वमागतं विवरणभामत्यादिप्रस्थानेषु।

स्वामिनस्तु वेदान्तप्रक्रियाकल्पितस्य वस्तुनः प्रक्रियापरिधेरन्यत्र समन्वयं न मन्यन्ते। अत एव तेषाम् मते व्यावहारिकाकाशादिभिः पदार्थैः श्रुत्युक्ताकाशसृष्टिप्रक्रिया न सम्बध्यते, श्रुत्युक्तसृष्टिप्रक्रियायाः व्यावहारिक-पदार्थानाम् उत्पत्तिनिरूपणे तात्पर्याभावात्। तात्पर्यन्तु अजातौ एव।

## ३. उपसंहारः

सच्चिदानन्देन्द्रसरस्वतीस्वामिनः अध्यासस्योपादानं निरस्यन्तोऽपि निमित्तन्तूपस्थापयन्ति। ननु निमित्तमपि कारणविशेष एवेति अध्यासात्

---

[२६] ब्रह्मसूत्रशाङ्करभाष्यम् (मोतीला-बनारसीदास्) ४।१।५, पृ० ८३७

पूर्ववर्ति किमपि कारणं स्वामिभिरप्यङ्गीकृतमिति चेद् अन्यथाग्रहणस्य अविवेकनिमित्तत्वाङ्गीकारः तथा लोकेऽनुभवादेव, उपादानानङ्गीकारस्तु अन्यथाप्रतीतिस्थले कुत्राप्युपादानस्याननुभवादेवेति चाहुः। एवम् अध्यासस्य उपादानं निरस्य निमित्तमात्रमुद्भावयतां स्वामिनाम् मते प्रमाणस्वरूपमीमांसा[२७] प्रसिद्धवेदान्तनये यथा तथा न भवति। वस्तुस्वरूपस्य ग्रहणं वा वस्तुनोऽवस्तुरूपेण ग्रहणं वा वस्त्ववस्तुनोर्विषये संशयो वा अज्ञानमथवाऽविद्येत्युच्यते। एवञ्च अग्रहणात्मिकाऽविद्या ग्रहणाभावनिमित्तिका, अध्याससंशयरूपेऽविद्ये तु विवेकाभावनिमित्तिके। ततश्च अग्रहणात्मकाविद्यास्थले ग्रहणमेव विद्या स्यात्, अध्याससंशयस्थले तु विवेक एव विद्या। अनया पद्धत्या प्रमाणस्वरूपमीमांसा शुद्धशाङ्करनये विस्तारणीया वर्तते। न सा विवरणादिप्रस्थानगतैः वेदान्तपरिभाषादिग्रन्थे यथा तथा सुव्यवस्थापिता शुद्धशाङ्करप्रस्थानानुसारिभिरेतावता। अत एवात्र अग्रिमगवेषणसम्भावनाम् उत्पश्यामः॥

-★-

[२७]प्रमाणस्वरूपमीमांसा– Epistemology.

# अद्वैतविशिष्टाद्वैतनययोः साद्दश्यवैसाद्दश्यात्मकमध्ययनम्

त्रिदिवरायमण्डलः*

## उपोद्घातः

मायामयेऽस्मिन् प्रपञ्चे कौक्षेयकवह्निदाहमलमूत्रकृमिदंशनादिभ्यः कृत्स्नदुःखेभ्यः मोक्तुकामाः सर्वे वयं सर्वदैव साक्षात्कृतमाधवाः भवितुं प्रयत्नपराः। तत्रापि कश्चिदेव ईश्वरप्रसादात् परमात्मतत्त्वसाक्षात्कारवान् भवति। अत एव उच्यते श्रीमद्भगवद्गीतायाम्–

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥ [श्रीमद्भगवद्गीता– ७/६]

तदेव परमात्मतत्त्वसाक्षाकारोपायः तत्साधनस्वरूपञ्च "नान्यः पन्था विद्यतेऽयनाय" [श्वेताश्वतरोपनिषत्– ३/८], "नास्त्यकृतः कृतेन" [मुण्डकोपनिषत्– १/२/१२], "आत्मना विद्यते वीर्यं विद्यया विन्दतेऽमृतम्" [केनोपनिषत्– २/४] चेत्यादिवाक्यैः दर्शयन्ती संशयराक्षसनाशमहास्त्रम् उपनिषत्परमप्रमाणभूतत्वेन सर्वैरास्तिकदार्शनिकैरङ्गीक्रियते। किन्तु परब्रह्म-स्वरूपस्य तत्साक्षात्कारोपायादीनां च विषये विद्यन्ते तावत्पण्डितानां विप्रतिपत्तयः। "अहं ब्रह्मास्मि" [बृहदारण्यकोपनिषत्– १/४/१०], "तत्त्वमसि" [छान्दोग्योपनिषत्– ६/८/७], "अयमात्मा ब्रह्म" [बृहदारण्यकोपनिषत्– २/५/१९], "सर्वं खल्विदं ब्रह्म" [छान्दोग्योपनिषत्– ३/१४/१] चेत्यादिश्रुतिभ्योऽद्वितीयं ब्रह्मैव सत्यमिति भगवच्छङ्कराचार्याः स्वीकुर्वन्ति। "भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म मे मतम्"[१] इति श्रुतिभ्यः प्रकृतिपुरुषेश्वराश्चेति त्रितयं सत्यमिति भगवद्रामानुजाचार्याः अङ्गीकुर्वन्ति। एवं बहूनां मतानां विद्यमानत्वात्तत्रापि भारतवर्षस्य सनातनसंस्कृतौ भगवच्छङ्कररामानुजमतयोरतीवसुख्यातत्वात् मोक्षस्तत्प्राप्त्युपायस्वरूपविषये तयोर्मतसाद्दश्यवैसाद्दश्ये विमृश्येते।

---

*शोधच्छात्रः, संस्कृतविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य

[१]श्वेताश्वतरोपनिषत्– १/१२

## विमर्शः

अद्वैतवेदान्ते तावन्निर्गुणं निराकारम् अशेषोपाधिरहितं सच्चिदानन्दस्वरूपं जगदभिन्ननिमित्तोपादानकारणं वाङ्मनसोरगोचरमेकम् अद्वितीयं ब्रह्मैव सत्यम्। ब्रह्मणो निर्गुणत्वे सच्चिदानन्दस्वरूपत्वे जगत्कारणत्वे अवाङ्मनोगोचरत्वे "अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययम्" [श्रीमद्भगवद्गीता– १३/३१], "अशब्दमस्पर्शमरूपमव्ययम्" [कठोपनिषत्– १/३/१५], "साक्षी चेता केवलो निर्गुणश्च" [श्वेताश्वतरोपनिषत्– ६/११], "सत्यं ज्ञानम् अनन्तं बह्म" [तैत्तिरीयोपनिषत्– २/१/१], "जन्माद्यस्य यतः" [ब्रह्मसूत्रम्- १/१/२], "न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः" [केनोपनिषत्– १/३] चेत्याद्याः श्रुतयः स्मृतयः न्यायाश्च मानमिति भगवच्छाङ्कराद्वैतिनो भणन्ति। अल्पमेधसां कृते उपासनासौकर्याय परमार्थतो निर्गुणब्रह्मणोऽपि सुगणत्वकल्पना विधीयते।

किन्तु चित्स्वरूपजीव अचित्स्वरूपप्रकृतिः चिदचिद्विशिष्टश्च परमात्मा चेति त्रितयं सत्यभूतमिति विशिष्टाद्वैतिनो वदन्ति। प्रकतिपुरुषेश्वराणां सत्यत्वे "भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म मे मतम्" [श्वेताश्वतरोपनिषत्– १/१२] इति श्रुतिः प्रमाणं भजते। परमार्थतः चिदचिद्विशिष्टं ब्रह्म सगुणं सविशेषञ्च भवति। अशेषकल्याणगुणगणविशिष्टपरमात्मनः सगुणत्वादौ "तद्ध तद्वनं नाम तद्वनमित्युपासितव्यम्" [केनोपनिषत्– ४/६], "अन्नं ब्रह्मेति व्यजानात्" [तैत्तिरीयोपनिषत्– ३/२/१], "सत्यं ज्ञानम् अनन्तं ब्रह्म" [तैत्तिरीयोपनिषत्– २/१/१] चेत्याद्याः श्रुतयः प्रमाणानि। किन्तु ब्रह्मणः जगदभिन्ननिमित्तोपादानकारणत्वे अद्वैतविशिष्टाद्वैतिनोः मतसादृश्यं भजते।

परमार्थतो ब्रह्मणो सर्वाभिन्नत्वं शाङ्कराद्वैतिभिरङ्गीक्रियते। तत्र "सर्वं खल्विदं ब्रह्म" [छान्दोग्योपनिषत्– ३/१४/१], "ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण " [मुण्डकोपनिषत्– २/२/१२] चेत्याद्याः श्रुतयः मानम्।

किन्तु परमार्थतो ब्रह्मणो भिन्नाः जीवाः, ते च बहवो भवन्तीति विशिष्टाद्वैतिनः कथयन्ति। अस्मिन् परिदृश्यमाने देहे य आत्मा स ब्रह्मणः चिदंशः देहश्च ब्रह्मणोऽचिदंशः। एताभ्यां चिदचिद्भ्यां विशिष्टः परमात्मेति रामानुजानुसारिभिरुद्यते। जीवब्रह्मणोरंशांशिभावत्वे परस्परभिन्नत्वे च "यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः" [मुण्डकोपनिषत्– २/१/१], "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते" [मुण्डकोपनिषत्– ३/१/१] चेत्याद्याः श्रुतयः

मानम्। "न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः। न चैव न भविष्यामः सर्वे वयमतः परम्॥" [२/१२] इत्यस्मिन् श्रीमद्भगवद्गीतोक्तवचने "वयम्" इति बहुवचनप्रयोगात् परमार्थतः जीवा अनेके भवन्ति। एतदेव श्रीमद्भगवद्गीताभाष्ये भगवद्रामानुजाचार्यैरुच्यते यत् "यथाहं सर्वेश्वरः परमात्मा नित्य इति नात्र संशयः, तथैव भवन्तः क्षेत्रज्ञा आत्मन अपि नित्या एवेति मन्तव्यम्। एवं भगवतः सर्वेश्वरादात्मनां परस्परं भेदः पारमार्थिक इति भगवता एवोक्तमिति प्रतीयते। अज्ञानमोहितं प्रति तन्निवृत्तये पारमार्थिकनित्यत्वोपदेशसमये 'अहं', 'त्वम्', 'इमे', 'सर्वे', 'वयम्' चेति व्यपदेशात्"[२] इति। जीवात्मभेदस्य नैसर्गिकत्वे भगवद्रामानुजाचार्याः "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्"[३] इतीमां श्रुतिमुद्धरन्ति।

शाङ्कराद्वैते जीवाभिन्नं ब्रह्म। भगवच्छङ्कराचार्यैः विवेकचूडामणौ गद्यते यत्–

शैलूषो वेषसद्भावाभावयोश्च यथा पुमान्।
तथैव ब्रह्मविच्छ्रेष्ठः सदा ब्रह्मैव नापरः॥ [विवेकचूडामणिः– ५५६]

किन्तु विशिष्टाद्वैतवेदान्ते परमार्थतो ब्रह्मभिन्नाः तदंशास्तदधीनाः स्वयंप्रकाशस्वरूपाः जीवाः बद्धमुक्तनित्यभेदैः त्रिविधाः भवन्ति। जगज्जीवौ ब्रह्मणः शरीरभूतौ। तौ अपृथग्भूतसम्बन्धेन ब्रह्मण्येवाश्रितौ स्तः। अविद्ययोत्थितकर्मपाशैः बद्धाः जीवाः परमात्मसायुज्यं प्राप्य मुक्ताः सन्तः प्रकृतिसम्बन्धकर्मबन्धरहिताः नित्याः भवन्ति।

शाङ्कराद्वैते तावद्विविधा मुक्तिः। सद्योमुक्तिः क्रममुक्तिश्चेति। सद्योमुक्तिर्नाम निर्गुणब्रह्मविद्यानुशीलनवतां परमात्मैक्यत्वापरोक्षज्ञानोदयसमकाले सच्चिदानन्दात्मनावस्थितिरेव। यद्यपि शाङ्कराद्वैते जीवन्मुक्तिः विदेहमुक्तिश्च अङ्गीक्रियते तथापि जीवन्मुक्तेः विदेहमुक्तेश्च सद्योमुक्तौ एव अन्तर्भावात् सद्योमुक्तितः पृथक्तया तयोरनङ्गीकारः। मुक्तस्य पुरुषस्य यावत्पर्यन्तं देहो विद्यते तावत्पर्यन्तं जीवन् एव मुक्तत्वात् अयं जीवन्मुक्तो गद्यते। विवेकचूडामणौ भगवच्छङ्कराचार्यैः भण्यते यत्–

जीवन्नेव सदा मुक्तः कृतार्थो ब्रह्मवित्तमः।

---

[२]श्रीमद्भगवद्गीता (श्रीरामानुजभाष्य-हिन्दी-अनुवादसहिता), पृ.– २३

[३]श्वेताश्वतरोपनिषत्– ६/१३

उपाधिनाशाद्ब्रह्मैव सद्ब्रह्माप्येति निर्द्वयम्॥ [विवेकचूडामणिः– ५५५]

जीवन्मुक्तिसद्भावे शाङ्कराद्वैतिनः "भिद्यते हृदयग्रन्थिच्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥" [मुण्डकोपनिषत्– २/२/९] इतीमां श्रुतिमुद्धरन्ति। प्रारब्धकर्मक्षयार्थं जीवन्मुक्तपुरुषस्य देहधारणम्। अविद्यावतां जनानां बोधनार्थमेव जीवन्मुक्तिरित्यभिधीयते। अपरोक्षानुभूतौ भगवच्छङ्कराचार्यैः कथ्यते यत्–

देहस्यापि प्रपञ्चत्वात् प्रारब्धावस्थितिः कुतः।
अज्ञानिजनबोधार्थं प्रारब्धं वै वक्ति श्रुतिः॥ [९७] इति।

तस्यैव जीवन्मुक्तस्य पुरुषस्य देहपातात्परम् अस्मद्दृष्ट्या विदेह स इत्युच्यते। सद्योमुक्तपुरुषस्य देहात्मविषयकज्ञानाभावात् सत्यपि देहे स्वदृष्टा स तु विदेहः। अत एव सद्योमुक्तपुरुषस्य सकाशे जीवन्मुक्त्यादि तत्प्रतिपादकञ्च शास्त्रम् अर्थवादमात्रम्। एतदेव संक्षेपशारीरके सर्वज्ञात्ममुनिना गद्यते यत्–

जीवन्मुक्तिप्रत्ययं शास्त्रजातं जीवन्मुक्ते कल्पिते योजनीयम्।
तावन्मात्रेणार्थवत्त्वोपपत्तेः सद्योमुक्तिः सम्यमेतस्य हेतोः॥[४] इति।

सगुणब्रह्मविद्यानुशीलनवतां ब्रह्मलोकप्राप्तिरूपा क्रममुक्तिः सम्भवति। किन्तु रामानुजमते तु एकैव विदेहमुक्तिरङ्गीक्रियते। शरीररूपबन्धस्य विद्यमानत्वात् जीवन्मुक्तिरसम्भवेति विशिष्टाद्वैतराद्धान्तः। रामानुजीयाः जीवन्मुक्तिनिषेधपरकत्वेन "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" [छान्दोग्योपनिषत्– ६/१४/२] इतीमां श्रुतिमुद्धरन्ति। शरीरपातात्परम् ईश्वरसायुज्यप्राप्तिरेव मुक्तिः, न तु कैवल्यप्राप्तिः। ननु ममात्र संशयस्तावत् शरीररूपबन्धस्य सद्भावादपि भगवतः श्रीकृष्णस्य भगवत्त्वहानिः भविष्यति खलु? पुनश्च "आचार्यवान् पुरुषो वेद" [छान्दोग्योपनिषत्– ६/१४/२] इत्यस्याः श्रुतेः वैयर्थ्यप्रसङ्गो भवेदिति मन्मतम्। पुनश्च भगवता श्रीकृष्णेनापि सर्वत्र समदर्शिनां जीवन्मुक्तपुरुषाणां ब्रह्मण्येव विद्यमानत्वं दर्शयितुं श्रीमद्भगवद्गीतायामुच्यते–

इहैव तैर्जितः सर्गः येषां साम्ये स्थितं मनः।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः॥ [५/१९] इति।

किन्तु विशिष्टाद्वैतवेदान्ते पञ्चविधाः मुक्तयः स्वीक्रियन्ते। सालोक्यमुक्तिः

[४]संक्षेपशारीरकम्– ४/३९

सार्ष्टिमुक्तिः सामीप्यमुक्तिः सारूप्यमुक्तिः सायुज्यमुक्तिश्चेति। एतासां मुक्तिनां सद्भावे प्रमाणं तावत्–

सालोक्यसार्ष्टि सामीप्यसारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः॥[५] इति।

भगवल्लोके निवासः सालोक्यमुक्तिः। भगवत्समैश्वर्यप्राप्तिः सार्ष्टिमुक्तिः। भगवन्निकटवर्तित्वावाप्तिः सामीप्यमुक्तिः। भगवत्समानरूपत्वावाप्तिः सारूप्यमुक्तिः। भगवत्साम्यत्वप्राप्तिः सायुज्यमुक्तिः। परमात्मसायुज्यप्राप्तिरेव परममुक्तिः, अन्यत्र मुक्तिशब्दः गौण इति विशिष्टाद्वैतराद्धान्तः।

शाङ्कराद्वैते गुरोः महन्माहात्म्यं विद्यते। गुरुः सर्वानर्थहेतुभूताविद्यारूपस्य अन्धकारस्य विनाशको भवति। वैद्यः यथा रोगिणः रोगं निवारयति तथैव गुरुरपि अविद्यावतोऽविद्यां नाशयति। एतदेव श्रीश्रीगुरुगीतायां भण्यते–

गुकारः प्रथमो वर्णो मायादिगुणभासकः।
रुकारोऽद्वितीयं ब्रह्म मायाभ्रान्तिविमोचकः॥
गुशब्दश्चान्धकारः स्याद्रुशब्दस्तन्निरोधकः।
अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते॥ [१९, २०]

गुकारः अविद्यातद्गुणसत्त्वादिवाचकः। रुकारः अज्ञानरूपान्धकारविनाश-वाचकः। गुरुरेव अन्धाकारविनाशको भवति। पुराणेऽपि भण्यते–

गकारः सिद्धिदः प्रोक्तो रेफः पापस्य दाहकः।
उकारो विष्णुरव्यक्तस्त्रितयात्मा गुरुः परः॥[६] इति।

अत्र गकारः सिद्धिदातृत्वार्थवाचकः, रकारः पापदाहकत्वार्थवाचकः, उकारश्च पालकत्वार्थवाचकः। गुरुः शिष्यस्य पापक्षालनं परिपालनञ्च करोति। अन्तिमे प्राप्तव्यं वस्तु प्रापयति। स्वबुद्ध्या परमतत्त्वं ब्रह्म यः ज्ञातुमिच्छति स अन्धकारादपि अन्धकारे पतितो भवति। शास्त्रपारदर्शिभिरपि स्वातन्त्र्येण ब्रह्मज्ञानान्वेषणं न कर्तव्यम्। अत एव भगवच्छङ्कराचार्यैः मुण्डकोपनिषद्भाष्ये उच्यते "शास्त्रज्ञोऽपि स्वातन्त्र्येण ब्रह्मज्ञानान्वेषणं न कुर्यादित्येतत् गुरुमेवेत्यवधारणफलम्"[७] इति।

---

[५]श्रीमद्भागवतपुराणम्– ३/२९/१६

[६]वेदान्तसारः, विपदभञ्जनपालमहोदयेन बङ्गभाषया व्याख्यानावसरे अयं श्लोक उद्धृतः, पृ.– १६

[७]ईशादि-नौ-उपनिषत्, पृ.– ७२

एतेन गुरोरुपदेशोऽपि सार्थको भवतीति ज्ञायते। श्वेताश्वतरोपनिषदि अपि श्रूयते–

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशयन्ते महात्मन॥ [६/२३] इति।

किन्तु सर्वाभिन्नत्वेन विज्ञानवतः गुरोः शिष्यं प्रत्युपदेशोऽनर्थक इति रामानुजभाष्याभिप्रायेण विशिष्टाद्वैतवेदान्ते गुरोः माहात्म्यं न विद्यते इति भाति। अद्वितीयात्मतत्त्वनिश्चयज्ञानवतां गुरूणां सकाशे सर्वमिदं ब्रह्मैव भवतीत्यतः ते गुरवः कमपि नोपदिशन्ति। यदि बाधितानुवृत्तिरुपदेशादिव्यवहारान् प्रति हेतुरित्युच्यते तर्हि "यः सर्वज्ञः सर्ववित्" [मुण्डकोपनिषत्– १/१/९], "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" [श्वेताश्वतरोपनिषत्– ६/८], "वेदाहं समतीतानि वर्तमानानि चार्जुन" [श्रीमद्भगवद्गीता– ७/२६] चेत्यादिश्रुतिस्मृतिविरोधः सम्भवति। अत एव रामानुजाचार्यैः निगदितं यत् "अज्ञानकृतभेददृष्टिवादे तु परमपुरुषस्य परमार्थदृष्टेः निर्विशेषकूटस्थनित्यचैतन्यात्मयाथात्म्यसाक्षात्कारात् निवृत्ताज्ञानतत्कार्यतया अज्ञानकृतभेददर्शनं तन्मूलोपदेशादिव्यवहाराश्च न सङ्गच्छन्ते"[८] इति। अत्रैव स्पष्टं यद्रामानुजाचार्यैः जीवन्मुक्तिः नाङ्गीक्रियते। अद्वितीयात्मतत्त्वनिश्चयज्ञानेन सर्वस्य च आत्माभिन्नत्वेन गुरोः शिष्यं प्रति उपदेशोऽनर्थक इति विशिष्टाद्वैतवादिनो वदन्ति। एतदेव रामानुजाचार्यैः भण्यते यत् "किञ्च गुरोरद्वितीयात्मविज्ञानादेव ब्रह्मात्मज्ञानस्य सकार्यस्य विनष्टत्वात् शिष्यं प्रत्युपदेशो निष्प्रयोजनः"[९] इति।

किन्तु विचारे क्रियमाणे आक्षेपोऽयं रामानुजपक्षेऽपि आपतति यत् रामानुजमते परमानन्दस्वरूपस्य भगवतः श्रीकृष्णस्यापि उपदेशादिव्यवहाराः न सङ्गच्छन्ते। अस्मिन् आक्षेपे सति प्रायः रामानुजीयाः भगवति निष्कामस्वरूपे श्रीकृष्णे लीलोदयवशात् उपदेशादिव्यवहाराः सम्भवन्तीत्येतदुत्तरं प्रयच्छन्ति। अद्वैतिनस्तु अविद्यया भगवत उपदेशादिव्यवहाराः सङ्गच्छन्ते इति अङ्गीकुर्वन्ति, 'मायया सर्वसम्भवात्' इति न्यायात्। विद्यारण्यस्वामिभिः पञ्चदश्यामुच्यते यत्–

सर्वज्ञत्वादिके तस्य नैव विप्रतिपद्यताम्।
श्रौतार्थस्यावितर्क्यत्वान्मायायां सर्वसम्भवात्॥ [६/१५९]

---

[८]श्रीमद्भगवद्गीता(रामानुजभाष्यं बङ्गानुवादसहितम्), पृष्ठाङ्कः- २५

[९]श्रीमद्भगवद्गीता (शाङ्करभाष्याद्येकादशटीकोपेता), पृ.– ८७

मोक्षप्राप्तौ च ज्ञानमेकमेव साक्षात्साधनमिति शाङ्कराद्वैतिनो वदन्ति। चित्तशुद्धिप्राप्तियोग्यताद्वारा निष्कामं कर्म परम्परया मोक्षसाधनं भवति। अत एव भगवच्छङ्कराचार्यैः श्रीमद्भगवद्गीताभाष्ये कथ्यते यत् "तस्यास्य गीताशास्त्रस्य संक्षेपतः प्रयोजनं परं निःश्रेयसं सहेतुकस्य संसारस्य अत्यन्तोपरमलक्षणम्। तच्च सर्वकर्मसन्न्यासपूर्वकात् आत्मज्ञाननिष्ठारूपाद्धर्माद्भवति"[10] इति। शाङ्कराद्वैते भक्तिः वैराग्यं ज्ञानञ्चेति पर्यायवाचकाः शब्दाः भवन्ति। अत एव शाङ्कराद्वैते ज्ञानकर्मणोः समुच्चयः नाङ्गीक्रियते।

किन्तु विशिष्टाद्वैतिभिः मोक्षावाप्तौ द्विविध उपायोऽङ्गीकृतो वर्तते। सिद्धोपायः साध्योपायश्चेति। भगवत्प्रसाद एव सिद्धोपायः। कर्मज्ञानभक्तियोगाः प्रपत्तिश्च मोक्षावाप्तौ साध्योपायाः। भक्तिर्नाम भगवत्प्रीतिः ज्ञानम्। प्रपत्तिर्नाम शरणागतिः। भक्तिः प्रारब्धं विहाय अवशिष्टकर्माणि नाशयति। किन्तु प्रपत्तिः सर्वविधकर्माणि नाशयति। अत एव भक्तिप्रपत्त्योः प्रपत्तिरेव आशुमोक्षदायिणीति विशिष्टाद्वैतिनो वदन्ति। किन्त्वत्र भक्तेः ज्ञानसाधनत्वे भगवच्छङ्कररामानुजयोः मतसादृश्यं भजते। रामानुजीयाः ज्ञानकर्मणोः समुच्चयम् अङ्गीकुर्वन्ति। अत एव श्रीमद्भगवद्गीताभाष्ये भगवद्रामानुजाचार्याः भणन्ति यत्– "परमपुरुषार्थलक्षणमोक्षसाधनतया वेदान्तोदितं स्वविषयं ज्ञानकर्मानुगृहीतं भक्तियोगम् अवतारयामास"[11] इति। कर्मापि साक्षान्मोक्षसाधनमिति रामानुजीया अङ्गीकुर्वन्ति। कर्मणां साक्षान्मोक्षसाधनत्वे विशिष्टाद्वैतिनः "विद्या चाविद्याञ्च यस्तद्वेदोभयं सह" [ईशोपनिषत्– ११], "सम्भूतिं च विनाशं च" [ईशोपनिषत्– १४] चेत्यादिश्रुतिमुद्धरन्ति।

## उपसंहारः

केवलाद्वैते सर्वाभिन्नत्वनिश्चयात् ब्रह्मविद उपदेशादिव्यवहाराः न सङ्गच्छन्ते इति चेन्न, उन्मार्गप्रवृत्तिनिवारणार्थमेव जनकादीनाम् आत्मज्ञानिनाम् उपदेशादिकर्मणि प्रवृत्तिरिति भगवच्छाङ्कराद्वैतिनः भणन्ति। किन्तु लीलया भगवत उपदेशादिव्यवहाराः भवन्तीति रामानुजीयाः स्वीकुर्वन्ति। यद्यपि ब्रह्मणः जगदभिन्ननिमित्तोपादानकारणत्वादौ भक्तेश्च ज्ञानसाधनत्वादौ केवलाद्वैतविशिष्टाद्वैतनययोः सादृश्यं प्राप्यते तथापि बहुत्र वैसादृस्यमपि

[10] श्रीमद्भगवद्गीता (वासुदेवानन्दस्वामिभिः व्याख्याता अनुदिता च), पृ.– १३

[11] श्रीमद्भगवद्गीता (श्रीरामानुजभाष्य-हिन्दी-अनुवादसहिता), पृ.– ४

दृश्यते। तयोः राद्धान्तयोः केचन प्रधानभेदास्तावत्–

१) भगवद्रामानुजमते भगवत्कृपया एव मुक्तिः। ब्रह्मण उपासनार्थम् ब्रह्मज्ञानम्। उपासनया तुष्टं ब्रह्म मुक्तिं प्रददाति। भगवच्छङ्करमते अद्वैतब्रह्मज्ञानेनैव मुक्तिः।

२) भगवद्रामानुजमते विष्णुरेकैव देवता। विष्णुरेव उपास्यः। भगवच्छङ्करमते एकस्यैव ब्रह्मणः गुणभेदकल्पनया ब्रह्माविष्णुमहेश्वराः कल्प्यन्ते। एताः देवता अधिकारिभेदेन उपास्याः भवन्ति।

३) भगवद्रामानुजमते ब्रह्म जीवः जगत् चेति त्रितयं सत्यम्। जगज्जीवौ ब्रह्मणः शरीरभूतौ इत्यपि रामानुजमतम्। भगवच्छङ्करमते सर्वमिदं ब्रह्म, ब्रह्मैव सत्यम्, तद्भिन्नं सर्वं मिथ्या।

४) भगवद्रामानुजमते ब्रह्मसायुज्यमेव परमपुरुषार्थः। ब्रह्मसायुज्यप्राप्ते सति वैकुण्ठलोकप्राप्तिर्भवति। भगवच्छङ्करमते कैवल्यमेव परमपुरुषार्थः।

५) भगवद्रामानुजमते विदेहमुक्तिरेका एव मुक्तिः। भगवच्छङ्करमते सद्योमुक्तिः क्रममुक्तिश्चेति मुक्तिद्वयम्।

६) भगवद्रामानुजमते ब्रह्म सगुणं सविशेषं च भवति। भगवच्छङ्करमते अद्वैतं ब्रह्म निर्विशेषं निर्गुणं च।

७) भगवद्रामानुजमते अशेषं ज्ञानं सविकल्पकमेव। भगवच्छङ्करमते यथार्थज्ञानं निर्विकल्पकमेव।

८) भगवद्रामानुजमते सगुणब्रह्मण्येव सर्वासामुपनिषदां तात्पर्यम्। भगवच्छङ्करमते "नेति नेति" [बृहदारण्यकोपनिषत्– २/३/६] इत्यादिश्रुत्या निषेधमुखेन निर्गुणब्रह्मण्येव सर्वासामुपनिषदां तात्पर्यम्।

९) भगवद्रामानुजमते भ्रमविषयः सदेव। भ्रम इति व्यवहारमात्रम्। रामानुजीयाः सत्ख्यातिवादिनो भवन्ति। भगवच्छङ्करमते भ्रमविषय अनिर्वचनीयः। अज्ञानवशादेव तस्य विषयस्य प्रतीतिर्भवति।

एवम् अस्माभिः अपरोक्षानुभूति-विवेकचूडामणि-दशोपनिषद्भाष्य-यतीन्द्रमतदीपिका-विशिष्टाद्वैतसिद्धान्त-श्रीमद्भगवद्गीताभाष्यादिग्रन्थाधारेण अद्वैतविशिष्टाद्वैतराद्धान्तयोः सादृश्यं वैसादृश्यञ्च आलोचितमिति शिवम्।

-★-

# क्रममुक्तौ आवृत्त्यनावृत्तिविचारः

## कार्तिकमेटे*

## भूमिका

समेषु भारतीयास्तिकदर्शनेषु मूर्धन्यभूतस्य अद्वैतवेदान्तस्य सिद्धान्ते विदेहमुक्तिः, जीवन्मुक्तिः, क्रममुक्तिः इत्येवं त्रिविधा मुक्तिः प्रकीर्तिता। तत्त्वज्ञानेन अविद्याकामकर्मनिवृत्तिद्वारा आत्यन्तिकशरीरपातेन जन्मबन्ध-निवारणेन च विदेहमुक्तिर्भवति। अस्मिन्नेव शरीरे प्रारब्धकर्मलेशवशात् उत्पन्नब्रह्मसाक्षात्कारवतः स्वस्वरूपेण अवस्थितिः जीवन्मुक्तिरित्युच्यते। तृतीयाप्येका वेदान्तिभिः क्रममुक्तिरूपा मुक्तिः स्वीकृता। ये तावत् सगुणब्रह्मणः परमेश्वरस्य उपासनाद्वारा शरीरपातात्परं उपासनोत्कर्षेण अर्चिरादिपर्वणा देवयानेन मार्गेण ब्रह्मलोकं गच्छन्ति, तेषाम् एवम् उपासनया वा ब्रह्मलोकप्राप्तिरूपा क्रममुक्तिः। ब्रह्मलोके चोत्तरकाले साधकः श्रवणमनननिदिध्यासनेन क्रमेण विदेहमुक्तः स्यादिति। अस्मिन्ब्रह्मलोके श्रवणादिसाधनैः ब्रह्मतत्त्वज्ञानमनुभूय विदेहमुक्ताः भवन्ति। एवम् अर्चिरादिपथा ब्रह्मलोकगतानां सगुणोपासकानां तत्रैव हिरण्यगर्भेण ब्रह्मतत्त्वमुपदिष्टानां श्रवणाद्यभ्यासेन तेनैव कार्यब्रह्मणा सह मोक्षः। ते एवंरूपेण उपासनया उपासकाः ब्रह्मलोकं प्राप्य तत्र क्रमशः परमां विदेहमुक्तिं प्राप्नुवन्ति। ब्रह्मलोके श्रवणाद्यभ्यासप्रभृति आविदेहमुक्ति सर्वापि प्रक्रिया क्रममुक्तौ अन्तर्भवति। अतो ब्रह्मलोकं गताः सर्वे उपासकाः क्रममुक्तपदवाच्याः।

साधकानामुपासातीव्रत्वं निष्ठात्वमाश्रित्यैव उत्तरोत्तरलोकप्राप्तिः। न तु हठात् किञ्चिन्मात्रम् उपासनेन सिद्ध्यति। देवोपासनया तत्तद्देवताभावं प्राप्य पुनः उपासनायाः उत्कर्षेण उत्तरलोकप्राप्तिः भवति। देवात्मभावं प्राप्य पुनस्तत्रैव लोके उपासनामनुवर्तेत। अन्यथा लोकात् च्युतिः स्यात्।

सगुणपरब्रह्मविद्यया ब्रह्मलोके हिरण्यगर्भसायुज्यप्राप्तानां क्रममुक्तानां कल्पान्ते हिरण्यगर्भेण आत्मज्ञानोपदेशं प्राप्य नियमेन श्रवणाद्यभ्यासेन च परम-मुक्तिः। अन्येषां का स्थितिः। तेषां पुनः कल्पारम्भे ब्रह्मलोके उत्पत्तिः उत इहलोके आवृत्तिरित्यस्मिन् विद्यते संशयः। अतोऽत्र गत्यागतिविषयो विचारणीयः।

---

*शोधच्छात्रः, संस्कृतविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य

## विमर्शः

सद्गुरोः विना उपदेशं निर्गुणपरब्रह्मविद्योदयो न भवति। काशीमोक्षविचारे पूज्यपादैः सुरेश्वराचार्यैः शास्त्रवाक्यम् उद्धृतं यथा– 'सगुणब्रह्मवेत्तारः तेषां ज्ञानं सः ईश्वरः आचष्टे।' 'तत्र ब्रह्मोपदेष्टा स्यात् अत्र साक्षात् महेश्वरः'[1] इत्येवंरूपम्। तत्रेति पदेन ब्रह्मलोके इत्यर्थः गृहीतः। अत्र इत्यनेन काश्यामिति। कल्पान्ते महाप्रलयकाले हिरण्यगर्भेण उपदेशं प्राप्य क्रममुक्तिप्राप्ताः सगुणब्रह्मविद्याविदः निर्गुणपरब्रह्मज्ञानेन विदेहमुक्तिं प्राप्नुवन्ति। हिरण्यगर्भस्यापि कल्पसमाप्तौ निर्गुणब्रह्मणि लयेन विदेहमुक्तिरिति प्रसिद्धमेव।

'कार्यब्रह्मलोकप्रलयप्रत्युपस्थाने सति तत्रैव उत्पन्नसम्यग्दर्शनाः सन्तस्तदध्यक्षेण हिरण्यगर्भेण सहातः परं परिशुद्धं विष्णोः परमं पदं प्रतिपद्यन्त इति।'[2] इति भाष्यवाक्येन ब्रह्मलोकप्राप्तानां सर्वेषामेव हिरण्यगर्भस्य अधिकारसमाप्तौ तेन सह प्रलयसमये निर्गुणब्रह्मज्ञानेन विदेहमुक्तिरिति प्रतिभाति। (तेषां साक्षात् परब्रह्मप्राप्त्या अनावृत्तिसिद्धौ परम्परया विदेहमुक्तिकथनस्य तात्पर्यं हि गतिपूर्विका परब्रह्मप्राप्तिः अञ्जसा असम्भवा इति।)

सुषुम्नानाडीसूर्यरश्मिसमन्वितेन अर्चिरादिना देवयानेन मार्गेण सगुणपरब्रह्मविद्यया ये तावत् शास्त्रप्रोक्तं विशेषणयुक्तं ब्रह्मलोकं गच्छन्तीति अस्माभिः प्रतिपादितम्। इदानीं ब्रह्मलोकप्राप्तानां क्रममुक्तानां सर्वेषां परब्रह्मपदप्राप्तिरूपा मुक्तिः भवति न वा, तथा च जन्ममृत्युप्रवाहरूपे संसारे आवृत्तिरनावृत्तिर्वा केषामिति विषयः विचार्यते। यतो हि भाष्ये आवृत्त्यनावृत्तिविषयक उभयविधः विचारः प्राप्यते। अत्र भाष्यकारैः 'ते तं प्राप्य न चन्द्रलोकादिव भुक्तभोगा आवर्तन्ते।'[3] इति अनावृत्तिः दर्शिता। 'तयोर्ध्वमायन्नमृतत्वमेति' (छान्दोग्योपनिषत्– ८/६/६) 'तेषां न पुनरावृत्तिः' (बृहदारण्यकोपनिषत्– ६/२/१५) 'एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते'(छान्दोग्योपनिषत्– ४/१५/६) 'ब्रह्मलोकमभिसंपद्यते' (छान्दोग्योपनिषत्– ८/१५/१) 'न च पुनरावर्तते' (छान्दोग्योपनिषत्–

[1] वेदान्तदर्शनम्, चतुर्थखण्डः, पुटम् २४९

[2] ब्रह्मसूत्रशाङ्करभाष्यम्, पुटम् ८८१, ब्रह्मसूत्रम्– ४/३/१०

[3] ब्रह्मसूत्रशाङ्करभाष्यम्, पुटम् ९०५।

८/१५/१) इत्यादिश्रुतयः अत्र मानमिति दीयते। तथा च छान्दोग्योपनिषदः भाष्यान्ते 'यावदायुषं यावज्जीवमेवं यथोक्तेन प्रकारेणैव वर्तयन्ब्रह्मलोकमभिसंपद्यते देहान्ते। न च पुनरावर्तते शरीरग्रहणाय। पुनरावृत्तेः प्राप्तायाः प्रतिषेधात्। अर्चिरादिना मार्गेण कार्यब्रह्मलोकमभिसंपद्य यावद्ब्रह्मलोकस्थितिस्तावत्तत्रैव तिष्ठति प्राक्ततो नावर्तत इत्यर्थः'[४] इति प्रोक्तम्। संसारे पुनरावृत्तिविषयेऽपि भाष्यकाराणां वाक्यं प्राप्यते। तद्यथा– 'न च पुनरावर्तते इति इमं मानवमावर्तं नावर्तन्त इत्यादिश्रुतिविरोधः। इति चेत् न इमं मानवमिति विशेषणात्तेषामिह न पुनरावृत्तिरस्तीति च। यदि ह्येकान्तेनैव नावर्तेरन्निमं मानवमिहेति च विशेषणमनर्थकं स्यात्। इममिहेत्याकृतिमात्रमुच्यत इति चेत्। न। अनावृत्तिशब्देनैव नित्यानावृत्यर्थस्य प्रतीतत्वादाकृतिकल्पनाऽनर्थिका। अत एव इममिहेति च विशेषणार्थवत्त्वायान्यत्रावृत्तिः कल्पनीया।'[५] इति भाष्यांशेन आवृत्तिः अवगम्यते साधकस्य ब्रह्मलोकात्। आवृत्तिप्रसङ्गे बृहदारण्यकोपनिषदि उच्यते यत् 'तेषां ब्रह्मलोकं गतानां नास्ति पुनरावृत्तिरस्मिन्संसारे न पुनरागमनमिहेति शाखान्तरपाठात्। इहेत्याकृतिमात्रग्रहणमिति चेच्छ्वोभूते पौर्णमासीमिति यद्वत्। न इहेतिविशेषणानर्थक्यात्। यदि हि नावर्तन्त एवेहग्रहणमनर्थकमेव स्यात्। श्वोभूते पौर्णमासीमित्यत्र पौर्णमास्याः श्वोभूतत्वमनुक्तं न ज्ञायत इति युक्तं विशेषयितुम्। न हि तत्र श्व आकृतिः शब्दार्थो विद्यते इति श्वःशब्दो निरर्थक एव प्रयुज्यते। यत्र तु विशेषणशब्दे प्रयुक्तेऽन्विष्यमाणे विशेषणफलं चेन्न गम्यते तत्र युक्तो निरर्थकत्वेनोत्स्रष्टुं विशेषणशब्दो न तु सत्यां विशेषणफलावगतौ। तस्मादस्मात्कालादूर्ध्वमावृत्तिर्गम्यते।'[६] एवम् आपातदृष्ट्या भाष्यविरोधो विद्यते क्रममुक्तस्य आवृत्त्यनावृत्तिप्रसङ्गे।

एवं विप्रतिपत्तौ जिज्ञासूनां जिज्ञासानिवृत्तये केन केन विद्याबलेन ब्रह्मलोकात् पुनरावृत्तिरनावृत्तिर्वा भवति तत् प्रदर्श्यते यथा–

**१.उपकोसलविद्या–** अस्यां विद्यायां यदि प्रकृष्टोपासकः अस्ति तर्हि तस्य अनावृत्तिः। तत्त्वज्ञानेन सः विदेहमुक्तो भवति। मन्दमतीनां तु

---

[४]उपनिषद्भाष्यम्, द्वितीयः खण्डः, पुटम् ४३२।

[५]उपनिषद्भाष्यम्, द्वितीयः खण्डः, पुटम् १८३

[६]उपनिषद्भाष्यम् तृतीयः खण्डः पुटम् ४३२

आवृत्तये इयमुपासना। विद्येयं कार्यब्रह्मकारणब्रह्मणोः समुच्चितोपासना।[७] अत एव सा मिश्रितविद्या। कार्यब्रह्म च हिरण्यगर्भः प्रथमो जीवः। उपकोसलविद्यावतां पुनरावृत्तिः उच्यते तत्प्रकरणस्थया 'इमं मानवमावर्तं नावर्तन्ते' (छान्दोग्योपनिषत्– ४/१५/५) इत्यनया श्रुत्या तद्भाष्यटीकया च। भाष्यं चात्र 'एतेन प्रतिपद्यमाना गच्छन्तो ब्रह्मेमं मानवं मनुसम्बन्धिनं मनोः सृष्टिलक्षणमावर्तं नावर्तन्त आवर्तन्तेऽस्मिञ्जननमरणप्रबन्धरूढा घटीयन्त्रवत्पुनः पुनरित्यावर्तस्तं न प्रतिपद्यन्ते'[८] इति। अनेन तु अनावृत्तिरेव अवगम्यते। परन्तु आनन्दगिरिटीकायां 'इममितिविशेषणादनावृत्तिरस्मिन्कल्पे। कल्पान्तरे त्वावृत्तिरिति सूच्यते'[९] इति आवृत्तिः अभ्युपगता। अत्र एकस्या एव उपासनायाः आवृत्त्यनावृत्तिकथने तात्पर्यं तु उपासकस्य उपासनोत्कर्षत्वमेव।

**२.पञ्चाग्निविद्या–** छान्दोग्यश्रुतौ आवृत्त्यनावृत्तिविषयः न पठितः। काण्वशाखीयायाः बृहदारण्यकोपनिषदः पञ्चाग्निविद्याप्रतिपादके मन्त्रे 'तेषां न पुनरावृत्तिः' इति अनावृत्तिः आकलिता। अत्र पठितायामप्यनावृत्तौ भाष्ये शङ्करभगवत्पादैः 'इह इति शाखान्तरपाठात्' इत्येवंरूपेण माध्यन्दिनशाखापठितायाः बृहदारण्यकोपनिषदः 'तेषामिह न पुनरावृत्तिः अस्ति' (बृहदारण्यकोपनिषत्– ६/१/१८) इति पाठाध्याहारेण 'अस्मात्कल्पादूर्ध्वमावृत्तिर्गम्यते' इति व्याख्या विहिता। 'ब्रह्मणोऽनेकान्कल्पान्वसन्ति' इति काण्वशाखीयस्य भाष्येण एवञ्च 'कल्पशब्दः अवान्तरकल्पविषयः' इति आनन्दगिरिटीकावचनाच्च ज्ञायते यत् बहून् अवान्तरकल्पान् ब्रह्मलोके उषित्वा क्रममुक्ताः जनिमृतिरूपे संसारे पुनरावर्तन्ते। भगवद्गीतायाः टीकायां गूढार्थदीपिकायां मधुसूदनेन अयमेव सिद्धान्तो निरूपितः। तद्यथा– "ये क्रममुक्तिफलाभिरुपासनाभिर्ब्रह्मलोकं प्राप्तास्तेषामेव तत्रोत्पन्नसम्यग्दर्शनानां ब्रह्मणा सह मोक्षः। ये तु पञ्चाग्निविद्यादिभिरतत्क्रतवोऽपि तत्र गतास्तेषामवश्यंभावि पुनर्जन्म। अत एव क्रममुक्त्यभिप्रायेण ब्रह्मलोकमभिसंपद्यते 'न च पुनरावर्तते' 'अनावृत्तिः

---

[७]कार्यब्रह्मोपासनसमुच्चितं कारणब्रह्मोपासनमिति आनन्दगिरिटीका, उपनिषद्भाष्यम्, द्वितीयः खण्डः, पुटः १४६

[८]उपनिषद्भाष्यम् खण्डः २, पुटम् १५५-१५६

[९]उपनिषद्भाष्यम् खण्डः २, पुटम् १५५

शब्दात्’[१०] इति श्रुतिसूत्रयोरुपपत्तिः। इतरत्र तेषामिह न पुनरावृत्तिः इमं मानवमावर्तं नावर्तन्ते इति इहेमम् इति च विशेषणाद्गमनाधिकरणकल्पादन्यत्र पुनरावृत्तिः प्रतीयते।”[११]

**३.दहरविद्या–** सगुणपरब्रह्मोपासनायाः फलं क्रममुक्तिरिति ‘न च पुनरावर्ततेeng’ (छान्दोग्योपनिषत्– ८/१५/१) इत्येवं श्रुत्या वर्णितम्। दहरविद्याप्रकरणस्य अस्यां श्रुतौ ‘इह’इति पाठाभावात् दहरादिसगुणब्रह्मोपासनया ब्रह्मलोके सिद्धानां साधकानां मुक्तिः नान्येषामिति अवगम्यते। प्रसङ्गेऽस्मिन् रत्नप्रभावाक्यं तावत्– ‘ये तु दहरादीश्वरोपास्त्या गतास्तेषां सगुणविद्याफलक्षयेऽपि निरवग्रहेश्वरानुग्रहलब्धात्मज्ञानान्मुक्तिरिति नियमः’[१२] इत्युक्तम्

अर्चिरादिना मार्गेण कार्यब्रह्मलोकमभिसम्पद्य यावद्ब्रह्मलोकस्थितिः तावत्तत्रैव तिष्ठति प्राक्ततो नावर्तत इत्यर्थः इति दहरविद्याप्रकरणस्थेन छान्दोग्योपनिषद्भाष्यग्रन्थेन ब्रह्मलोकप्राप्तानाम् इतरविद्यावतां यथा प्रलयान्ते पुनरावृत्तिः तथा ब्रह्मलोकविलयान्ते दहरविद्याविदां तादृशी पुनरावृत्तिः नैव कल्पनीयेत्येव अभिप्रेतम्। अतः क्रममुक्तिफलया दहरविद्यया ब्रह्मलोकं प्राप्तानां तत्र उत्पन्नब्रह्मसाक्षात्काराणां मोक्षः इति सिद्धम्। एवं तेषां विदेहमुक्तिरूपा परमा गतिरिति ‘ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे’[१३] इत्यादि कूर्मपुराणवचनबलेन निर्णीतम्।

सगुणब्रह्मोपासनायामपि विद्यते किञ्चित् विशेषः। ब्रह्मविद्याभरणकारेण तदुक्तं सूत्रभाष्यस्य व्याख्यायां अहंग्रहोपासनापि, तेन उ एतस्यै देवतायै सायुज्यं सलोकतां जयति (बृहदारण्यकोपनिषत्– १/५/२३) इति फलतारतम्यं दर्शयति। यस्य ईषदपरिपक्कम् उपासनं तस्य सालोकता, अन्यस्य सायुज्यम् इति हि तदर्थः। एवं गुणादितारतम्येऽपि द्रष्टव्यमिति।[१४] अनेन प्रतिभाति यत् दहराद्यहंग्रहोपासकेष्वपि येषां अपिरपक्का उपासना अथवा अपहतपाप्मत्वादिगुणतारतम्यं विद्यते तेषां ब्रह्मलोकस्य निम्नस्तरे अविस्थितिरूपा सालोक्यसामीप्यादिमुक्तिः

---

[१०]ब्रह्मसूत्रम्– ४/४/२२

[११]श्रीमद्भगवद्गीता(अष्टटीकोपेता), पुटम् ३९६, ८/१६ श्लोकः।

[१२]ब्रह्मसूत्रशाङ्करभाष्यम्, पुटम् ९०५

[१३]कूर्मपुराणम् १२-२६९

[१४]ब्रह्मविद्याभरणम्, पुटम् ११३।

भवति। सायुज्यमुक्तिप्राप्तानां[१५] क्रमेण मुक्तिरिति 'सगुणब्रह्मोपसनात्सहैव मनसेश्वरसायुज्यं व्रजन्ति'[१६] इति भाष्येण ज्ञायते न तु सालोक्यमुक्तिप्राप्तानाम्। अत्र सहैव मनसेति भाष्यांशस्य अर्थस्तावत् मनउपलक्षितेन लिङ्गशरीरेण इति। निर्गुणब्रह्मविज्ञानाभावात् सगुणविद्याविदां नैव नष्टा अविद्या। अतः ' न तस्य प्राणाः उत्क्रामन्ति' (बृहदारण्यकोपनिषत्– ४-४-६) इत्यवस्था नैव प्राप्ता तैः सगुणोपासकैः। अतः तेषां सह लिङ्गशरीरेण ब्रह्मलोके गतिर्भवतीति भावः। दहराद्युपासनाभिः अन्येन केनचित्कर्मणा वा ब्रह्मलोकं प्राप्ताः साधकाः भोगवितृष्णाः, शमदमादिसाधनचतुष्टयसम्पन्नाः सन्तो निर्गुणपरब्रह्मविद्यायाः अनुशीलनेन ब्रह्मसाक्षात्कारं संसाध्य सद्योमुक्तिं लभन्त इति नास्ति कश्चिदत्र प्रतिबन्धलेशस्तेषाम्।

क्रममुक्तौ तु मुक्तिशब्दप्रयोगः गौणः सद्योमुक्तावेव अद्वैते मुक्तिपदस्य तात्पर्यम्। अतः क्रममुक्तस्यापि निर्गुणब्रह्मविद्याश्रयणेनैव सद्योमुक्तिः। तेन हि सगुणविद्योपासकानां ब्रह्मलोकगतानाम् अनावृत्तिः सिद्ध्यति। तथा चात्र भाष्यं 'सम्यग्दर्शनविध्वस्ततमसां तु नित्यसिद्धनिर्वाणपरायणानां सिद्धैवानावृत्तिः। तदाश्रयणेनैव हि सगुणशरणनामप्यनावृत्तिसिद्धिरिति।'[१७] एवं ब्रह्मलोके अनुत्पन्नब्रह्मसाक्षात्कारस्य साधकस्य कल्पान्तरे आवृत्तिः स्यात्। ये तावद्ब्रह्मलोकं गच्छन्ति ते यदि ज्ञानानुशीलनेन वासनाशून्याः शुद्धसत्त्वाः सन्तः परममुक्तिं लभन्ते तर्हि तेषां न पुनरावृत्तिस्ततः। किन्तु येषां तद्विपरीतभावः दृश्यते तेषां तु भविष्यत्कल्पे संसारार्णवे भवत्येव आवृत्तिः। ब्रह्मलोकं प्राप्य साधकाः श्रवणादिसाधनाभ्यासे निरताः भवेयुः तदर्थम् आवृत्तिः अर्थवादरूपेण उच्यते इत्यपि चिन्तयितुं शक्यते। यतो हि ज्ञानं विना तु न कस्यापि सर्वविधदुःखात् आत्यन्तिकी मुक्तिः। ब्रह्मज्ञानोत्पत्तये च परमं साधनं श्रवणमननादिकम्। अतस्तेषामभ्यासः नियमेन विधेयः ब्रह्मोलोकेऽपि। एवं दहरादिविद्यावतामपि कदाचित् ब्रह्मलोके अनुत्पन्नब्रह्मसाक्षात्कारात् भवेदेव आवृत्तिरिति भावः उक्तव्याख्यानस्य। यतो हि 'सह ब्रह्मभुवनेन लोकाः सर्वे पुनरावर्तिनः

[१५]ईश्वरसायुज्यं नाम सदृशदेहेन्द्रियाभिमानता, सादृश्यं नाम तद्भिन्नत्वे सति तद्गतभूयो-धर्मवत्त्वम्। तेन अस्यार्थो भवति ईश्वरीयशरीरभिन्नत्वे सति ईश्वरीयभूयोधर्मयुक्तदेहेन्द्रियाभिमानिता इति।

[१६]ब्रह्मसूत्रशाङ्करभाष्यम्, पुटम् ९०२।

[१७]ब्रह्मसूत्रशाङ्करभाष्यम्, पुटम् ९०६।

पुनरावर्तनस्वभावाः'[१८]इति भाष्यात् एवं च ब्रह्मलोकसहिताः सर्वे लोकाः पुनरावर्तिनः कस्मात्कालपरिच्छिन्नत्वादिति[१९] मधुसूदनीव्याख्यानाच्च आवृत्तिः सर्वेषां दहरादिविद्यावतां भवतीति निर्णयः यावता तेषां ब्रह्मज्ञानोदयो न स्यात्। अत एव गीतायां गीतं भगवता श्रीकृष्णेन 'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते।'[२०] तथा च साधकस्य ब्रह्मलोके परमब्रह्मज्ञानोत्पत्तेः प्रागेव यदि कल्पसमाप्तिः स्यात्तर्हि तस्य पुनरावृत्तिर्भवत्येव कर्मलेशात्। कर्मबन्धस्य उच्छेदस्तु निर्गुणब्रह्मतत्त्वसाक्षात्कारेणैव सिध्यतीति अद्वैतवेदान्तस्य चरमः राद्धान्तः।

## उपसंहारः

प्रबन्धेऽस्मिन् सामान्यनियमेन अस्मिँल्लोके दहरादिसगुणपरब्रह्मविद्यया ब्रह्मलोकगतानां अपुनरावृत्तिः तत्रापि उत्पन्नसम्यग्दर्शनाभावात् आवृत्तिरिति विशेषेण प्रदर्शितम्। एवं सर्वासु विद्यासु उपासकस्य चित्तपरिपाक एव साक्षात्कारे विनिगमकम्। उपासनायां तीव्रत्वाभावे तत्तदुपासकः नूनमावर्तते एव। सति परिपाके तया उपासनया तत्त्वसाक्षात्कारमुखेन विदेहमुक्तो भवतीति सिद्धान्तः। अतः क्रममुक्तानाम् अपुनरावृत्तिरिति उत्सर्गनियमः अथापि मन्दोपासकदृष्ट्या पुनरावृत्तिः अपवादरूपेण स्वीकर्तव्यमेव भवति। अत्र पुनः एकः विशेषो नियमः सम्प्रदाये स्वीक्रियते यत् ईश्वरकृपया यस्य कस्यापि विद्याविदः यस्मात्कस्मादपि लोकात् आत्यन्तिकानावृत्तिरूपः सद्योमुक्तिः सम्भवति। तथा हि श्रुतिः–

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।

यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूँ स्वाम्॥ (कठोपनिषत्. १/२/२३) इति।

अतो यं मुमुक्षुं परमात्मा अनुगृह्णाति स एव अभेदानुसन्धानवान् साधकः परमात्मानुग्रहेण जीवब्रह्मणोरैक्यम् अनुभूय सद्योमुक्तो भवतीति अहो परमेश्वरकृपामाहात्म्यम्। एवं पञ्चाग्न्याद्यावृत्तिफलकाभिः उपासनाभिः ब्रह्मलोकगतानां साधकानामपि ईश्वरानुग्रहेण ब्रह्मलोके उत्पन्नसम्यग्दर्शनानां सुतरां सद्योमुक्त्या अनावृत्तिर्गम्यते एव।

---

[१८]श्रीमद्भगवद्गीता(अष्टटीकोपेता), पुटम् ३९६।

[१९]तदेव।

[२०]श्रीमद्भगवद्गीता– ८/१६।

तथा चात्र उत्पन्नसम्यग्दर्शनाः अपि अपान्तरतमःप्रभृतिवत् कदाचित् ईश्वरेच्छया लोकस्थितिप्रभृतिव्यवस्थायाम् आधिकारिकपुरुषरूपेण नियुक्ताः भवन्ति। एवं ते ऐश्वर्यशालिनः ईश्वराः परमेश्वरेण तेषु सर्वेषु अधिकारेषु नियुक्ताः सन्तः परममुक्तिहेतौ ब्रह्मात्मज्ञाने सत्यपि लोककल्याणाय यावदधिकारं जीवन्मुक्तवत् अवतिष्ठन्ते। परमेश्वरेण प्रदत्ताधिकारिककर्मणां क्षयपर्यन्तं तेषां संसारे स्थितिरित्याशयः। अधिकारावसाने च अपवर्गस्तेषाम् इत्यविरुद्धम्। आधिकारिकपुरुषविचारः यावदधिकारमवस्थितिराधिकारिकाणाम् (ब्रह्मसूत्रम्–३/३/३२) इति सूत्रस्य भाष्यतत्तट्टीकायां विस्तरेण व्याख्यातः।

एवं प्रसङ्गेऽस्मिन् हिरण्यगर्भविद्यावतां, योगभ्रष्टानाम्, अश्वमेधयागयाजिनामत्र आवृत्त्यनावृत्तिविषयः आलोचयितुं शक्यते। अस्माभिस्तु अत्र चितेषु केषुचित्स्थलेषु विचारो विहितः इति शिवम्।

-★-

# शब्दस्य ब्रह्मत्वनिर्णयः

## शैवाल-आचार्यः*

## भूमिका

स्थावरजङ्गमात्मकस्यास्य जगतः अस्ति किमपि मूलमिति अङ्गीकृत्य 'तस्य मूलमन्विच्छ' इति मूलान्वेषणपराः मनुजाः आसृष्टेः मूलान्वेषणे रताः। परन्तु मुण्डे मुण्डे मतेः भिन्नत्वात् तस्य मूलविषये विद्यते विदुषां विमतिः। गच्छता कालेन जगतः मूलतत्त्वप्रतिपादनपराणि बहूनि शात्राणि रचितानि। सर्वत्रैव भिन्नक्रमेण जगतः मूलतत्त्वप्रतिपादनं क्रितम्। यथा न्यायवैशेषिकाः परमाणुं, सांख्याः प्रकृतिपुरुषसंयोगं, योगिनः ईश्वरं, वेदान्तिनः ब्रह्म तथैव शाब्दिकाः वैयाकरणाः शब्दब्रह्म एव जगतः मूलतत्त्वरूपेण प्रतिपादयन्ति। अस्य प्रमाणत्वेन तैः वेदमूलकत्वमेव प्रदर्श्यन्ते। 'वागेव विश्वा भुवनानि जज्ञे'[१], 'ओमित्येतदक्षरमिदं सर्वम्'[२], 'वाचो ह वाक्'[३] चेत्याद्याः श्रुतयः एव ब्रह्मणः शब्दमयत्वं प्रतिपादयन्ति। मुण्डके अपि दृश्यते अक्षरात्सृष्टिः -

> "तदेतत्सत्यं यथा सुदीप्तात्पावकाद्-
> विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः।
> तथाक्षराद्विविधाः सौम्यभावाः
> प्रजायन्ते तत्र चैवापि यन्ति॥"[४] इति।

शब्द एव ब्रह्म , शब्द एव नित्यः। स्मृतिवचनमपि प्राप्यते -

> "अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
> आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥"[५] इति।

गीतायामपि भगवता गीतं -

> "पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः।

---

*शोधच्छात्रः, संस्कृतविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य

[१]शतपथब्राह्मणम् ६/५/३/४

[२]माण्डूक्योपनिषत् - प्रथमो मन्त्रः

[३]केनोपनिषत् - १/२

[४]मुण्डकोपिनिषत् - २/१/१

[५]महाभारते शान्तिपर्वणि - २३१/६५

जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते॥"[६] इति।

अस्मिन् श्लोके शब्दब्रह्मातिवर्तते इत्यत्र शब्दब्रह्मशब्दः श्रूयते। परन्तु अस्य शब्दब्रह्मशब्दस्यार्थः आचार्यपादैः पूर्वमीमांसा इत्यर्थः विहितः।

भगवान् नारदं स्पष्टं वक्ति यत् -

"नाहं वसामि वैकुण्ठे योगिनां हृदये न वा।
मद्भक्ताः यत्र गायन्ति तत्र तिष्ठामि नारद॥"[७] इति।

तथाहि, भगवान् न तु वैकुण्ठे वसति, न वा योगिनां हृदये, अपि तु यत्र तस्य कीर्तनं भवति तत्रैव तस्य वासः। अर्थात् नादस्य महत्प्राधान्यं विद्यते इति ज्ञायते। शब्दब्रह्मणः ज्ञानस्य फलमपि उच्यते - 'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।'[८] इति। तथाहि, शब्दब्रह्मणि निष्णातः विद्वान् स्वयमेव परब्रह्मणः तुल्यः भवति 'ब्रह्मविद्ब्रह्मैव भवति'इति श्रुतेः। शब्दब्रह्मणमेव शाब्दिकाः स्फोटत्वेन प्रतिपादयन्ति। श्रुत्यामपि आम्नातं-

"शब्दब्रह्म यदेकं यच्चैतन्यं च सर्वभूतानाम्,यत्परिणामस्त्रिभुवनम्
अखिलम् इदं जयति सा वाणी।" इति।

अस्मिन् प्रबन्धे मया शब्दब्रह्मणः एव स्वरूपं प्रतिपाद्यते।

## शब्दब्रह्म

व्याकरणागमे शब्दतत्त्वमेव ब्रह्म। ब्रह्मविषयकानि यानि वाक्यानि उपनिषत्सु वैदान्तिकैः प्रस्तूयन्ते तेषां शब्दतत्त्वरूपेण स्वीकारः क्रियते चेत् सर्वाणि एव वाक्यानि शब्दतत्त्वे अन्विताः भवन्ति। परन्तु शब्दतत्त्वस्य वैशिष्ठं यत् नास्ति अस्य द्वैताद्वैतगतः विवादः, नेदं प्रधानं, न वा परमाणुः, न शिवः, न नारायणः। परन्तु सर्वप्रकृतिरिदम्। यस्य कस्यापि मूलान्वेषणे शब्दतत्त्वमेव बुद्धिपथमायाति। संसारस्य सर्गप्रतिसर्गयोः सरलमुत्तरं प्राप्यते -

"ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्।
विवृतं शब्दमात्राभ्यस्तास्वेव प्रविलीयते॥"[९] इति।

अर्थात् विद्यात्मकमविद्यात्मकमुभयविधं ब्रह्म एव शब्दनिर्मितम्। शब्दशक्तयः एव अस्य कारणम्। शब्दशक्तितः एव अस्य प्रकाशः, तत्रैवास्य लयः। वेदान्तेषु

[६]गीता - ६/४४

[७]पद्मपुराणम्/उत्तरकाण्डः - १४/२५

[८]महाभारते शान्तिपर्वणि १/२३२/३०

[९]वाक्यपदीयम् १/१,हरिवृषभवृत्तिः

अस्यैव तत्त्वस्य अनुरणनं सर्वत्र अनुभूयते। किं बहुना, वेदस्य वेदत्वमेव शब्दतत्त्वात्मकम्। अतः शब्दतत्त्वमेव ब्रह्मस्वरूपत्वेनाङ्गीकृत्य शाब्दिकाः शब्दब्रह्म प्रतिपादयन्ति।

वेदान्तपरिभाषायां धर्मराजध्वरीन्द्रेण विषयनिरूपणावसरे ब्रह्मणः स्वरूपं प्रतिपादितम्। वैयाकरणैः तान्येव लक्षणानि शब्दतत्वे न्यस्तानि। तथाहि, ग्रन्थकृता ब्रह्मण स्वरूपलक्षणं सत्यं ज्ञानमनन्तं ब्रह्म इति निरूप्य तस्य नव तटस्थलक्षणानि प्रतिपादितानि। 'जन्माद्यस्य यतः' इति ब्रह्मसूत्रकर्तृवचनात् जगज्जन्म-स्थिति-लयकारणत्वं ब्रह्मणि वर्तते। अत्र मायादिषु ब्रह्मणः कर्तृत्वनिराकरणाय जगच्छब्देन कार्यजातमङ्गीकार्यं, कारणत्वपदेन च कर्तृत्वम्। कर्तृत्वञ्च तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्। अर्थात् तदुपादानगोचरापरोक्षज्ञानत्वं, चिकीर्षात्वं, कृतिमत्वञ्च ब्रह्मणः त्रितयं तटस्थलक्षणं स्यात्। त्रितयमपि जन्म-स्थिति-लयेषु अन्वेति इति ब्रह्मणः नव तटस्थलक्षणानि सम्भवन्ति। तत्रापि ब्रह्मणः जगज्जन्मादिकारणत्वे 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ती'[१०]त्यादिश्रुतिर्मानम्। किञ्च, तादृशोपादानगोचरापरोक्षज्ञानसद्भावे-

'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः।
तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायते॥'[११] इत्यादिश्रुतिर्मानम्।

तादृशचिकीर्षासद्भावे च 'सोऽकामयत बहु स्यां प्रजायेय' इत्यादिश्रुतिर्मानम्। तादृशकृतौ च 'तन्मनोऽकुरुते' इत्यादिश्रुतिवाक्यं प्रमाणत्वेनाङ्गीकुर्वन्ति वैदान्तिकाः। अत्र वैयाकरणाः ब्रह्मणः तटस्थलक्षणविषये श्रुतिवाक्यवैविध्यं प्रतिपादयन्ति। तथाहि , शब्दब्रह्मणः जगज्जन्मत्वे 'वागेव विश्वा भुवनानि जज्ञे'[१२] इत्यादिश्रुतयः, स्थितित्वे 'वागेवायं लोकः'[१३] इत्यादिश्रुतयः प्रमाणत्वेनाङ्गीकुर्वन्ति।

वाक्यपदीयकारेण भर्तृहरिणा स्फोटाख्यस्य निरवयवस्य नित्यशब्दब्रह्मणः स्वरूपनिरूपणावसरे मङ्गलमुखेनोक्तं यत् -

"अनादिनिधनं ब्रह्म शब्दतत्त्वं तदक्षरम्।

---

[१०] तैत्तिरीयोपनिषत् ३/१/१

[११] मुण्डकोपनिषत् १/९

[१२] शतपथब्राह्मणम् ६/५/३/४

[१३] बृहदारण्यकोपनिषत् ५/४

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥"[१४] इति।

तथाहि अनादिनिधनम् उत्पत्तिविनाशरहितं, शब्दतत्त्वं शब्दात्मकं, यत् अक्षरं न क्षरणशीलं, अविनाशि, व्यापकम्, अक्षरात्मकं वा ब्रह्म। यतः यस्मात् ब्रह्मणः, जगतः संसारस्य, प्रक्रिया- क्रियाकलापः प्रवर्तते, तत् शब्दतत्त्वं, अर्थभावेन गोघटाद्यर्थस्वरूपेण विवर्तते विवृतं भवति इति। वैदान्तिकैः ब्रह्मणः यथा विवर्तवादः अङ्गीक्रियते तथैव अत्रापि शब्दब्रह्मणोऽपि विवर्तत्वमङ्गीकृतं दृश्यते। वेदप्रतिपाद्यपरब्रह्म इव शब्दब्रह्मणः एकत्वमपि भर्तृहरिणा अङ्गिकृतम् -

"एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते॥"[१५] इति।

तथाहि यच्छब्दब्रह्म एकं सजातीयविजातीयस्वगतभेदशून्यमेवाम्नातं पौनःपुन्येन कथितं श्रुत्यादिभिः, तद्ब्रह्म शक्तिव्यपाश्रयात् विविधशक्तीनामाश्रयणात्, स्वीकारादुद्बोधनाद्वा अभिन्नमेकरूपं भवति। तस्य च शक्तिभ्यः स्वयोग्यतारूपाभ्यः अपृथक्त्वे भेदाभावे सत्यपि तत्पृथक्त्वेनेव भिन्नरूपेणेव वर्तते वर्तमानं दृश्यते, वस्तुतो भिन्नं न भवतीत्येवार्थः।

## शब्दब्रह्मणः सृष्टिक्रमः

वैयाकरणैः शब्दब्रह्मणः एवं सृष्टिक्रमः स्वीक्रियते यत् - सृष्ट्यारम्भे परा, पश्यन्ती, मध्यमा, वैखरी चेत्येतासु वाक्सु पश्यन्ती वाग्रूपी ब्रह्म स्वापरिमितमायया प्राणिकर्मसहायेन समग्रनामरूपात्मकं जगत् बुद्धिस्थं कृत्वा 'अहमिदं करिष्यामि' इति संकल्पयति। तदा कालशक्त्या आकाशादीन् तथा भूतादीन् सृजति।

यः प्रलयानन्तरमपि निश्चलं तिष्ठति, तर्कानुमानागमैः यस्य विभिन्नप्रकारेण कल्पना क्रियते, यतः सर्वेभ्यः प्राणिभ्यः दूरं तथा तेष्वपि विद्यते, यः मुक्तः तथा मोक्षार्थिनः यस्योपासनं कुर्वन्ति, यस्य एकमेव चैतन्यं बहुधा प्रविभक्तं तिष्ठति, यस्य प्रथमा ज्योतिः ऋग्यजुस्सामरूपेण परिणतं सः शब्दः, तत एव जगतः प्रकाशः तत्रैव लयः इत्यर्थः। एवं शाब्दिकाः शब्दब्रह्मणः सृष्टिमङ्गीकुर्वन्ति।

## अन्यमतखण्डनम्

अत्र नैयायिकैः आशङ्क्यते यत् प्रमाणाभावात् स्फोटात्मा नित्यः शब्दः इति भवितुं नार्हति। तथाहि घटमानय इत्यादिवाक्यानामुच्चारणकाले घ् अ ट् -

---

[१४] वाक्यपदीयम् १/१

[१५] वाक्यपदीयम् १/२

आदिवर्णाः कण्ठादिस्थानात् वायुसंयोगेन उच्चारिताः भवन्ति, श्रूयन्ते, तत्क्षणमेव नश्यन्ति इति क्षणत्रयमेव तिष्ठन्ति। अतः क्षणिकानां शब्दानां कथं नित्यत्वमङ्गीकर्तुं शक्यते। घटवस्तुबोधकस्य एव शब्दत्वम् एतदतिरिच्य शब्दानामभावात्। अतः शब्दस्यानित्यत्वमङ्गीकार्यमेव। अत्रोच्यते नैयायिकैः यस्य शब्दत्वमुच्यते नास्ति सः शब्दः अपि तु शब्दव्यञ्जकः ध्वनिः। अनया ध्वन्या व्यञ्जितो घटादिबोधकः एव शब्दः। स एव नित्यः शब्दः नोत्पद्यते न वा नश्यति। स एव स्फोटः। पूर्वपक्षैः आक्षिप्तं यत् नास्ति अत्र प्रमाणमित्यत्रोच्यते यत् प्रत्यक्षमेव अत्र प्रमाणत्वेन अङ्गीकर्तुं शक्यते। तथाहि, गौ इत्यस्मिन् यद्यपि नैके वर्णाः सन्ति तथापि सर्वैः एकपदत्वेन एव स्वीक्रियते। परन्तु प्रश्नः समुदेति यत् अस्मिन् एकत्वं कुत्र दृश्यते - वर्णसमस्तत्वात् वर्णानामनेकत्वात् वर्णेषु नास्ति एकत्वम्। अस्य एकत्वस्य आधारः कोऽप्यस्ति इति स्वीकर्तव्यमेव। वर्णसमूहैः व्यक्त एव स्फोट इत्युच्यते। अतः पदे एकत्वस्यानुभवः सर्वेषामेव भवति। असति बाधके पदे एकत्वानुभवः मिथ्येति वक्तुं न शक्यते। पदार्थप्रतीतिः साधनान्तरेण न सिध्यति अतः स्फोटसिद्धान्तः अभ्युपगन्तव्यः।

ननु वर्णेभ्य एव पदार्थप्रत्ययः प्रादुर्भवति इति स्वीक्रियमाणे समस्तार्थप्रत्ययत्वं व्यस्तार्थप्रत्ययत्वमिति सम्भावितस्य कोटिद्वयस्यापि अयोग्यत्वात्। तथाहि, वर्णानां क्षणिकत्वात् समुहासम्भवात् समस्तार्थप्रत्ययत्वं न संघटते। व्यस्तेभ्यः वर्णेभ्यः वर्णसमुदायस्य पदस्य अर्थप्रतीतेः असम्भवात् द्वितीयपक्षोऽपि अनुपपन्नः। किञ्च, व्यस्तवर्णानां वाचकत्वस्वीकारे प्रत्येकस्य वर्णस्य सार्थकत्वं स्वीकार्यम्। तथा सति एकस्मादेव वर्णात् अर्थप्रतीतेः परं विद्यमानाः वर्णाः पदार्थबोधं प्रति व्यर्थाः स्युः। एकस्मिन् पदे यावन्तः वर्णाः विद्यन्ते तावन्तः अर्था अपि भवेयुः। अन्तिमे पदस्थानां सर्वेषां वर्णानां पर्यायवाचकत्वं स्वीकार्यमेव भवति। अतः वर्णानां वाचकत्वमसिद्धमेव। यस्मादर्थप्रतीतिः स एव स्फोटः।

अभिव्यक्तस्य स्फोटस्य अर्थप्रत्याययत्वमुत अनभिव्यक्तस्य इति पक्षद्वयस्यैव असम्भवात् स्फोटस्य अर्थप्रत्यायकत्वं न घटते इति मीमांसकानां मतिः। तथाहि, कोटिद्वययोः द्वितीयस्य अनभिव्यक्तस्फोटस्य अर्थप्रत्यायकत्वस्य स्वीकारे स्फोटस्य नित्यत्वात् सर्वदा अर्थावबोधरूपकार्यप्रसङ्गः। प्रथमपक्षस्य स्वीकारेऽपि पुनः अभिव्यञ्जयन्तो वर्णाः किं प्रत्येकमभिव्यञ्जयति सम्भूय वेति पक्षद्वयस्य सम्भावना। वर्णस्य वाचकत्वे या आपत्तयः समापतन्ति ता एव पक्षद्वये सम्भवन्ति। तथाहि, वर्णानां प्रत्येकं स्फोटस्य अभिव्यञ्जकत्वे अप्रसिद्धत्वात्

सिद्ध्यभावः। किञ्च, एकस्मादेव वर्णात् स्फोटस्य अभिव्यञ्जकत्वस्वीकारे पदस्य द्वितीयादिवर्णानां व्यर्थत्वप्रसङ्गः। वर्णानां क्षणिकत्वात् वर्णसमूहस्यासम्भवात्, तेन स्फोटव्यञ्जकत्वस्वीकाररूपद्वितीपक्षोऽपि नाद्रयितुं शक्यते।

किञ्च, विभक्त्यन्तेष्वेव वर्णेषु 'सुप्तिङन्तं पदम्'[16] इति पाणिनिना, 'ते विभक्त्यन्ताः पदम्'[17] इति गौतमेन च पदसञ्ज्ञाया विहितत्वात्सङ्केतग्रहेणानुग्रहवशाद्वर्णेष्वेव पदबुद्धिर्भविष्यति। तथा सति पूर्वपक्षे शंका क्रियते तर्हि सर इत्येतस्मिन्पदे यावन्तो वर्णास्तावन्त एव रस इत्यत्रापि। एवं 'वनं नवं' 'नदी दीना' 'रामो मारो' 'राजा जारे'त्यादिष्वर्थभेदप्रतीतिर्न स्यादिति चेन्न, क्रमभेदेन भेदसम्भवात्। तत्र तैः श्लोकवार्तिकस्थं कुमारिलभट्टपादवचनं प्रमाणत्वेन अङ्गीक्रियते -

"यावन्तो यादृशा ये च यदर्थप्रतिपत्तये।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः॥"इति।

अर्थात् येषु वर्णेषु अर्थबोधसामर्थ्यं विद्यते, ते यथाकथञ्चिद्वा भवतु नाम तस्यैवार्थस्य बोधकाः भवन्ति। अतः उभयोः समो दोषो न तेनैकश्चोद्यो भवतीति न्यायाद्वर्णानामेव वाचकत्वोपपत्तौ नातिरिक्तस्फोटकल्पनावकल्पत इति। सिद्धान्तिभिः प्रत्यवस्थीयते यत् तदेतत्काशकुशावलम्बनकल्पनम्। वर्णमात्रस्य पदप्रत्ययावलम्बनत्वं वर्णसमूहस्य वेति विकल्पद्वयोः एव अनुपपत्तिः। पुष्पेषु विना सूत्रं मालाप्रत्ययवत् परस्परविलक्षणवर्णमालायामभिन्नं निमित्तमेकं पदमिति प्रतिपत्तेरनुपपत्तिः आद्यपक्षस्य। नापि द्वितीयः उच्चरितप्रध्वस्तानां वर्णानां समूहभावासम्भवात्।

## उपसंहारः

एवं पूर्वपक्षं सम्यक् प्रतिरोध्य शाब्दिकैः स्फोटसिद्धिः क्रियते। स्फोट एव शब्दब्रह्म इत्युच्यते। ब्रह्मणः यथा सर्वमयत्वं सर्वानुस्यूतत्वं दृश्यते, तथैव स्फोटस्यापि सर्वानुस्यूतत्वमनुभूयते। तस्मात् स्फोटस्य शब्दब्रह्म इत्यपरं नाम। एवं संक्षेपेण शब्दब्रह्मस्वरूपमुपस्थाप्य विरम्यते विस्तारादिति शम्।

-★-

[16]पा० सू० १/४/१४
[17]न्या० सू० २/२/६०

# धातूनामनुबन्धविचारः

## जयदेवदिण्डा*

### ०. उपोद्धातः

पदसाधुत्वान्वाख्यानपरकं शास्त्रमिदं व्याकरणशास्त्रम्। ननु व्याकरणेन पदसाधुत्वान्वाख्यानम् अयुक्तम्। यतो हि लोके अखण्डवाक्यस्यैव अर्थबोधजनकत्वात् अस्मिन्नर्थे एतद्वाक्यं साधु इति शास्त्रेण विशिष्यैव सङ्केतो ग्राहयितव्यः। उक्तं च हरिणा–

पदे न वर्णा विद्यन्ते वाक्येष्ववयवा न च।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन॥ [वाक्यपदीयम्– १।७३।]

इति चेन्न। प्रतिवाक्ये सङ्केतसङ्ग्रहासम्भवात् तदन्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया पदानि प्रविभज्य, पदे प्रकृतिप्रत्ययभागकल्पनेन कल्पिताभ्याम् अन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं परिकल्पयन्ति स्म आचार्याः। पाणिनीयव्याकरणेऽपि इयमेव रीतिः अनुसृता। अत्र परिनिष्ठितशब्दरूपनिष्पत्तिपर्यन्तं प्रक्रिया निरूप्यते। पदञ्च सुबन्ततिङन्ताभ्यां द्विविधम्। सुबन्तप्रकृतिभूतप्रादिपदिकानि सर्वाण्यपि व्युत्पन्नान्येवेति शाकटायनमतम्।[१] तन्मते सर्वेषां पदानां मूलप्रकृतिभूता धातव एव। पाणिनिस्तु 'उणादयो बहुलम्' [पाणिनिसूत्रम्–३।३।१] इति सूत्रयन् केषाञ्चन पदानां प्रकृतिप्रत्ययविभागरहितत्वाद् अव्युत्पन्नत्वं स्वीचकार। परन्त्वेतन्मते तेषामपि स्वरवर्णानुपूर्वीज्ञानार्थं पृषोदराद्यादिगणे पाठः कर्तव्यः। अन्यथा 'शश' इति वक्तव्ये 'षष' इति 'पलाश' इति वक्तव्ये 'पलाष' चेति प्रयुक्ते साधुत्वमापद्येत।

तिङन्तरूपस्य पदस्य प्रकृतिः धातुः। धातवः एव वाक्प्रपञ्चस्य बीजभूताः। धातुभ्यः प्रत्ययान् विधाय पदानि संस्कृतानि पाणिनिना। 'भूवादयो धातवः' [पाणिनिसूत्रम्– १।३।१] इति पाणिनीयसूत्रम्। क्रियावाचकाः भूप्रभृतयः धातुसंज्ञां लभन्ते इति तदर्थः। पाणिनिः पञ्चविधान् पाठान् पठितवान्। तथाहि अभियुक्तवचनम्–

---

*शोधच्छात्रः, संस्कृतविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य

[१] "नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्" इत्युणादयो बहुलमिति सूत्रभाष्ये।

अष्टकं गणपाठश्च धातुपाठस्तथैव च।
लिङ्गानुशासं शिक्षा पाणिनेर्ग्रन्थपञ्चकम्॥ इति।

एवमपि श्रूयते पूर्वं व्याकरणं पाठैः पञ्चभिर्मुनिना कृतम् इति। सूत्रापाठः अष्टाध्यायी, धातुपाठः, गणपाठः, उणादिसूत्रपाठः, लिङ्गानुशासनम् इति ते पञ्चपाठाः। भ्वादिगणान्तर्गतानां श्रेणिः भूसत्तामित्येवम् उपक्रम्यमाणः धातुपाठः इति उच्यते।

## १. धातुशब्दनिर्वचनम्

धातुपाठे पठितस्य धातोः निर्वचनमेवम्– दधाति=धारयति क्रियारूपमर्थम्, भ्वादिगणपाठमर्यादाञ्च, दधाति='सर्वं नाम धातुजमाह' इति सिद्धान्ताद् निष्पादनद्वारा प्रातिपदिकानि पुष्णातीति वा धातुः। 'डुधाञ्-धारणे' इति धातोरौणादिकस्तुन् प्रत्ययः। यद्यप्येवं रीत्या धातुशब्दस्य निर्वचनमपि सम्भाव्यते, तथापि शब्दशास्त्रेऽस्मिन् सङ्केतकरणात् पारिभाषिकोऽयं धातुशब्दः। तत्राधुनिकसङ्केतः परिभाषा, तया चार्थबोधकं पदं पारिभाषिकम्। यथा शास्त्रकारसंकेतितगुणवृद्ध्यादि पदम्। तथा च क्रियावाचकत्वे सति भ्वादिगणपठितत्वे सति पाणिनीयसङ्केतसम्बन्धेन धातुपदवाच्यत्वमेव धातुत्वम्। तथा चाथर्वणे– "को धातुः किं प्रातिपदिकं कः प्रत्ययः"[२] इति।

धातु। पुं० धीयते सर्वमस्मिन्निति। धा+सितनिगमीति (उणा० १।६९।) इति तुन्। शब्दयोनिः। सा च धातुशब्दप्रकृतिः। भूपचपठप्रभृतिः इति शब्दकल्पद्रुमः।[३]

धातु। पुं० धीयते सर्वं निःक्षिप्यते सुषुप्त्यादावस्मिन् धा– आधारे तुन्। १.परमात्मनि। "स एष चिद्धातुः" श्रुतिः। दधाति शब्दान्। २.सर्वेषां नाम्नां प्रकृतिभूते भूप्रभृतौ तस्य लक्षणविभागादिकं शब्दार्थरत्नेऽस्माभिर्दर्शितम् इति वाचस्पत्यम्।[४]

"दधाति शब्दान् इति धातुः। सर्वेषां नाम्नां प्रकृतिभूतः भूप्रकृतिः। धातुर्नाम क्रियावाचको गणादिपठितः शब्दविशेषः। क्रिया च पूर्वोक्तफलानुकूलव्यापार एव। सर्वेषां च कारकाणाम् अन्वयोपपत्तये च धातूनां क्रियावाचकत्वाङ्गीकारात्–

---

[२]माधवीया धातुवृत्तिः, द्वारिकादासशास्त्री (सम्पा०), उपोद्घातः, पृ० ३५।

[३]शब्दकल्पद्रुमः (द्वितीयः भागः), पृ० ७९०।

[४]वाचस्पत्यम्, पृ० ३८६९।

शब्दार्थरत्नम्। क्रियार्थो धातुः– शाकटायनः हेमचन्द्राचार्यश्च। यः शब्दः क्रियां भावयति प्रतिपादयति सः धातुसंज्ञः भवति– दुर्गसिंहः (जैनव्याकरणस्य व्याख्याता)”[५] इति।

## २. धातुसङ्ख्या

धातूनां सङ्ख्याविषये सन्ति विदुषां वैमत्यानि। सिद्धान्तकौमुद्यां १९४३ धातवः दृश्यन्ते, येषु च कण्ड्वादयो नान्तर्भवन्ति। तेषु १०१० धातवो भ्वादिगणे, ७२ धातवः अदादिगणे, २४ धातवः जुहोत्यादिगणे, १४० धातवो दिवादिगणे, ३४ धातवः स्वादिगणे, १५७ संख्यकाः धातवो तुदादिगणे, रुधादिगणे २५ धातवः, १० सङ्ख्याकाः धातवः तनादिगणे, ६१ धातवः क्र्यादिगणे, ४१० धातवश्च चुरादिगणे विद्यन्ते। कण्ड्वादिगणे प्रायः ५० धातवः विद्यन्ते। पाणिनीयधातुपाठे पठिताः १९४३ धातवो धातुपाठे उपदिष्टत्वादौपदेशिकाः। ‘भूवादयो धातवः’ [पाणिनिसूत्रम्– १।३।१] इत्यनेन भवति एतेषां धातुसंज्ञा। औपदेशिकेभ्यः अतिरिक्ताः सनादयोऽपि द्वादश आतिदेशिकधातवः सन्ति। एते सनाद्यन्ताः समुदायाः ‘सनाद्यन्ताः धातवः’ [पाणिनिसूत्रम्– ३।१।३२] इत्यनेन धातुसंज्ञकाः भवन्ति। सनादयः प्रत्ययाः–

सन्क्यच्काम्यच्क्यङ्क्यषोऽथाचारक्विम्-णिज्यङौ तथा।
यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः॥[६] इति।

जनार्दनहेगडेवर्याणां मते धातुपाठे ‘प्रायः’ २००० धातवः उपदिष्टाः। धातुसङ्ख्यानिर्देशावसरे प्रायः इति किमर्थमुच्यते? समाधानन्तु इत्थम्– वस्तुतः धातुपाठे बहूनां धातूनां पुनः पाठः विभिन्नप्रयोजनं मनसि निधाय कृतः दृश्यते। विषयेऽस्मिन् कौमुद्यां काश्चन पङ्क्तयः यथा– णुद प्रेरणे (१४२७) कर्त्रभिप्रायेऽपि फले परस्मैपदार्थः पुनः पाठः। षद्लृ विशरणगत्यवसादनेषु (१४२८) इह पाठो नुम्विकल्पार्थः। शद्लृ शातने (१४२९) इहि स्वरार्थ एव पुनः पाठः। व्युष विभागे (१२१६) अयं दाहे पठितः। अर्थभेदने तङर्थः पुनः पठ्यते। एतादृशं पुनःपाठादिकं न परिगणितं चेत् धातवः प्रायः १७०० भवेयुः।

वस्तुतः कौमुद्यां यद्यपि संख्यया द्विसहस्रं धातवः निर्दिष्टाः, किन्तु तावन्तः एव तत्र सन्ति इति तु नार्थः। इत्येके इत्यन्ये इत्यादीनि वचनानि तत्र तत्र श्रूयन्ते। तेषां

---

[५]धातुरूपनन्दिनी, उपोद्घातः, पृ० i.

[६]धातुरूपनन्दिनी, उपोद्घातः– i, ii.

धातूनां रूपाण्यपि प्रदर्श्यन्ते। एकान्यादिपदैः प्रायः क्षीरस्वामिमैत्रेयरक्षितादयः एव परामृश्यन्ते। तादृशानामपि धातूनां यदि सङ्ख्यादानं स्यात्तर्हि तत्रापि धातुसङ्ख्या अधिका स्यादेव।

अन्यच्च, कौमुद्यामपि भ्वादेः, दिवादेः, चुरादेः च आकृतिगणत्वमभ्युपगम्यते। दिवादेः अन्ते लिख्यते– “दिवादिस्तु भ्वादिवदाकृतिगणः। तेन क्षीयते मृग्यतीत्यादिसिद्धिः”[७] इति। एवमेव चुरादावन्ते लिखति– “एवमान्दोलयति। प्रेङ्खलयति। विडम्बयति। अवधीरयति इत्यादि। अन्ये तु दशगणीपाठो बहुलम् इत्याहुः। तेनापठिता अपि सौत्रलौकिकवैदिका बोध्याः। अपरे तु नवगणीपाठो बहुलम् इत्याहुः। तेनापठितेभ्योऽपि क्वचित्स्वार्थे णिच्। ‘रामो राज्यमचीकरत्’ इति यथेत्याहुः। चुरादिभ्य एव बहुलं णिजित्यर्थ इत्यन्ये। सर्वे पक्षाः प्राचां ग्रन्थे स्थिताः”[८] इति।

अतः कौमुद्युक्ते धातुपाठे अप्रविष्टाः अपि धातवः सन्ति, ते च पाणिनिसम्मताः एव इति सिद्धं भवति। येषां पाठभेदाः सम्मताः तेषामुल्लेखं कृत्वापि धातुसङ्ख्यापरिगणनावसरे संयोजनं न कृतं कौमुद्याम्। अत एव ‘द्विसहस्रं धातवः’ इति सामान्येन उच्यते। पाणिनीयधातुपाठे अनन्तर्भाविताः धातवोऽपि शिष्टसम्मताः एव। अतः एव धातुसङ्ख्यायाः इयत्तानिर्देशः क्लेशाय। तस्मात् प्रायोवादः एव एत्र शरणम्। अतः एव क्षीरस्वामिना उच्यते–

पाठेऽर्थे चागमभ्रंशान्महतामपि मोहतः।
न विद्मः किं जहीमोऽत्र किमुपादद्महे वयम्॥[९] इति।

## ३. धातुप्रकाराः

क्रियावाचिनो भ्वादयो धातुसंज्ञकाः स्युः। धातुर्नाम क्रियावाचको गणादिपठितः शब्दविशेषः। क्रिया च पूर्वोक्तफलानुकूलो व्यापार एव सर्वेषाञ्च कारकाणामन्वयोपपत्तये कालान्वयोपपत्तये च धातूनां क्रियावाचकत्वाङ्गीकारात्। क्रियावाचकानां धातूनां प्रकाराः तत्र तत्र ग्रन्थेषु निर्दिष्टाः। ते च प्रकारा अधः सङ्क्षेपेण उपस्थाप्यन्ते–

---

[७]सिद्धान्तकौमुदी (तृतीयः भागः), पृ० ३४२।

[८]तत्रैव, पृ० ४२३-४२४।

[९]धातुरूपनन्दिनी, उपोद्घातः– i, ii.

## ३.१. सामान्यप्रकारः

क्रियावाचकाश्चेते धातवः सामान्यतया पञ्चविधा परिकल्प्यन्ते शास्त्रकारैः–

**३.१.१. औपदेशिकधातवः**– पाणिनीयधातुपाठे पठिताः १९९३ धातवो धातुपाठे उपदिष्टत्वादौपदेशिकाः धातवः उच्यन्ते। एतेषां 'भूवादयो धातवः' [पाणिनिसूत्रम्– १।३।१] इत्यनेन धातुसंज्ञा विधीयते। एतेषु कण्ड्वादयोऽपि अन्तर्भवन्ति। एते सामान्यधातव इत्यपि उच्यन्ते।

**३.१.२. आतिदेशिकधातवः**– सनादिद्वादशप्रत्यययोजनेन येषां धातुत्वं प्राप्नोति ते आतिदेशिकधातवः। एते सनादयोऽन्ते येषां ते सनाद्यन्ताः समुदायाः 'सनाद्यन्ता धातवः' [पाणिनिसूत्रम्– ३।१।३२] इत्यनेन धातुसंज्ञकाः भवन्ति। एते सनाद्यन्तधातवः इत्यभिधीयन्ते।

**३.१.३. सौत्रधातवः**– पाणिनीयधातुपाठे न सन्तोऽपि केवलम् अष्टाध्यायी-सूत्रपाठे पठिताः धातवः सौत्रधातवः इत्यभिधीयन्ते।

**३.१.४. सोपसर्गधातवः**– उपसर्गयोजनेन येषां धातुत्वं निष्पन्नं ते सोपसर्ग-धातवः इत्युच्यन्ते। निश्चिनुते, निर्णयते इत्यादयः सोपसर्गधातवः।

**३.१.५. निपातयुक्तधातवः**– साक्षात्करोति, साक्षीभवति, दार्ढ्यीभवति, प्रमाकुरुते इत्यादयः निपातयुक्तधातवः।

## ३.२. भोजराजकृतधातुविभागः

भोजराजेन शृङ्गारप्रकाशे धातोः षड्प्रकाराः निर्दिष्टाः। ते च क. परिपठिताः, ख. अपरिपठिताः, ग. परिपठिताऽपरिपठिताः, घ. प्रत्ययधातवः, ङ. नामधातवः, च. प्रत्ययनामधातवश्चेति। तेषु–

**३.२.१. परिपठिताः**– पाणिनीयधातुपाठे पठिताः भूवादयो धातवः परिपठिताः धातवः।

**३.२.२. अपरिपठिताः**– अपरिपठिताः आन्दोलयतीत्यादयः। 'बहुलमेतत् निदर्शितम्' इति धातुपाठस्य बाहुलकत्वकथनेन धातुपाठे सूत्रेषु वा अनिर्दिष्टा अपि साधुत्वेन प्रयुक्ताः। अनेन प्रकाशकृतः कृतौ उक्ता आन्दोलयतीत्यादयः, निपातयुक्ताश्च धातुप्रकारा धातुत्वेन स्वीकर्तुं शक्याः इति तु निर्विवादमेव।[१०]

---

[१०]सङ्का उषाराणी, सङ्गणकयन्त्रोपयोगाय शाब्दबोधमाश्रित्य कतिपयधातूनाम् अर्थविचारपूर्वकं

**३.२.३. परिपठिताऽपरिपठिताः–** ये धातवः धातुपाठेषु भूवादिषु न पठिताः, परन्तु सूत्रेष्वेवान्तर्भाविवितास्ते परिपठिताऽपरिपठिताः धातवः 'स्कु' इत्यादयः।

**३.२.४. प्रत्ययधातवः–** सनादिप्रत्ययसंयोजनेन येषां सनाद्यन्तानां धातुत्वं प्राप्नोति ते सनाद्यन्ताधातवः प्रत्ययधातवत्वेन अभिधीयन्ते।

**३.२.५. नामधातवः–** कण्ड्वादिगणे पाणिनिपठिताः ५० धातवः शृङ्गरप्रकाशमते नामधातवः।

**३.२.६. प्रत्ययनामधातवः–** येभ्यः परिपठितधातुभ्यो नामत्वसिद्धये, नामभ्यो वा धातुत्वसिद्धये क्विबादिप्रत्यया लुप्यन्ते ते प्रत्ययाः नामानि च धातवश्चेति प्रत्ययनामधातवः। यथा होड, गल्भ क्लीबेत्यादयः।

## ३.३. पुष्पादीक्षितकृतधातुविभागः

अष्टाध्याय्याम् अजन्तधातुभ्यः प्रत्ययविधानम् अन्त्यवर्णक्रमेण क्रियते अङ्गकार्यमपि तथैव। हलन्तेभ्यः धातुभ्यः प्रत्ययविधानमुपधाक्रमेण क्रियतेऽङ्गकार्यमपि तथैव। अतो डा० पुष्पादीक्षितमहोदयया प्रक्रियानिर्वाहाय पाणिनीयधातुपाठान्तर्गतानां धातूनां प्रक्रियाक्रमानुसारेण सार्वधातुकार्धधातुकप्रत्ययव्यवस्थामधिकृत्य अजन्तधातवः हलन्तधातवश्चेति विभागः कृतः।

**३.३.१. अजन्तधातवः–** अजन्ते येषां धातूनां तेऽजन्तधातव इति। सामान्यशास्त्रम् अचमाश्रित्यैव प्रवर्तते। अजन्तधातवः– १. आकारान्ताः २. इकारान्ताः ३. ईकारान्ताः ४. उकारान्ताः ५. ऊकारान्ताः ६. ऋकारान्ताः ७. ॠकारान्ताः ८. एजन्ताः इत्यष्टधा विभक्ताः।

**३.३.२. हलन्तधातवः–** हलन्ते येषां धातूनां ते हलन्तधातव इति। सामान्यशास्त्रम् अन्त्यमचमाश्रित्य न प्रवर्तते, परन्तु उपधामाश्रित्यैव प्रवर्तते। हलन्तधातवः– १. अदुपधाः २. इदुपधाः ३. उदुपधाः ४. ऋदुपधाः ५. शिष्टधातव इति पञ्चधा विभक्ताः।

## ४. अनुबन्धविचारः

पाणिनिना धातुपाठे धातवः सानुबन्धैः पठिताः। ननु को नाम अनुबन्धः। भट्टोजिदीक्षितमतानुसारेण 'इत्संज्ञावत्त्वमनुबन्धत्वम्' इति। नागेशमते तु

---

कारकविश्लेषणम्, शोधः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः, पृ० ४६।

'इत्संज्ञायोग्यत्वमनुबन्धत्वम्' इति। उभयोः नागेशमतं युक्तियुक्तम् इति व्याख्याकारैः सविस्तरं प्रपञ्चितम्। कारणं यद्यपि तस्य इत्संज्ञा न भवति परन्तु भाविनि काले इत्संज्ञा भविष्यतीत्यस्ति इत्संज्ञायोग्यत्वम्। इल्लोपयोः नास्ति पर्यायवाचकत्वम्। इत्संज्ञकस्य वर्णस्य 'तस्य लोपः' (१।३।९) इत्यनेन लोपो भवति।

## ४.१. धातूनामित्संज्ञाविधायकानि सूत्राणि

इत्संज्ञायाः प्रयोजनं सर्वव्यापि विद्यते व्याकरणशास्त्रे। अथास्मिन् धातुपाठेऽपेक्षितानि इदादिशास्त्राण्यष्टाध्याय्याः एवावगन्तव्यानि, इहोक्तानि 'उदात्तः परस्मैभाषः' इत्यादीनि तु सम्प्रदायानुगतोपदेशात्। धातुना योजिताः इत्संज्ञाः, तत्प्रयोजनानि च एवं विव्रियन्ते। तत्र आदौ इत्संज्ञाविधायकानि सूत्रवार्तिकानि–

**४.१.१. उपदेशेऽजनुनासिक इत् (१।३।२)**– उपदेशेऽनुनासिकोऽजित्संज्ञः स्यादिति। उपदेश आद्योच्चारणम्। स च धातुपाठप्रातिपदिकपाठौ, सूत्रवार्तिके च। एतैर्हि शब्दा उपदिश्यन्ते– एधँ, स्पर्धँ, इत्यादयः। अत्रान्त्योऽकारोऽनुनासिकः। सूत्रकारकृतः इदानीमयमनुनासिकपाठः परिभ्रष्टः। तेन हि प्रतिज्ञानुनासिक्याः पाणिनीयाः, इह गुरूपदेशादेवाधुनानुनासिकज्ञानमित्यर्थः। उपदेशे किम्? अभ्र आँ अपः– लाक्षणिकमत्रानुनासिकत्वम्। अनुनासिकः किम्? चिरिणोति। प्रयोजनाभावे न कस्यापीत्संज्ञा, 'इदमर्थाभावात्सिद्धम्' (१।३।३ वा०, १।२।७ वा०) इति वार्तिकवचनाज्ज्ञायते। यथा 'बह्वल्पर्थाच्छस् कारकादन्यतरस्याम्' (५।४।४२) इत्यादिना विहितस्य शसः सकारस्य न लोपः, प्रयोजनाभावात्। तस्मादेव बहुशः, अल्पशः इत्यादिसिद्धिः।

**४.१.२. हलन्त्यम् (१।३।३)**– उपदेशेऽन्त्यं हलित्स्यादिति। अन्ते भव इति अन्त्यः। उपदेशविषये कारिकेयम्–

धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्।
आगमप्रत्ययादेशा उपदेशाः प्रकीर्त्तिताः[११]॥ इति।

यथा– शीङ्, कृञ्, धूञ्, क्षमूष्, इक्, इण्, मृङ्, चक्षिङ्, दाप्, दैप्, दाण्, ओहाक् इत्यादीनां धातूनाम् उपदेशेऽन्त्यस्य हलः अनेन इत्संज्ञा विधीयते।

[११]सिद्धान्तकौमुदी (प्रथमो भागः), बालमनोरमा, पृ० ११।

**४.१.३. आदिर्ञिटुडवः (१।३।५)**– उपदेशे धातोराद्याः एते ञिटुडवः इतः भवन्ति। उपदेशे किम्? ञिकारीयति। आदिः किम्? पटूयति। अस्ति हि पृथ्वादिषु पटशब्दोपदेशः।

**४.१.४. इर इत्संज्ञा वाच्या (वा० २२६८)**– इर इत्संज्ञा स्यात्। श्च्युतिर्– अश्च्युतत्। घुषिर्– अघुषत्। दृशिर्– अदर्शत्।

## ४.२. इत्त्वफलम्

“न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्याः विज्ञातुम्”[१२] इति भाष्यवचनात् लाघवमपि शब्दानुशासनस्यास्य अनतिसाधारणं प्रयोजनमिति विज्ञायते। अत्र शङ्का भवति यत्र व्याकरणे लाघवमपि मुख्यं प्रयोजनं तत्र येषाम् इत्संज्ञया लोपो भवति तेषाम् अनुबन्धानां योजनं धातुषु पाणिनिना किमर्थं विहितम्। किं वा धातुषु विद्यमानानामनुबन्धानां फलम्। शङ्कामिमां मनसि निधाय संक्षेपतः इत्संज्ञाफलं विचार्यते–

**४.२.१. आदित्फलम्**– ‘आदितश्च’ (७।२।१६) इत्यनेन धातोराकारेतो निष्ठायामिणः निषेधो भवति। यथा– ञिमिदा– मिन्नः, मिन्नवान्। ञिक्ष्विदा– क्षिण्णः, क्षिण्णवान्।

‘विभाषा भावादिकर्मणोः’ (७।२।१७) इत्यनेन भावे आदिकर्मणि चादितो धातोर्वा निष्ठायामित् स्यादिति। यथा– मिन्नमनेन, मिदितमनेन। प्रमिन्नः, प्रमेदितः।

**४.२.२. इदित्फलम्**– ‘इदितो नुम्धातोः’ (३।१।५८) इत्यनेन इदितो धातोर्नुम् स्यादिति। मित्त्वादन्त्यादचः परः नुमागमो भवति। यथा– स्कुदि– स्कुन्दते। टुनदि– नन्दति। कुडि– कुण्डिता। हुडि– हुण्डितुम्। वदि– वन्दते। स्पदि– स्पन्दते। स्पन्दितव्यम्। स्पन्दनम्।

**४.२.३. ईदित्फलम्**– ‘स्वीदितो निष्ठायाम्’ (७।२।१४) इत्यनेन श्वयतेरीदितश्च निष्ठायामिन्न स्यादिति। यथा– टुओश्वि– शूनः, शूनवान्। ओलजी– लग्नः, लग्नवान्। ओविजी– विग्नः, विग्नवान्। उन्दी– उन्नः, उत्तः।

**४.२.४. उदित्फलम्**– ‘उदितो वा’ (७।२।५६) इत्यनेन उदितः परस्य क्त्व इड् वा स्यादिति। यथा– शमु– शमित्वा, शान्त्वा। दिवु– दीवित्वा, द्यूत्वा। क्रमु– क्रमित्वा, क्रान्त्वा, क्रन्त्वा। दमु– दमित्वा, दान्त्वा।

---

[१२] महाभाष्यम्, पस्पशाह्निकम्, पृ० २६।

**४.२.५. ऊदित्फलम्**– 'स्वरतिसूतिसूयतिधूञूदितो वा' (७।२।४४) इत्यनेन स्वरत्यादेः ऊदितश्च परस्य वलादेरार्धधातुकस्येड् वा स्यादिति। यथा– षिधू– सेद्धा, सेधिता। सेद्धव्यम्, सेधितव्यम्। गाहू– गाढा, गाहिता। गाढुम्, गाहितुम्। गुपू– गोप्ता, गोपिता, गोपायिता। स्वृ– स्वर्ता, स्वरिता। षूङ्– सोता, सविता। सोष्यते, सविष्यते।

**४.२.६. ॠदित्फलम्**– 'नाग्लोपिशास्वृदिताम्' (७।४।२) इत्यनेन णिच्यग्लोपिनः शास्तेर्ॠदिताञ्च उपधाया ह्रस्वो न स्याच्चङ्परे णौ इति। यथा– मालामाख्यद् अममालत्। मारतरमाख्यत् अममातरत्। शासु– अन्वशासत्। बाधृ– अबबाधत्। याचृ– अययाचत्।

**४.२.७. ऌदित्फलम्**– 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' (३।१।५५) इत्यनेन श्यन्विकरणपुषादेर्द्युतादेः ऌदितश्च परस्य च्लेरङ् स्यात् परस्मैपदेषु इति। यथा– घसॢ– अघसत्। गमॢ– अगमत्। सृपॢ– असृपत्। शकॢ– अशकत्। आपॢ– आपत्। पुष– अपुषत्। शमु– अशमत्। द्युत्– अद्युतत्। वृतु– अवृतत्। परस्मैपदेषु किम्? अद्योतिष्ट, अवर्त्तिष्ट।

**४.२.८. एदित्फलम्**– 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्' (७।२।५) इत्यनेन ह्म्यन्तस्य क्षणादेर्ण्यन्तस्य श्वयतेरेदितश्च वृद्धिर्न स्यादिडादौ सिचि इति। यथा– ग्रह– अग्रहीत्। भ्रम– अभ्रमीत्। टुवम– अवमीत्। क्षण– अक्षणीत्। जागृ– अजागरीत्। ण्यन्तस्य– ऊन– औनयीत्। इल– ऐलयीत्। अर्द– आर्दयीत्। छन्दस्येव ण्यन्तस्योदाहरणम्। भाषायान्तु चङ् स्यात्। औननत् (मतान्तरे ओनिनत्)। ऐलिलत्। "येनार्दिदद् दैत्यपुरं पिनाकी" इति। श्वि– अश्वयीत्। एदिताम्– कटे– अकटीत्। रगे– अरगीत्। हसे– अहसीत्। कखे– अकखत्।

**४.२.९. ओदित्फलम्**– 'ओदितश्च' (८।३।४५) इत्यनेन ओदितो निष्ठातकारस्य नकारः स्यादिति। यथा– ओलस्जी– लग्नः, लग्नवान्। ओविजी– उद्विग्नः, उद्विग्नवान्। ओप्यायी– पीनः। भुजो– भुग्नः। रुजो– रुग्णः। टुओश्वि– शूनः। ओहाक्– हीनः। ओहाङ्– हानम्। 'स्वादय ओदितः' इति स्वादिगणसूत्रम्। षूङ्– सूनः। दीङ्– दीनः। डीङ्– उड्डीनः।

**४.२.१०. अग्लोपफलम्**– 'सन्वल्लघुनि चङ्परेऽनग्लोपे' (७।४।९३) इत्यनेन चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपरस्तस्य सनीव कार्यं स्यात् णावग्लोपेऽसति

इति। यथा अचीकरत्। अचीकमत्। अशिश्रवत्। लघुनि किम्? अततक्षत्। चङ्परे किम्? अहं पपच। परग्रहणं किम्? केवले चङि एव मा भूत्। अचकमत्। अनग्लोपे किम्? अचकथत्। दृषदमाख्यत् अददृषत्। णावग्लोपे सन्वद्भावनिषेधः फलम्।

४.२.११. **इरित्फलम्**– 'इरितो वा' (३।१।५७) इत्यनेन इरितो धातोश्च्लेरङ् वा स्यात् परस्मैपदे परे इति। यथा– भिदिर्– अभिदत्, अभैत्सीत्। छिदिर्– अच्छिदत्, अच्छैत्सीत्। दृशिर्– अदर्शत्, अद्राक्षीत्। परस्मैपदे किम्? अभित्त' अच्छित्त।

४.२.१२. **ञीत्फलम्**– 'ञीतः क्तः' (३।२।१८७) इत्यनेन ञीतो धातोर्वर्तमाने क्तः स्यादिति। यथा– ञिभिदा– भिन्नः। ञिधृषा– धृष्टः। ञिइन्धी– इद्धः। ञिक्ष्विदा– क्ष्विण्णः।

४.२.१३. **ट्वित्फलम्**– 'ट्वितोऽथुच्' (३।३।८९) इत्यनेन ट्वितो धातोरथुच् स्याद् भावे इति। यथा– टुवेपृ– वेपथुः। टुओश्वि– श्वयथुः। टुमस्जो– मज्जथुः। टुनदि– नन्दथुः।

४.२.१४. **ड्वित्फलम्**– 'ड्वितः क्त्रिः' (३।३।८८) इत्यनेन ड्वितो धातोः क्त्रिः स्याद् भावे इति। 'क्त्रेर्मम् नित्यम्' (४।४।२०) इति ततो मप्। यथा– डुलभष्– लब्ध्रिमम्।

४.२.१५. **मित्फलम्**– 'मितां ह्रस्वः' (६।४।९२) इत्यनेन मितामुपाधाया ह्रस्वः स्याण्णौ परे। ज्ञापयति। यथा– घटयति। व्यथयति। जनयति। शमयति।

'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (६।४।९३) इत्यनेन चिण्परे णमुल्परे च णौ मितामुपाधायाः दीर्घो वा स्यादिति। यथा– अशमि, अशामि। अक्षञ्जि, अक्षाञ्जि।

४.२.१६. **षित्फलम्**– 'षिद्भिदादिभ्योऽङ्' (३।३।१०४) इत्यनेन षिद्भ्यो भिदादिभ्यश्च स्त्रियामङ् स्यादिति। यथा– जृष्– जरा। त्रपूष्– त्रपा। क्षमूष्– क्षमा। डुपचष्– पचा। भिदा।

४.२.१७. **ङित्फलम्**– 'अनुदात्तङित आत्मनेपदम् (१।३।१२) इत्यनेन अनुदात्तेत उपदेशे यो ङित् तदन्ताच्च धातोर्लस्य स्थाने आत्मनेपदं स्यादिति। अनुदात्तेतो धातवो धातुपाठाज्ज्ञातव्याः। यथा– षूङ्– सूते, सूयते। शीङ्– शेते, शिश्ये।

४.२.१८. **अनुदात्तेत्फलम्**– 'अनुदात्तेतश्च हलादेः' (३।२।१४९) इत्यनेन

अनुदात्तेतश्च हलादेः अकर्मकाद् युच् स्यादिति। वृतु– वर्तनः। वृधु– वर्धनः। विवक्षणः। अनुदात्तेतः किम्? भविता। हलादेः किम्? एधिता। आदिग्रहणं किम्? जुगुप्सनः। मीमांसनः। अकर्मकात् किम्? वसिता, वस्त्रम्।

४.२.१९. **ञित्फलम्**– 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' (१।३।७२) इत्यनेन स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले इति। यथा– यजते, यजति। स्वरितेतो धातवो धातुपाठादवगन्तव्याः।

इदं फलितम्– अनुदात्तेद् धातुरात्मनेपदी। स्वरितेद् उभयपदी। उदात्तेत् परस्मैपदीति। उदात्तेच्च धातुः धातुपाठे एव निर्दिष्टः। धातुष्वेतान् विहाय अपरे केचित् कित्, णित्, पिच्च दृश्यन्ते। तत्र इण्दाणौ णितौ। इक्, ओहाक् च कितौ। दाप्दैपौ च पितौ इति।

-★-

# हरिनामामृतव्याकरणे द्वयसंज्ञाविमर्शः

नित्यानन्दमान्ना*

## १.१. उपोद्घातः

प्रपञ्चेऽस्मिन् सर्वेऽपि प्राणिनः सुखं मे भूयादिति चेष्टन्ते। धर्मेणैव खलु निरतिशयं सुखं लभ्यम्। तस्य च धर्मस्य मूलं वेदः। संसारे प्रवृत्तानां सर्वासामपि विद्यानां मूलं भगवतो निःश्वासभूताः परमपूताः वेदाः एव। वेदस्य षडङ्गेषु व्याकरणं प्रधानम्। पाणिनीयशिक्षायाम् अपि तदेव प्रतिपादितम्– 'शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्'[१] इति। व्याकरणं प्रातिशाख्यमूलम्। वेदानां प्रतिशाखम् आश्रित्य ये व्याकरणग्रन्थाः आसन् ते प्रातिशाख्यग्रन्थाः इति उच्यते। शब्दशास्त्रं समधिगम्य स्वाशयं प्रतिपादितं वाक्यपदीये भर्तृहरिणा यथा–

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥[२] इति।

यद्यपि न्याय-वैशेषिक-सांख्य-योग-उत्तरमीमासा-पूर्वमीमासांख्येषु षडास्तिकदर्शनेषु व्याकरणस्य नाम न स्वीकृतं, तथापि परवर्तिकाले व्याकरणस्य सिद्धान्तनिचयः व्याकरणदर्शनरूपेण भारतीयपरम्परायां सश्रद्धं गृहीतम्। महाभाष्यकारः पतञ्जलिः स्वकीये महाभाष्ये व्याकरणस्य रक्षोहागमलघ्वसन्देहरूपपञ्चमुख्यप्रयोजनानि त्रयोदशानुषङ्गिकप्रयोजनानि च विशदीकरोति। तस्य मतेन शब्दानामनुशासनं तु व्याकरणस्य साक्षात् प्रयोजनम्। वेदरक्षायै वाग्व्यवहाराय च व्याकरणस्य महती भूमिका वर्तते इति वाक्यपदीयकारेण प्रतिपादितम्।[३] पाणिनेः प्राग् ऊर्ध्वञ्च बहवः प्रसिद्धवैयाकरणाः तेषां स्वकीयव्याकरणपरम्परामुद्भावयामासुः। तासु वैष्णवव्याकरणपरम्परासु जीवगोस्वामिनः श्रीहरिनामामृतव्याकरणम् अन्यतमम्। क्रैस्तोत्तरषोडशशतके भक्तिविग्रहस्य श्रीचैतन्यस्य शिष्यः पण्डितप्रवरो जीवगोस्वामी श्रीहरिनामामृतव्याकरणं विरचय्य

---

*शोधच्छात्रः, संस्कृतविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य

[१]पाणिनीयशिक्षा ४२।

[२]वाक्यपदीयम् १.११६।

[३]तत्रैव ११-१७।

वैष्णवमनस्तोषिणीं व्याकरणपरम्परामुदभावयत्। अस्य व्याकरणस्य प्रारम्भिकश्लोकेषु श्रीहरिनामामृतव्याकरणरचनायाः प्रयोजनं विवृतमस्ति। तद्यथा श्रीहरिनामसंकेतादिभिर्विघ्नध्वंसपूर्वकं परमानन्दावाप्तिः। अस्य हरिनामामृत-व्याकरणस्य द्वयसंज्ञाविमर्शः एव मम प्रबन्धस्य विषयः।

## १.२. ग्रन्थकर्तृपरिचयः

श्रीमद्भागवतस्य दशमस्कन्धस्य लघुतोषिणीटीकायां स्ववंशपरिचयः जीवगोस्वामिना कैश्चिच्छ्लोकैः लिखितः। स वल्लभस्य पुत्रः आसीत्। वल्लभस्य भ्रातरौ अमरसन्तोषौ स्ववैदुष्येण वङ्गदेशस्य महम्मदीयराज्ञः हुसेन्साहस्य मन्त्रिपदं प्राप्तवन्तौ। चैतन्यदेवस्य दर्शनानन्तरं इमौ द्वौ भ्रातरौ मन्त्रिपदं परित्यज्य सर्वस्वं च परित्यज्य वृन्दावनं प्रस्थितवन्तौ। तत्र तौ श्रीचैतन्यदेवस्य शिष्यत्वं स्वीकृत्य वैष्णवधर्ममते दीक्षितौ सन्तौ रूपसनातनौ इति अभिधीयमानौ संन्यासिरूपेण जीवनमतिवाहितवन्तौ। तयोः रूपसनातनयोः भातुष्पुत्रः जीवगोस्वामी नैकान् ग्रन्थान् विरचय्य वैष्णवसाहित्यं सुसमृद्धं कृतवान्।

## १.३. ग्रन्थपरिचयः

ग्रन्थेऽस्मिन् चतुरशीतिः श्लोकाः द्विनवत्यधिकैकशताधिकत्रिसहस्रं (३१९२) सूत्राणि, सप्त प्रकरणानि च विराजन्ते। तानि प्रकरणानि तावत् क्रमशः १. संज्ञासन्धिप्रकरणम्, २. विष्णुपदप्रकरणम्, ३. आख्यातप्रकरणम्, ४. कारकप्रकरणम्, ५. कृदन्तप्रकरणम्, ६. समासप्रकरणम्, ७. तद्धितप्रकरणञ्चेति।

## २.१. द्वयम्

भगवता जीवगोस्वामिना द्वयसंज्ञाविधायकं सूत्रं कृतं- 'तदादिद्वये द्वयम्' (हरिनामामृतव्याकरणसूत्रम् ३८) इति। वृत्तौ तेन लिखितं– 'यो वर्णो निर्दिश्यते, तदादिद्वये वाच्ये द्वय-शब्दो देयः, यथा– अद्वयम्, इद्वयम् इत्यादि। अस्य लक्ष्मीनारायणवाचित्वाद्भगवन्नामता तन्मन्त्रो हि द्वयमन्त्राख्यः पद्मपुराणे। अवर्णः इत्यादि च प्राचाम्। अकार इत्यादि च पाणिनेः' इति। वर्णक्रमाधिकारे पठिते द्वयसंज्ञाविधायके अस्मिन् सूत्रे पदद्वयं विद्यते। तदादिद्वये इति सप्तम्येकवचनान्तं पदम्। द्वयम् इति प्रथमैकचनान्तं पदम्। षड्विधसूत्रेषु संज्ञासूत्रमिदम्। सूत्रस्यास्य संज्ञापदं द्वयम्। संज्ञिपदं तदादिद्वये इति। तेन सूत्रार्थः जायते– तदादिद्वयवाच्यं द्वयसंज्ञकं भवति। द्वयसंज्ञा केवलं स्वरवर्णानामेव भवति इति वक्तव्यं न तु व्यञ्जनानां, व्यञ्जनेषु द्वयसंज्ञायाः प्रयोगाभावात्। पाणिनीयव्याकरणे तु द्वयसंज्ञासमाना काचित्

संज्ञा न दृश्यते तत्र प्रयोजनाभावात्। तत्र प्रयोजनाभावे कारणं माहेश्वराणि सूत्राणि। तेषु सूत्रेषु दीर्घस्वरवर्णानां पाठो नास्ति। ग्रहणकसूत्रबलात्[४] एकेनैव स्वरपाठेन ह्रस्वदीर्घप्लुतानां ग्रहणं भवति।

हरिनामामृतव्याकरणे प्लुतस्य प्रक्रियायां प्रयोगः न दृश्यते इति महापुरुषसंज्ञाविवरणावसरे अस्माभिः दर्शितम्। तेन प्रक्रियायां क्वचित् ह्रस्वदीर्घयोः वर्णयोः ग्रहणम् अपेक्षितं तत्र द्वयसंज्ञायाः प्रयोगः क्रियते। इदं कार्यं पाणिनीये तन्त्रे अणुदित्सवर्णस्य चाप्रत्यय (पाणिनीयसूत्रम् १.१.६९) इति ग्रहणकसूत्रेण क्रियते। अनेन सूत्रेण अपि सवर्णयोः द्वयोः ग्रहणम् एव क्रियते। तेन इयं संज्ञा अपि ग्रहणकसंज्ञा इति वयं वक्तुम् उत्सहामहे। द्वयशब्दः लक्ष्मीनारायणवाची। तेन द्वयशब्दस्य भगवद्वाचित्वात् तत्र द्वित्वसङ्ख्यासाम्यात् च द्वयसंज्ञाविधानं सार्थकम्। द्वयसंज्ञायाः प्रयोगः त्रयोविंशतिसूत्रेषु वर्तते। तानि यथा–

१. ऋद्वय-ऌद्वययोरेकात्मकत्वं वाच्यम् (ह.सू.[५] ४७)
२. अद्वयमिद्वये ए (ह.सू. ४८)
३. उद्वये ओ (ह.सू. ५०)
४. ऋद्वये अर् (ह.सू. ५२)
५. ऌद्वये अल् (ह.सू. ५३)
६. उद्वयग्रहगुहेभ्यो नेट् सनि, ईशसमीपाद्विष्णुजनादनिङ्वन् कपिलः, ईशाच्च, मृजेर्नेति केचित् (ह.सू. ८१५)
७. अद्वयस्य ई क्यनि (ह.सू. ८७९)
८. ओद्वयस्यावावौ प्रत्यय-ये (ह.सू. ८८०)
९. शप्-श्याभ्यां शतुर्नुम् ई-प्रत्यये, शेषाद्वयात्तु वा (ह.सू. १२४३)
१०. ऋद्वयविष्णुजनाभ्यां ण्यत् (ह.सू. १३९२)
११. उद्वयाण्णयदावश्यते (ह.सू. १३९६)
१२. अनुपेन्द्राद्वयधिजपिभ्यां, वा स्वनहसाभ्यां समुपविनिभ्यश्च यमः, नेर्गद-नद-पठ-स्वनेभ्यः (ह.सू. १६४५)

---

[४] अणुदित् सवर्णस्य चाप्रत्ययः (पाणिनीयसूत्रम् १.१.६९)।

[५] हरिनामामृतव्याकरणसूत्रम्।

१३. न दिव उराम उद्वयवर्जितसर्वेश्वरे (हृ.सू. १७७६)
१४. अद्वयस्य हर एवेऽनवधारणे (हृ.सू. १९८८)
१५. औपम्ये तु नियोगेऽप्यद्वयहरः स्यात् (हृ.सू. १९८९)
१६. अद्वयस्य मिलित्वा वृष्णीन्द्रः ऋते तृतीयासमासे (हृ.सू. १९९२)
१७. अ-इद्वयस्य हरः (हृ.सू. २११४)
१८. उद्वयस्य गोविन्दो, न तु धातोर्न च स्त्रीयप्रत्यये (हृ.सू. २११६)
१९. उद्वयस्य हरो ढरामे, न तु कद्रुपाण्ड्वोः (हृ.सू. २११७)
२०. अद्वय-माभ्यां तदुद्धवाभ्यां विष्णु-दासाच्च मतोर्मो वो,
न तु यवादेः (हृ.सू. २१२३)
२१. प्राक् क्रीताच्छरामः, उद्वयगवादिभ्यो यरामः (हृ.सू. २७७१)
२२. लोपोऽसर्वेश्वरे क्वापि क्वापि पूर्वपदस्य च अप्रत्ययस्तथैवेष्ट
उद्वयाल्ल इलस्य च (हृ.सू. ३१०६)
२३. अद्वयस्य वावीरामः, अन्यस्य त्रिविक्रमः (हृ.सू. ३१८६) इति।

## २.२. द्वयमन्त्रः

श्रीवैष्णवसम्प्रदाये द्वयमन्त्रः प्रसिद्धः। तस्मिन् सम्प्रदाये अपि मन्त्रोऽयं पद्मपुराणान्तर्गत इत्येव प्रसिद्धिः इति साम्प्रदायिका आचक्षते। किन्तु स मन्त्रः सम्प्रति मुद्रितेषु पद्मपुराणग्रन्थेषु न लभ्यते इत्यपि तथ्यम्। वस्तुतः मन्त्रयुगलं द्वयमन्त्रनाम्ना प्रसिद्धम्। इदं मन्त्रयुगलं लक्ष्म्याः नारायणस्य च प्रपत्तिपरम्। मन्त्रयोः शरीरं हि "श्रीमन्नारायणचरणौ शरणं प्रपद्ये", "श्रीमते नारायणाय नमः।"

श्रीसम्प्रदाये हि रहस्यत्रयं प्रसिद्धम्। भगवतः नारायणस्य सुगुप्तं रहस्यं त्रिषु मन्त्रेषु निबद्धम् अस्ति इति हि सम्प्रदायः। तेषु च प्रथमः तिरुमन्त्रः। 'ॐ नमो नारायणाय' इति अष्टाक्षरस्य मन्त्रस्य तिरुमन्त्र[६] इति प्रसिद्धिः। ततः द्वयमन्त्रः। ततः चरममन्त्रः। स च श्रीमद्भगवद्गीताया अष्टादशाध्यायस्य षट्षष्टितमः सर्वधर्मान् परित्यज्येत्यादिः श्लोक एव। एतेषां मन्त्राणां गूढार्थगर्भितत्वादेव इमे रहस्यमन्त्रा इति कथ्यते।

तत्र द्वयमन्त्रः श्रियाः नारायणस्य च प्रपत्तिपरः। इदं मन्त्रयुग्मं स्वयं भगवता नारायणेन श्रियै उपदिष्टं श्रिया च स्वयं विष्वक्सेनाय उपदिष्टं, विष्वक्सेनाच्च नम्माल्वारापरनामधेयैः मधुरकविभिः मन्त्रोपदेशः प्राप्त इति सम्प्रदायविदो वदन्ति।

[६] तिरु-शब्दः द्रविडभाषीयः। तस्य श्रीः इत्यर्थः

अस्मिन् मन्त्रे द्वौ भागौ। तत्र प्रथमभागेन उपायः उच्यते द्वितीये च भागे उपेयः उच्यते। उपेयः भगवान् श्रीमन्नारायणः। उपायश्च भगवतः श्रीमतः नारायणस्य प्रपत्तिः। प्रपत्तिशब्दः शरणागतिवाचकः। अत्र भगवच्छरणागत्या एव मोक्षः सम्भवति इति सम्प्रदायः।

अत्र मोक्षः नाम भगवत्कैङ्कर्यम्। द्वितीयवाक्ये नमः-शब्देन 'भगवतः अहम्' इति उच्यते। एतेन एव कैङ्कर्यम् उक्तं भवति। एवं च श्रीमते नारायणाय नम इति वाक्येन श्रीमतः भगवतः कैङ्कर्यं साधकस्य प्राप्यम् उपेयम् इति स्पष्टीकृतं भवति। प्रथमवाक्येन श्रीमतः भगवतः शरणागतिः उपायरूपः इति कथ्यते। इयं च प्रपत्तिः पञ्चाङ्गा।[७] तथाहि–

आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम्।
रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा॥
आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः॥[८]

यद्यपि अत्र षाड्विध्यम् एव शरणागतेः उच्यते तथापि आत्मनिक्षेपः अङ्गी अन्यानि च आत्मनिक्षेपस्य अङ्गत्वेन स्वीकृतानि। तेन आत्मनिक्षेप एव शरणागतिः आनुकूल्यसङ्कल्पादीनि च तस्य अङ्गानि इति विस्पष्टं भवति। शरणागतिरेव प्रपत्ति-न्यासादिभिः शब्दैरुच्यते। तथा च–

निक्षेपापरपर्यायः न्यासः पञ्चाङ्गसंयुतः।
सन्न्यासस्त्याग इत्युक्तः शरणागतिरित्यपि॥[९]

पाञ्चरात्ररक्षाया द्वितीयाधिकारे अपि वेदान्तदेशिकचरणैः भगवन्नारायणोपासनविषये नारायणमुन्युक्तिं सङ्गृह्णाति–

द्वयेन तद्विवरणैः प्रपद्य प्रभुमीश्वरम्।
निक्षिप्य चिरमात्मानं तत्पादाब्जे कृती भवेत्॥

अत्र प्रथमवाक्येन ईदृशः पञ्चाङ्गन्यासः प्रपत्त्यपरपर्याय उच्यते। एवमस्मिन् मन्त्रद्वये उपायोपेयौ उक्तौ। उपायोपेयनिरूपकतया मन्त्रोऽयं द्वयम् इति संज्ञायते। मन्त्रोऽयं पुनः रहस्यत्रये द्वितीयस्थानापन्नः अपि भवति।

---

[७]भगवदानुकूल्यस्य सङ्कल्पः, भगवत्प्रातिकूल्यस्य वर्जनं, भगवान् एव रक्षिष्यति– नान्यो रक्षितुं समर्थ इति ब्रह्मास्त्रन्यायेन भगवति महाविश्वासः, भगवतः गोप्तृत्वेन रक्षकत्वेन वरणम्, आकिञ्चन्यापरपर्यायं कार्पण्यम् इति पञ्चाङ्गानि शरणागतेः

[८]अहिर्बुध्न्यसंहिता ३७/२८-२९

[९]लक्ष्मीतन्त्रे १७.७४

पुनश्च एताभ्यां मन्त्राभ्यां श्रीमतः भगवतः नारायणस्य एव शरणं स्वीक्रियते प्राप्यत्वेन च श्रीमान् नारायण एव उल्लिख्यते। तेन इदम् अपि स्पष्टं ज्ञायते यत् न केवलस्य नारायणस्य उपायत्वं न वा केवलस्य नारायणस्य उपेयत्वम्। श्रीसहितो नारायण एव शरणागतं त्रायते श्रीसहितस्य एव नारायणस्य कैङ्कर्यादिलक्षणं सामीप्यम् इष्टं भवति। तेन मन्त्रोऽयं भगवतः नारायणस्य श्रियाश्च स्मारकतया अयं मन्त्रः लक्ष्म्याः नारायणस्य च वाचको भवति। तदेव जीवगोस्वामिपादैरपि उच्यते, लक्ष्मीनारायणवाचित्वाद् भगवन्नामता, तन्मन्त्रो हि द्वयमन्त्राख्यः पद्मपुराणे इति। लक्ष्मीनारायणवाचित्वं पद्मपुराणमूलत्वं चास्य मन्त्रस्य श्रीजीवगोस्वामिपादैरपि स्वीकृतत्वात् श्रीसम्प्रदायप्रसिद्धो द्वयमन्त्र एवात्र द्वयमन्त्रत्वेन उच्यते इति मन्यामहे।

गौडीयवैष्णवसम्प्रदाये लक्ष्मीसहित एव नारायण आराध्य इति बहुधा विचारितमस्ति। श्रीजीवगोस्वामिनः श्रीश्रीराधाकृष्णार्चनदीपिकाग्रन्थे अस्मिन् विषये विस्तरेण विचारः वर्तते। तत्र हयशीर्षपाञ्चरात्रवचनम् उद्ध्रियते–

न विष्णुना विना देवी न हरिः पद्मजां विना।
नित्यैव सा जगन्माता विष्णुः श्रीरनपायिनी।
यथा सर्वगतो विष्णुस्तथा श्रीस्तत्सहायिनी॥

एवं च लक्ष्मीसहितो नारायणः यथा भवति तथा एव मिथ एकात्मकाः वर्णाः द्वयशब्देन गृह्यते इति द्वयसंज्ञाया वैशिष्ट्यम् अस्मन्मते। किन्तु द्वयमन्त्रः पद्मपुराणे वर्तते इति श्रीजीवगोस्वामिपादैरपि साक्षाद् उच्चारितम्। किन्तु अयं मन्त्रः पद्मपुराणस्य मुद्रितपुस्तकेषु न प्राप्त इति उक्तमेवास्माभिः। पुनश्च श्रीसम्प्रदायप्रसिद्धाद् द्वयमन्त्राद् अयं भिन्नो गौडीयसम्प्रदायगतो द्वयमन्त्र इति स्वीकृतं चेदपि स मन्त्रः क इति तु अन्वेष्टव्यमेव।

## ३.०. उपसंहृतिः

विद्यमानासु बह्वीषु व्याकरणपरम्परासु स्थितास्वपि जीवगोस्वामिना नवीनेयं परम्परा किमर्था समारब्धा, कथञ्च नूतनयानया परम्परया वैयाकरणराद्धान्ताः दृढीकृताः, इमे तु महद्विचारयोग्याः विषयाः। तस्माद्ग्रन्थस्यास्य सम्यगध्ययनं करणीयमिति धिया प्रबन्धविषयत्वेन ग्रन्थोऽयं स्वीकृत इति। एवं संक्षेपेण हरिनामामृतव्याकरणस्य द्वयसंज्ञाविमर्शः कृत इति शिवम्।

-★-

# जयकृष्णानुसारं लकाराणां शक्तिविमर्शः

विष्णुपदपालः*

## उपोद्घातः

सत्स्वपि बहुविधेषु परिवर्तनेषु चापि संस्कृतभाषायाः न कदापि परिवर्तनं जायते। यतो हि अस्य हेतुः भवति व्याकरणशास्त्रम्। तस्मिन् च व्याकरणशास्त्रे मुनिभिः प्रोक्तम्– "अपदं नाप्रयुञ्जीत" इति। तच्च पदं सुबन्ततिङन्ताभ्यां निर्मितम्। सुप्-प्रत्याहारस्थप्रत्ययः यस्य प्रातिपदिकस्य अन्ते भवति, तत् सुबन्तं पदम्। यथा– रामः इति सुबन्तं पदम्। यतो हि राम इति प्रातिपदिकस्य अन्ते सुप्-प्रत्याहारस्थः सुप्रत्ययो विद्यते। तिङ्प्रत्याहारस्थप्रत्ययः यस्य धातोः अन्ते विद्यते, तत् तिङन्तं पदम्। यथा– पचति इति तिङन्तं पदम्। यतो हि पच्-धातोः अन्ते तिङ्प्रत्याहारस्थतिप्-प्रत्ययः विद्यते। तच्च तिङन्तं पदं लकारघटितम् भवति। मूलतः लकारः द्विविधः, टित्-ङिद्भेदात्। ते च टित्संज्ञकाः– लट्, लिट्, लुट्, लृट्, लेट्, लोट् चेति षड्विधः। ते च ङित्संज्ञकाः– लङ्, लिङ्, लुङ्, लृङ् चेति चतुर्विधः। एवञ्चाहत्य दशविधः लकारो भवति। तत्तल्लकाराणां कुत्र शक्तिः इति विषये विदुषां वैमत्यं दरीदृश्यते। प्रकृतशोधपत्रेऽस्मिन् जयकृष्णानुसारं लकाराणां कुत्र कुत्र शक्तिः, न्यायरीत्या तल्लकारघटितवाक्यानां शाब्दबोधः क्रमशः प्रतिपाद्यते।

तत्र चादौ जयकृष्णानुसारं षड्विधलकाराणां शक्तिनिरूपणम् क्रियते। पुनश्च न्यायरीत्या टिल्लकारघटितवाक्यानां शाब्दबोधश्च क्रमशः प्रतिपाद्यते।

## लट्-लकारः

तर्कालङ्कारः पण्डितः जयकृष्णशर्मा शब्दार्थसारमञ्जरीग्रन्थे दशविधानां लकाराणामर्थनिरूपणं चकार। तत्र आदौ लट्-लकारस्य अर्थं निरूपयामास। तथाहि प्रोक्तम्– "तत्र लटो वर्तमानत्वमर्थः"[१] इति। अर्थात् लटः वर्तमानत्वमर्थो भवति। इदं मतमपि पाणिनिसम्मतं विद्यते। तत्र प्रमाणम् शास्त्रम्– वर्तमाने लट् (पा.सू.– ३-२-१२३) इति। सूत्रस्यास्यार्थः– वर्तमानार्थे लट्-लकारः भवति। अत्र लट्-लकारस्य वर्तमानत्वमर्थः। तत्रापि लट्-लकारादीनां

---

*शोधच्छात्रः, संस्कृतविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य

[१]शब्दार्थसारमञ्जरी, पृ.– २५।

सामान्यविशेष्यभेदेन द्विविधः अर्थः। लादेशस्य एकत्वादिसंख्याविशेषः, कर्तृकर्मान्यतरकारकधात्वर्थविशेषः इत्येते लडादीनां सामान्यार्थाः। सर्वेषु लकारेषु एतेषाम् अर्थानां विद्यमानत्वात् साधारणार्थत्वेन परिगण्यते। परन्तु वर्तमानत्वम् इति अर्थः असाधारणः। यतो हि केवलं लट्-लकारे विद्यमानात्। तस्मात् ग्रन्थकर्ता सामान्यार्थम् अनुक्त्वा वर्तमानत्वमिति विशेष्यार्थं प्राह।

## अत्र निष्कर्षः

निष्कर्षोऽयमत्र– लट्-लकारस्य वर्तमानत्वम् अर्थः भवति। न केवलं वर्तमानत्वमर्थो भवति, अपि तु लटः एकत्वादिसंख्या, कृतिः, फलञ्चार्थो भवति।

## शाब्दबोधः

चैत्रः तण्डुलं पचति इति लट्-लकारे वाक्यप्रयोगः। चैत्र सु तण्डुल अम् पच् ति इत्येतानि षड् पदानि सन्ति। अत्र तण्डुलपदेन तण्डुलपदार्थोपस्थितिः। द्वितीयया कर्मतारूपफलोपस्थितिः। तत्र कर्मत्वे तण्डुलपदार्थस्य वृत्तित्वसम्बन्धेन अन्वयः भवति। तेन तण्डुलवृत्तिकर्मत्वमिति बोधः। पच-धातुना पाकोपस्थितिः। पाको नाम विक्लित्त्यनुकूलव्यापारः। तत्र पाके अनुकूलत्वसम्बन्धेन तादृशकर्मताया अन्वयः भवति। तेन तण्डुलवृत्तिकर्मतानुकूलपाक इति बोधः। लडर्थो वर्तमानकालः, कृतिः, एकत्वसंख्या च इति। तत्र वर्तमानकालस्य कृतौ अवच्छेद्यत्वसम्बन्धेनान्वयो भवति। पुनश्च कृतौ व्यापारस्य अनुकूलत्वसम्बन्धेन अन्वयः भवति। चैत्रपदात् चैत्रपदार्थोपस्थितिः जायते। कृतेश्च आश्रयत्वसम्बन्धेन चैत्रे अन्वयः भवति। एकत्वसंख्याया अपि चैत्रे अन्वयो भवति। तेन तण्डुलवृत्तिकर्मतानुकूलपाकानुकूलवर्तमानकालिककृत्याश्रयः एकत्ववान् चैत्र इति शाब्दबोधः।

## लिट्-लकारः

रामः वनं जगाम इत्यत्र लिट्-लकारस्य प्रयोगः वर्तते। लिट्लकारस्य कोऽर्थः इति जिज्ञासायां समाधत्ते ग्रन्थकर्ता जयकृष्णशर्मा– "लिटः वक्तुः परोक्षत्वम्, अतीतत्वञ्च"[२] इति। अर्थात् लिटः वक्तुः परोक्षत्वम्, अतीतत्वञ्चार्थः भवति। एवञ्च जयकृष्णस्य मतमिदं पाणिनिसम्मतमेव विद्यते। तत्र प्रमाणं

---

[२]शब्दार्थसारमञ्जरी, पृ.– ६५॥

शास्त्रम्– परोक्षे लिट् (पा.सू.– ३/२/११५) इति। सूत्रस्यास्यायमर्थः– परोक्षभूतानद्यतनार्थे लिट् स्यात्। अर्थात् वैयाकरणानुसारं लिट्-लकारस्य भूतानद्यतनत्वम्, परोक्षत्वञ्चार्थः भवति। तत्र परोक्षत्वं नाम किम्। परोक्षत्वविषये शास्त्रकाराणां मतानि भिन्नानि भिन्नानि सन्ति। तथाहि केचन वदन्ति परोक्षत्वं तु वर्षशतवृत्तित्वम्। केचिद् वदन्ति परोक्षत्वं वर्षसहस्रवृत्तित्वम्। केचिद्वदन्ति द्व्यहवृत्तित्वं त्र्यहवृत्तित्वम्। केचिद्वदन्ति कुड्यकटाद्यन्तरितत्वम्। किन्तु नह्येते पक्षाः सिद्धान्तभूताः तर्हि सर्वसम्मतं परोक्षत्वं किमिति चेदुच्यते प्रयोक्तुरिन्द्रियागोचरत्वं परोक्षत्वमित्येव लक्षणं सर्वसम्मतं वर्तते। अत एव सर्वैः प्रायरिदमेव लक्षणं प्रोक्तम्। तथाहि– परोक्षत्वं किमिति जिज्ञासायां कौण्डभट्टो वदति– "परोक्षत्वं च साक्षात्करोमीत्येतादृशविषयताशालिज्ञानाविषयत्वम्"[३] इति। नागेशभट्टोऽपि वदति– "परोक्षत्वं च साक्षात्करोमीत्येतादृशविषयताशालिज्ञानाविषयत्वम्"[४] इति। एवं वैयाकरणसिद्धान्तलघुमञ्जूषायामपि प्रोक्तं नागेशभट्टेन "एवं भूतानद्यतनपरोक्षार्थकाल्लिट्। पपाचेत्यादितो बोधे तत्तद्विषयसन्देहानुदयाद् भूतत्वादेरिवानद्यतनत्वादेरपि बोधविषयत्वम्। साक्षात्करोमीत्येतादृशविषयता-शालिज्ञानत्वं ज्ञाननिष्ठमपरोक्षत्वम्। तद्विषयत्वं चार्थनिष्ठम्। तद्भिन्नं च परोक्षत्वम्"[५] इति। परोक्षत्वं नाम चक्षुरादीन्द्रियाणामविषयत्वम्, साक्षात्कारभिन्नविषयत्वम् वा। अर्थात् चक्षुरादीन्द्रियेण विषयस्य साक्षात्कारः यत्र न भवति तत्र लिट्-लकारस्य प्रयोगः। अत्र एतदपि मन्तव्यमस्ति यत् अतीतकालः अद्यतनानद्यतनभेदेन द्विविधः। तस्मात् अनद्यतनातीतत्वं परोक्षत्वञ्च लिट्-लकारस्यार्थः। अत्र मनसि शङ्का समुदेति यत् परोक्षत्वं नाम व्यापारविशिष्टकर्तुः चक्षुरादीन्द्रियेण विषयस्य साक्षात्काराभावत्वम्। उत्तमपुरुषप्रयोगे तु व्यापारविशिष्टकर्त्रा सह विषयस्य साक्षात्कारवशात् लिट्-लकारस्य प्रयोगः तत्र कथम्। अत्र समाधानं प्रदीयते यत् चित्तव्यासङ्गात् लिट्-लकारस्य प्रयोगः। तेन चित्तव्यासङ्गात् साक्षात्करोमीत्यादिज्ञानाविषयत्वं सम्भवति।

---

[३]वैयाकरणभूषणसारः, पृ.– १२६।

[४]परमलघूमञ्जुषा, पृ.– १२५।

[५]वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ.– ८५३।

## अत्र निष्कर्षः

निष्कर्षोऽयमत्र– लिट्लकारस्य अतीतत्वम्, वक्तुः परोक्षत्वमिति अर्थो भवति। परोक्षे लिट् इति पाणिनिशास्त्रमपि इदं मतं समर्थयति। वैयाकरणानुसारं लिटः अनद्यतनत्वम्, परोक्षत्वम्, अतीतत्वञ्चार्थः भवति।

## शाब्दबोधः

रामः वनं जगाम इति लिट्-लकारे वाक्यप्रयोगः। राम, सु, वन, अम्, गम्, लिट् इत्येतानि षड् पदानि सन्ति। वनपदात् वनपदार्थोपस्थितिः जायते। तत्र अमर्थो कर्मत्वं वर्तते। तत्र कर्मत्वे प्रातिपदिकार्थस्य वनस्य वृत्तित्वसम्बन्धेन अन्वयः। तेन वनवृत्तिकर्मत्वमिति बोधः। गम्धातोः गमनमर्थः। तत्र गमने तादृशकर्मत्वस्य अनुकूलत्वसम्बन्धेन अन्वयः। तेन वनवृत्तिकर्मतानुकूलगमनम्। गम्-धातूत्तरलिटः अनद्यतनत्वम्, परोक्षत्वम्, अतीतत्वम्, कृतिश्चार्थो भवति। व्यापारस्य कृतौ अनुकूलत्वसम्बन्धेन अन्वयः। तेन वनवृत्तिकर्मतानुकूलगमनानुकूलकृतिः इति बोधः। एवञ्च कृतौ एव च लिडर्थस्य भूतत्वस्य अनद्यतनत्वस्य परोक्षत्वस्य चान्वयः। रामपदात् रामपदार्थोपस्थितिः जायते। तादृशकृतेश्च प्रथमान्तार्थे रामे आश्रयत्वसम्बन्धेन अन्वयः। एकत्वसंख्याया अपि रामे अन्वयो भवति। तेन वनवृत्तिकर्मतानुकूलगमनानुकूलानद्यतनातीतपरोक्षकृत्याश्रयः एकत्ववान् रामः इति शाब्दबोधः।

## लुट्-लकारः

शब्दार्थसारमञ्जरीनामकग्रन्थे जयकृष्णशर्मा लुट्-लकारस्य अर्थं प्राह– "लुट्लृटोः भविष्यत्वम् अर्थः"[६]इति। अर्थात् लुटः भविष्यत्वमर्थो भवति। इदं मतं पाणिनिसम्मतमेव विद्यते। अत्र प्रमाणभूतं शास्त्रम्– अनद्यतने लुट् (पा.सू.– ३/३/१५) इति। भविष्यति गम्यादयः इत्यतः भविष्यति इति पदम् अनुवर्तते। सूत्रस्यास्यार्थः– भविष्यत्यनद्यतने अर्थे लुट् भवति। अत्रापि भविष्यत्त्वं द्विविधम् अद्यतनानद्यतनभेदेन। अनद्यतने भविष्यति अर्थे लुट्-लकारस्य प्रयोगः भवति। अत्र किं नाम अनद्यतनत्वम्। अत्र समाधीयते– अद्यतनभिन्नः कालः अनद्यतनो भवति। अर्थात् अद्यतनभिन्नकालत्वमिति। अत्र किं नाम अद्यतनत्वम्। अत्र

---

[६]शब्दार्थसारमञ्जरी, पृ.– ६५।

लुङ्सूत्रभाष्ये कैयटः प्राह– “अतीतरात्रेरन्त्ययामेन आगामिरात्रेराद्ययामेन सहितो दिवसः अद्यतनः”[७]। एवं कालोपसर्जने च तुल्यमिति सूत्रभाष्येऽपि प्रोक्तं वर्तते– “अतीतायाः रात्रेः पश्चार्धेनागामिन्याः पूर्वार्धेन सहितो दिवसोऽद्यतनः“[८]। एतत्कालभिन्नकालः अनद्यतनकाल इति भावः। नागेशभट्टेनापि प्रोक्तम्– “अतीतरात्रेः पश्चाऽर्धेन, आगामिन्याः पूर्वाऽर्द्धेन च सहितः कालः अद्यतनः, तद्भिन्नः अनद्यतनः”[९]। एवं समेषां वैयाकरणानां मते अनद्यतनत्वं समानमेव वर्तते। इदमेव लक्षणम् अन्यशास्त्रसम्मतं विद्यते।

## अत्र निष्कर्षः

निष्कर्षोऽयमत्र– जयकृष्णानुसारं लुट्-लकारस्य अर्थः भविष्यत्त्वम्। वैयाकरणानुसारम् अनद्यतनत्वम्, भविष्यत्त्वश्चार्थः। वस्तुतस्तु जयकृष्णस्यापि मतमिदमेव। लुट्लकारप्रयोगे भविष्यतः प्राधान्यात् तदुल्लेखः कृतः।

## शाब्दबोधः

चैत्रो ग्रामं गन्ता इति लुट्-लकारे वाक्यप्रयोगः। चैत्र सु ग्राम अम् गम् लुट् इत्येतानि षड् पदानि सन्ति। तत्र ग्रामपदात् ग्रामपदार्थोपस्थितिः जायते। तदुत्तरद्वितीयया कर्मत्वोपस्थितिः जायते। तत्र कर्मत्वे वृत्तित्वसम्बन्धेन ग्रामस्य अन्वयः। तेन ग्रामवृत्तिकर्मत्वमिति शाब्दबोधः। गम्-धातुना गमनोपस्थितिः जायते। तदुत्तरलुटः भविष्यत्त्वम्, अनद्यतनत्वम्, कृतिश्चार्थौ विद्यते। तादृशकर्मताया अनुकूलत्वसम्बन्धेन गमने अन्वयो भवति। तेन ग्रामवृत्तिकर्मतानुकूलगमनम् इति बोधः। तादृशगमनस्य च तिङर्थकृतौ अनुकूलत्वसम्बन्धेनान्वयः। कृतौ एव च लुडर्थस्य भावित्वस्य अनद्यतनत्वस्यान्वयः। तेन ग्रामवृत्तिकर्मतानुकूलगमनानुकूलानद्यतन-भाविकालिककृतिः इति बोधः। तिङर्थकृतेश्च आश्रयत्वसम्बन्धेन प्रथमान्तार्थे चैत्रे अन्वयः। एकत्वसंख्याया अपि चैत्रे अन्वयो भवति। तेन ग्रामवृत्तिकर्मतानुकूलगमनानुकूलानद्यतन-भाविकालिककृत्याश्रयः एकत्ववान् चैत्रः इति शाब्दबोधः।

---

[७]महाभाष्यम् (प्रदीपोद्योतटीकोपेतम्), पृ.–१६८।

[८]महाभाष्यम् (प्रदीपोद्योतटीकोपेतम्), पृ.– १६८।

[९]परमलघुमञ्जूषा (वंशीटीकायुतम्), पृ.– १५५-१५६।

## लृट्-लकारः

भविष्यति, गमिष्यति इत्यादिलृट्लकारघटितप्रयोगः भूयशः दरीदृश्यते। अतः लृटः कोऽर्थः इति जिज्ञासा भवत्येव। अतः समाधत्ते ग्रन्थकारः- "लुट्लृटोः भविष्यत्त्वम् अर्थः"[10] इति। अर्थात् लृटः भविष्यत्त्वम् अर्थः भवति। जयकृष्णमतं पाणिनिसम्मतं विद्यते। अत्र प्रमाणभूतं शास्त्रम्– लृट् शेषे च (पा.सू.– ३/३/१३) इति। शास्त्रे अस्मिन् भविष्यति गम्यादयः इत्यस्मात् सूत्रात् भविष्यति इति पदम् अनुवर्तते। तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् इत्यस्मात् सूत्रात् क्रियार्थायां क्रियायामिति पदम् अनुवर्तते। तेन सूत्रस्यास्यार्थः– क्रियार्थायां क्रियायां सत्यामसत्याञ्च भविष्यति अर्थे लृट् लकारः स्यात्। ग्रन्थकर्ता जयकृष्णशर्मापि प्रोक्तवान् यत् लृट्लकारस्य भविष्यति अर्थे भवति प्रयोगः। अर्थात् भविष्यत्सामान्ये अर्थे लृट्-लकारः भवति।

## निष्कर्षः

निष्कर्षोऽयमत्र– जयकृष्णानुसारं लृटः लकारस्य भविष्यत्त्वम् अर्थः भवति। वैयाकरणानुसारं न केवलं भविष्यत्त्वम् अर्थः, अपि तु क्रियार्था क्रिया अर्थः। अत्रापि लृटि भविष्यतः प्राधान्यात् तदुल्लेखः कृतः ग्रन्थकारेण।

## शाब्दबोधः

चैत्रः तण्डुलं पक्ष्यति इत्यत्र लृट्लकारे वाक्यप्रयोगो भवति। चैत्र सु तण्डुल अम् पच् लृट् इत्येतानि षड् पदानि सन्ति। तण्डुलपदेन तण्डुलपदार्थोपस्थितिः। द्वितीयया कर्मतारूपफलोपस्थितिः। तण्डुलपदार्थस्य कर्मत्वे अन्वयः वृत्तित्वसम्बन्धेन। तेन तण्डुलवृत्तिकर्मत्वमिति। पच्-धातुना पाकोपस्थितिः। लृडर्थौ भविष्यत्कालः, कृतिश्चार्थौ भवति। पाको नाम विक्लित्त्यनुकूलव्यापारः। पाके अनुकूलत्वसम्बन्धेन तादृशकर्मतायाः अन्वयः। तेन तण्डुलवृत्तिकर्मतानुकूलपाक इति। तादृशपाकस्य अनुकूलत्वसम्बन्धेन कृतावन्वयो भवति। तस्य च भविष्यत्कालस्य कृतौ अन्वयः। तेन तण्डुलवृत्तिकर्मतानुकूलपाकानुकूलभविष्यत्कालिककृतिः इति बोधः। चैत्रपदात् चैत्रपदार्थोपस्थितिः जायते। कृतेश्च आश्रयत्वसम्बन्धेन चैत्रे अन्वयः।

---

[10] शब्दार्थसारमञ्जरी, पृ.– ६५।

एकत्वसंख्याया अपि चैत्रे अन्वयो भवति। तेन तण्डुलवृत्तिकर्मतानुकूलपाकानुकूल-भविष्यत्कालिककृत्याश्रयः एकत्ववान् चैत्र इति शाब्दबोधः।

## लेट्-लकारः

लौकिकसाहित्यनभसि लेट्लकारस्य प्रयोगः नैव दृश्यते। तस्मात् ग्रन्थकर्ता नैव लेट्लकारविषये किमपि अकथयत्। लिङर्थे लेट् (पा.सू.– ३/३/१६१) इत्येनन छन्दसि लिङर्थे एव लेट्लकारः प्रयुज्यते। अर्थात् छन्दसि नाम वेदे लिङर्थे लेट्-लकारः प्रयुज्यते। विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् (पा.सू.– ३/३/१६१) इति पाणिनीयानुशासनानुगुण्येन विधिनिमन्त्रणादिष्वर्थेषु एव विधिलिङ्-लकारः भवति। एष्वर्थेषु अपि लेट्-लकारस्य वेदे प्रयोगो भवति। प्रक्रियायामपि लड्वत् लेट्-लकारः वर्तते। विशेषस्तु लेट्-लकारे अडाटौ भवतः। यथा– लट्-लकारे भवति इति प्रयोगः, लेट्-लकारे तु भवाति इति प्रयोगः। तस्मात् लेट्-लकारस्य अलौकिके जगति अप्रयोगात् लौकिकव्याकरणादिषु अस्य लकारस्य प्रयोगाभावात् न तावत् विस्तरेण आलोच्यते।

## लोट्-लकारः

जयकृष्णशर्मा लोटः अर्थमाह– "लोटः भविष्यत्त्वम्, आशीः, प्रेरणा च"[११] इति। अर्थात् लोटः भविष्यत्त्वम्, आशीः, प्रेरणा चार्थो भवति। पूर्वोक्तपाठे भविष्यत्त्वविषये विस्तरेण चर्चितम्। आशीः नाम शुभचिन्तनम्। प्रेरणा नाम प्रवर्त्तनम्। वैयाकरणानुसारं लोटः भविष्यत्त्वम् इत्यर्थो नैव विद्यते। लोट् च (पा.सू.– ३/३/१६२) इति शास्त्रे विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इत्यस्मात् सूत्रात् विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु इत्यनुवर्तते। अतो लोट्लकारस्यापि विध्यादय एवार्थाः सन्ति। तथाहि प्रोक्तं वृत्तौ दीक्षितेन– "विध्यादिष्वर्थेषु धातोर्लोट् स्यात्"[१२] इति। पुनरेकं सूत्रं वर्तते आशिषि लिङ्लोटौ (पा.सू.– ३/३/१६१) एवं च लिङ्लोटोः आशीरप्यर्थो वर्तते। एवञ्च आशिषि लिङ्लोटौ (पा.सू.– ३/३/१६१) इति पाणिनीयशास्त्रसामर्थ्यात् आशीरप्यर्थे लोट्-लकारः भवति। अतः लोटः भविष्यत्त्वम्, आशीः, प्रवर्त्तनेत्येतेऽर्थाः सन्ति।

---

[११]शब्दार्थसारमञ्जरी, पृ.– ६५।

[१२]सिद्धान्तकौमुदी, पृ.– ३२।

## निष्कर्षः

निष्कर्षोऽयमत्र– जयकृष्णानुसारं लोडर्थः भवति आशीः, प्रेरणा, भविष्यत्त्वम्। वैयाकरणानुसारम् आशीः, विध्यादयः लोडर्थः भवति। परन्तु वैयाकरणमते तु लोडर्थः भविष्यत्त्वमर्थो नास्ति। कालसामान्यमेव लोडर्थः भवति।

## शाब्दबोधः

चैत्रः ग्रामं गच्छतु इति लोट्-लकारे वाक्यप्रयोगः। चैत्र सु ग्राम अम् गम् लोट् इति एतानि षड् पदानि सन्ति। ग्रामपदात् ग्रामपदार्थोपस्थितिः जायते। द्वितीयया कर्मत्वरूपफलोपस्थितिः जायते। तेन ग्रामस्य कर्मत्वे वृत्तित्वसम्बन्धेन अन्वयो भवति। तेन ग्रामवृत्तिकर्मत्वमिति बोधः। गम्-धातोः गमनम् अर्थः। तदुत्तरतिङश्च विधित्वं भविष्यत्त्वम्, कृतिश्चार्थो भवति। तत्र गमने ग्रामवृत्तिकर्मत्वस्य अनुकूलत्वसम्बन्धेन अन्वयो भवति। तेन ग्रामवृत्तिकर्मतानुकूलगमनम् इति बोधः। तादृशगमनस्य अनुकूलत्वसम्बन्धेन कृतौ अन्वयो भवति। एवञ्च विधित्वम्, भविष्यत्त्वमपि कृतौ अन्वेति। तेन ग्रामवृत्तिकर्मतानुकूलगमनानुकूलभविष्यत्कालिकविधिमूलककृतिः इति बोधः। चैत्रपदात् चैत्रपदार्थोपस्थितिः जायते। तादृशकृतेः आश्रयत्वसम्बन्धेन चैत्र अन्वेति। एकत्वसंख्याया अपि चैत्रे अन्वयो भवति। ग्रामवृत्तिकर्मतानुकूल-गमनानुकूलभविष्यत्कालिकविधिमूलककृत्याश्रयः एकत्ववान् चैत्रः इति शाब्दबोधः।

टित्-लकारान् वर्णयित्वा सम्प्रति ङित्-लकाराणार्थं निरूपयितुं प्रयतते। ङित्-लकारस्तु पञ्चविधः। ते च लङ्, लिङ्, लुङ्, लृङ् इति मूलतः चतुर्विधः। लिङ्-लकारः पुनः द्विविधः। आशीर्लिङ् विधिलिङ् चेति भेदात्। एवञ्च आहत्य ङित् लकारः पञ्चविधः। एवञ्च अधः एतेषामेकैकशः अर्थनिरूपणं विधास्यते।

## लङ्-लकारः

अभवत्, अगच्छत् इत्यादिलङ्लकारघटितवाक्यप्रयोगः संस्कृतवाङ्मये दरीदृश्यते। लङोऽर्थः कः इति प्रश्ने जयकृष्णशर्मणा समाधीयते– लङ्लुङोरतीतत्वम्"[१३] इति। अर्थात् लङः अर्थः अतीतत्वम्। इदं मतं पाणिनिसम्मतमेव विद्यते। अत्र प्रमाणं शास्त्रम्– अनद्यतने लङ् (पा.सू.–

[१३]शब्दार्थसारमञ्जरी, पृ.– ६५।

३/२/११) इति। प्रकृतशास्त्रे भूते, धातोः इति पदद्वयम् अनुवर्तते। सूत्रस्यास्यायमर्थः– अनद्यतनभूतार्थे लङ् स्यात्। अतः प्रकृतसूत्रानुसारं वैयाकरणनये लङः अतीतत्वम्, अनद्यतनत्वञ्चार्थद्वयं विलसति। ग्रन्थकर्त्रनुसारं लङः अतीतत्वम् अर्थः।

## निष्कर्षः

निष्कर्षोऽयमत्र– जयकृष्णानुसारं लङः अतीतत्वम् अर्थः। वैयाकरणानुसारं लङः अतीतत्वम्, अनद्यतनत्वञ्चार्थः भवति। अतः स्थूलदृष्ट्या उभयोः मते वैलक्षण्यं दृश्यते। किन्तु सूक्ष्मदृष्ट्या विचारे क्रियमाणे तु नास्ति उभयोः मते वैलक्षण्यम्। यतो हि ग्रन्थकर्तृनयेऽपि न केवलं लङः अतीतत्वमर्थः, अपि तु अनद्यतनत्वमपि अर्थो विद्यते। परन्तु लङः अतीतत्वार्थस्य प्राधान्यात् तदुल्लेखः कृतः ग्रन्थकारेण।

## शाब्दबोधः

यथा– चैत्रः ग्रामम् अगच्छत् इति वाक्यम्। अत्र चैत्र सु ग्राम अम् गम् लोट् इत्येतानि षड् पदानि सन्ति। ग्रामपदात् ग्रामार्थोपस्थितिः जायते। तदुत्तरद्वितीयया कर्मत्वोपस्थितिः जायते। तत्र कर्मत्वे ग्रामस्य वृत्तित्वसम्बन्धेनान्वयः। तेन ग्रामवृत्तिकर्मत्वमिति इति बोधः। गम्धातोः गमनम् इत्यर्थः। तदुत्तरलङः अनद्यतनातीतत्वं कृतिः एकत्वसंख्या चार्थो भवति। तादृशकर्मतायाः अनुकूलत्वसम्बन्धेन गमने अन्वयः भवति। तेन ग्रामवृत्तिकर्मत्वानुकूलगमनम् इति बोधः। तादृशगमनस्य अनुकूलत्वसम्बन्धेन कृतौ अन्वयो भवति। एवञ्च तत्र कृतौ अनद्यतनातीतत्वस्यापि अन्वयो भवति। तेन ग्रामवृत्तिकर्मतानूकूलगमनानुकूलानद्यतनातीतकालिककृतिः इति बोधः। चैत्रपदात् चैत्रपदार्थोपस्थितिः जायते। कृतेश्च आश्रयतासम्बन्धेन चैत्रे अन्वयो भवति। एकत्वसंख्यायाः अपि चैत्रे अन्वयो भवति। तेन ग्रामवृत्तिकर्मतानूकूलगमनानुकूलानद्यतनातीतकालिककृत्याश्रयः एकत्ववान् चैत्रः इति शाब्दबोधः।

## लिङ्-लकारः

लिङ् द्विविधः। विधिलिङ् आशीर्लिङ् चेति। विधिलङः अर्थं प्राह

जयकृष्णशर्मा– “विधिलिङो भविष्यत्त्वम्, विधिः, सम्भावना च”[१४] इति। भविष्यत्काललक्षणं तु पूर्वोक्तपाठे विस्तरेण चर्चितं विद्यते। विधिः नाम कः इति चेदुच्यते कर्त्तव्यतोपदेशः। यथा– शिष्यं गुरुः वदति– भवान् पुस्तकं पठेत् इत्युक्ते छात्रजीवने पुस्तकपठनं कर्तव्यम्। कर्तव्यस्य तस्य उपदेशः एव विधिपद्वाच्यः। सम्भावना नाम फलकल्पनम्। अर्थात् निश्चितफलकल्पनाभावेऽपि कार्यं वीक्ष्य फलस्य अनुमानमेव फलकल्पनम्। यथा– परीक्षायाः कृते कश्चित् बहु परिश्रमं करोति। तद्वीक्ष्य कश्चित् कथयति अयं सम्यक् फलं प्राप्नुयात् तथा चोक्तवाक्यात् निश्चितफलाभावेऽपि कस्यचित् फलस्य अनुमानात् विधिलिङ् प्रयुज्यते। मतमिदं पाणिनिसम्मतमेव विद्यते। अत्र प्रमाणभूतं शास्त्रं हि– विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् (पा.सू.– ३/३/१६१) इति। सूत्रस्यास्यार्थः– विध्यादिष्वेव अर्थेषु लिङ्-लकारः प्रयुज्यते। तेन वैयाकरणानुसारं लिङः विध्यादयः अर्थाः। तत्र विधिः नाम प्रेरणम्, भृत्यादेः निकृष्टस्य प्रवर्तनम्। अर्थात् भृत्यादिनिकृष्टं प्रति प्रभ्वाद्युत्कृष्टानां कार्यकरणाय बलपूर्वकप्रवर्त्तनम्। यथा– प्रभुः भृत्यम् आदिशति– भवान् वस्त्रं प्रक्षालयेत् इति। निमन्त्रणम् नाम नियोगकरणम्। अर्थात् अवश्यम्भावेन यत्करणं तन्निमन्त्रणम्। कश्चित् कञ्चित् ब्राह्मणं निमन्त्रयति– भवान्मम गृहम् आगच्छेत् इति। आवश्यके श्राद्धभोजनादौ दौहित्रादेः अवश्यं प्रवर्त्तनम् प्रेरणेत्यर्थः। आमन्त्रणम् नाम कामचारानुज्ञा। अर्थात् स्वस्य इच्छानुसारम् अनुष्ठानाचरणम्। यथा– यथारब्धं कुरुष्व, तत्कुरुष्व यथाहमिति, यथेच्छं कुर्याः इत्यादिप्रयोगः। आमन्त्रणे क्रियमाणेऽपि स्वस्य इच्छानुसारेण कार्याचरणं कर्तुं शक्ष्यते। यतो हि गमनकर्तुः गमनं तु गमनकर्तृनिष्ठेच्छाविषयाधीनम्। गमने अक्रियमाणेऽपि प्रत्यवायः नोत्पद्यते। अधीष्टम् नाम सत्कारपूर्वको व्यापारः। अर्थात् सत्कारपूर्वकम् अध्ययनादिव्यापारे प्रवर्त्तनम् अधीष्टः। यथा– माणवकमध्यापयेद् भवान्। अतः प्रवर्त्तनासत्त्वात् प्रकृतवाक्ये लिङ्-लकारस्य प्रयोगः। सम्प्रश्नः नाम सम्प्रधारणम्। एतादृशं कार्यं कर्तुं शक्नोमि उत तादृशं कार्यं कर्तुं न शक्नोमि इत्येतादृशं चिन्तनं सम्प्रधारणपदवाच्यम्। यथा– किं भोः व्याकरणं भवानधीयीय उत तर्कम् इति। प्रार्थना नाम ईप्सितं वस्तु प्राप्त्यर्थं स्वामिनां सकाशे याचनम्। यथा– भवान्

[१४] शब्दार्थसारमञ्जरी, पृ.– ६५।

अन्नं मे दद्यात् इत्यत्र स्वामी मदभिलषितवस्त्वन्नस्य दानं कुर्यात् इतीच्छायाः प्रकटनकरणाय विधिलिङ् प्रयुज्यते।

आशीर्लिङः अर्थं प्राह ग्रन्थकारः– "भविष्यत्त्वम्, आशीश्च"[१५] इति। अर्थात् आशीर्लिङः आशीः भविष्यत्त्वञ्चार्थः। अत्र प्रमाणशास्त्रम्– आशिषि लिङ्लोटौ (पा.सू.– ३/३/१७३) इति। वैयाकरणानुसारम् आशीर्लिङः आशीरर्थः। सूत्रस्यास्यार्थः– आशिषि अर्थेऽपि लिङ्-लकारः प्रयुज्यते। अतः आशीर्लिङ् इत्युच्यते।

वस्तुतस्तु लोटः लेटः लिङश्च एकस्मिन्नेवार्थे विधानं भवतीति कृत्वा भूषणसारादिग्रन्थेषु त्रयाणां लकाराणामर्थौ समान एवेति कृत्वा त्रिभिः सहैव निरूपणं कृतम्। पुनश्च विधिनिमन्त्रणादिचतुर्ष्वपि प्रवर्तनात्वं वर्तते। तस्मात् विध्यादिभिन्नतया स्वीकारापेक्षया लाघवात् चतुर्षु शक्यतावच्छेदकत्वं प्रवर्त्तनात्वम्। प्रवर्त्तनात्वञ्च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम्। तच्चेष्टसाधनत्वस्यास्ति तदेव विध्यर्थः। तथाहि कारिकापि-

> अस्ति प्रवर्त्तनारूपमनुस्यूतं चतुर्ष्वपि।
> तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया॥[१६] इति।

## निष्कर्षः

निष्कर्षोऽयमत्र- जयकृष्णानुसारं विधिलिङः अर्थः भविष्यत्त्वम्, विधिः, सम्भावना च। वैयारणानुसारं विधिलिङः अर्थः विध्यादयः। जयकृष्णानुसारं आशीर्लिङः अर्थः भविष्यत्त्वम्, आशीश्च। वैयाकरणानुसारम् आशीर्लिङः अर्थः आशीः।

## शाब्दबोधः

स्वर्गकामो यजेत इत्यत्र स्वर्गकाम सु यज् लिङ् इति एतानि चत्वारि पदानि सन्ति। यज्-धातोः यागः अर्थः। तदुत्तराख्यातस्य विधिः, भाविकालः, कृतिश्चार्थौ भवति। तत्र विधिः धात्वर्थे अन्वेति। धात्वर्थः कृतौ अन्वेति। भाविकालश्चापि कृतौ अन्वेति। कृतेश्च प्रथमान्तार्थे अन्वयो भवति। तेन विधिविषययागानुकूलभाविकृतिमान् स्वर्गकाम इति शाब्दबोधः।

---

[१५] शब्दार्थसारमञ्जरी, पृ.– ६५।

[१६] वैयाकरणभूषणसारः, पृ.– ९६।

## लुङ्-लकारः

अगमत् इत्यादिलुङ्लकारघटितप्रयोगस्तु सर्वत्र दरीदृश्यते। अस्य च लुङः कोऽर्थः इति जिज्ञासायां जयकृष्णशर्मा प्राह– "लङ्लुङोः अतीतत्वमर्थः"[१७] इति। अर्थात् लुङः अतीतत्वमर्थः। इदं मतं पाणिनिसम्मतमेव विद्यते। तत्र प्रमाणभूतं शास्त्रं हि लुङ् (पा.सू.– ३-२-११०) इति। एतेन अतीतार्थे लुङ्-लकारः प्रयुज्यते। दीक्षितोऽपि वृत्तावलिखत्– "भूतार्थवृत्तेर्धातोर्लुङ् स्यात्"[१८] इति। अर्थात् भूतसामान्यम् लुङः अर्थः।

## निष्कर्षः

निष्कर्षोऽयमत्र– जयकृष्णानुसारं लुङः अर्थः अतीतत्वम्। लुङः अतीतत्वमर्थः सर्वैः शास्त्रकारैः आदृतः। तेन भूतसामान्यं लुङर्थ इति सिद्धम्।

## शाब्दबोधः

चैत्रः ग्रामम् अगमत् इत्यत्र चैत्र सु ग्राम अम् गम् लुङ् इत्येतानि षड् पदानि सन्ति। ग्रामपदात् ग्रामपदार्थोपस्थितिः जायते। तदुत्तरद्वितीयया कर्मत्वोपस्थितिः जायते। तत्र कर्मत्वे ग्रामस्य वृत्तित्वसम्बन्धेन अन्वयो भवति। तेन ग्रामवृत्तिकर्मता इति बोधः। गम्धातोः गमनम् इत्यर्थो भवति। लुङः अतीतत्वम्, एकत्वसंख्या, कृतिश्चार्थो भवति। तादृशकर्मतायाः अनुकूलत्वसम्बन्धेन गमने अन्वयो भवति। तेन ग्रामवृत्तिकर्मतानुकूलगमनम् इति बोधः। तादृशगमनस्य अनुकूलत्वसम्बन्धेन कृतौ अन्वयो भवति। पुनश्च तत्र कृतौ अतीतकालस्य अन्वयो भवति। तेन ग्रामवृत्तिकर्मतानुकूलगमनानुकूलातीतकालिककृतिः इति बोधः। चैत्रपदात् चैत्रपदार्थोपस्थितिः जायते। तादृशकृतेः आश्रयतासम्बन्धेन चैत्रे अन्वयो भवति। पुनश्च एकत्वसंख्यायाः चैत्रे अन्वयो भवति। तेन ग्रामवृत्तिकर्मतानुकूलगमनानुकूलातीतकालिककृत्याश्रयः एकत्ववान् चैत्र इति शाब्दबोधः।

## लृङ्-लकारः

तर्कालङ्कारः जयकृष्णशर्मा शब्दार्थसारमञ्जरीग्रन्थे लृङः अर्थं प्राह–

---

[१७]शब्दार्थसारमञ्जरी, पृ.– ६५।

[१८]वैयाकरणसिद्धान्तकौमुदी, पृ.– ४७।

"लृङोऽतीतत्वम्, क्रियातिक्रमश्च"[१९] इति। अर्थात् लृङः अतीतत्वम्, क्रियातिक्रमश्चार्थौ भवति। वैयाकरणानुसारं लिङ्विधायकं सूत्रमस्ति लिङ्निमित्ते लृङ् क्रियातिपत्तौ (पा.सू.– ३/३/१३९) इति सूत्रम्। अत्र सूत्रे भविष्यति मर्यादावचनेऽवरस्मिन् इत्यस्मात् सूत्रात् भविष्यति इति पदमनुवर्तते। तथा च सूत्रस्यार्थौ भवति लिङ्निमित्ते भाविनि काले च लृङ् स्यात् क्रियातिपत्तौ गम्यमानायाम्। तत्र लिङो निमित्तं भवति हेतुहेतुमतोर्लिङ् इति सूत्रनिर्दिष्टः हेतुहेतुमद्भावः। एवं चेदमागतं भवति यल्लिङो भविष्यत्त्वम्, हेतुहेतुमद्भावः, अतिपत्तिः चार्थः इति। क्रियातिपत्तिरित्यस्य कोऽर्थः इति जिज्ञासायां वदति क्रियाया अतिपत्तिरतिक्रमेण पतनं सम्भावनम्, यद्देशे यत्काले वा यत्क्रियायाः सम्भवः तदन्यस्मिन् देशे काले वा तत् सम्भावनं प्रसञ्जनमिति यावत्। अर्थात् क्रियायाः इत्युक्ते धात्वर्थस्य यस्मिन् काले यस्मिन् देशे वा अस्तित्वम् उपलभ्यते, तदन्यस्मिन् काले इत्युक्ते तद्भिन्नदेशे तद्भिन्नकाले वा तस्याः क्रियायाः प्रसञ्जनम् इत्युक्ते अपादानम्, एव क्रियातिपत्तिः। कुतश्चित् वैगुण्यात् क्रियानिष्पत्तिः क्रियातिक्रमः इति। अतीतकालेऽपि लृङः प्रयोगः भवति। अत एव कौण्डभट्टोऽपि प्राह– "सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः"[२०] इति।

## निष्कर्षः

निष्कर्षोऽयमत्र– जयकृष्णानुसारं लृङः अर्थः अतीतत्वम्, क्रियातिक्रमश्चार्थः भवति। वैयाकरणानुसारं लृङः अर्थः अतीतत्वम्, भावित्वम्, क्रियातिक्रमः, हेतुहेतुमद्भावश्च।

## शाब्दबोधः

यथा यदि वर्षसहस्रमजीविष्यं तदा पुत्रशतमजनिष्यम् इति। तत्र त्रिषु अर्थेषु मध्ये हेतुहेतुमद्भावस्य धात्वर्थक्रियायामन्वयो भवति। भविष्यत्वस्य च कृत्यर्थकाख्यातस्थले कृतौ आश्रयत्वाख्यातस्थले च धात्वर्थे अन्वयः भवति। क्रियातिपत्तिरूपे अर्थे धात्वर्थस्य विशेषणतया अन्वयो भवति, क्रियातिपत्तिरूपस्य अर्थस्य च प्रथमान्तार्थे विशेष्यतया अन्वयो भवति। अत्र यदि शब्दस्य अनिर्द्धारितकालविशेषवृत्तिः इत्यर्थः। स च

---

[१९] शब्दार्थसारमञ्जरी, पृ.– ६५।

[२०] वैयाकरणभूषणसारः, पृ.– ९४।

क्रियायामन्वेति। द्वितीयायाः अत्यन्तसंयोगो व्यापकत्वं निरूढलक्षणया अर्थः। तथा चोक्तवाक्यस्य अनिर्द्धारितकालविशेषवृत्तिभविष्यद्धेतुभूत-सहस्रवर्षव्यापकजीवनप्रकारकसम्भावनाविषयः अहम्, तत्कालीनभविष्यत्कार्य्यीभूतशतपुत्रकर्म्मोत्पत्त्यनुकूलव्यापारप्रकारकसम्भावनाविषयः इत्यर्थः। यद्यहम् सहस्रवर्षव्यापकजीवनवान् स्याम्, तदा तादृशपुत्रकर्म्मकोत्पत्त्यनुकूल-व्यापारवान् स्याम्।

## उपसंहृतिः

संस्कृतजगति द्विविधः लकारः विद्यते। ते च टित्संज्ञकः ङित्संज्ञकः इति। तत्र टित्संज्ञकः– लट्, लिट्, लुट्, लृट्, लेट्, लोट्। तत्र ङित्संज्ञकः लङ्, लिङ्, लुङ्, लृङ्। तत्रापि लिङ् द्विविधः। आशीर्लिङ् विधिलिङ् च। तत्र लट्लकारस्य वर्तमानत्वमर्थो भवति। लिट्लकारस्य अतीतत्वम्, वक्तुः परोक्षत्वमिति अर्थो भवति। एवञ्च लुट्-लकारस्य अर्थः भविष्यत्त्वम्। वेदे लोडर्थे एव लेट्लकारस्य प्रयोगो भवति। अतः विध्यादिषु अर्थेषु एव पञ्चमलकारस्य प्रयोगो भवति। पुनश्च लोडर्थः भवति आशीः, प्रेरणा, भविष्यत्त्वम्। तत्र लङः अतीतत्वम् अर्थो भवति। विधिलिङः अर्थः भविष्यत्त्वम्, विधिः, सम्भावना च। आशीर्लिङः अर्थः भविष्यत्त्वम्, विध्यादयः, आशीश्च। लुङः अर्थः अतीतत्वम्। लृङः अर्थः अतीतत्वम्, क्रियातिक्रमश्चार्थः भवति। एवञ्च प्रकृते शोधपत्रे अस्मिन् सर्वेषां लकाराणां शक्तिविचारं सम्पाद्य तत्तल्लकाराणां शाब्दबोधः प्रतिपादितो भवतीति शिवम्।

-★

# अतो रोरप्लुतादप्लुते इति सूत्रस्य विमर्शः

## सौमित्र-आचार्यः*

## ०. उपोद्घातः

व्याक्रियन्ते प्रकृतिप्रत्ययादयः शब्दाः येन तत् वेदास्यरूपवेदाङ्गो व्याकरणम्। तेन प्रकृतिप्रत्ययविभागद्वारा शब्दसाधुत्वनिष्पादनं व्याकरणस्य माहात्म्यम्। तादृशस्य व्याकरणस्य बहुषु ग्रन्थेषु सत्सु अन्यतमा भवति महामुनिना शाब्दिकशिरोमणिना विरचिता अष्टाध्यायी। तत्र षष्ठाध्यायस्य प्रथमपादस्य त्रयोदशाधिकैकशततमं सूत्रं विराजते 'अतो रोरप्लुतादप्लुते' इति। व्याकरणशास्त्रे 'संहितैकपदे नित्या नित्या धातूपसर्गयोः। नित्या समासे वाक्ये तु सा विवक्षामपेक्षते॥' इति उक्तम् अस्ति। तत्र संहिता नाम सन्धिः। सा च अच्सन्धिः हल्सन्धिः इत्येवंरूपेण श्रीमद्भट्टोजिदीक्षितेन विरचितायां सिद्धान्तकौमुद्यां कार्यभेदेन सन्धिप्रकरणानि सन्ति। तत्र स्वादिसन्धिप्रकरणे सूत्रमिदं भट्टोजिदीक्षितेन उपन्यस्तम्।

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥

इति षड्विधेषु पाणिनीयसूत्रेषु विधिसूत्रमिदम्।

## १. सूत्रार्थः

अतः इति पञ्चम्यन्तं, रोः इति षष्ठ्यन्तं, न प्लुतः इति अप्लुतः, तस्मात् अप्लुतादिति पञ्चम्यन्तम्, अप्लुते इति सप्तम्यन्तं पदम् इति पदचतुष्टयात्मकमिदं सूत्रम्। 'एङः पदान्तादति' (६-१-१०९) इत्यतः अति इति, 'ऋत उत्' (६-१-१११) इत्यतः उत् इति चानुवर्तते। रोः उत्वविधायकमिदं सूत्रम्। अत्र अति इति विशेष्यः, अप्लुते इति च विशेषणम्। 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (१-१-६६) इति परिभाषया अप्लुते ह्रस्वाकारे परे अव्यवहितपूर्वस्य रु इत्यस्य स्थाने उत्वं भवति। पुनः 'तस्मादित्युत्तरस्य' (१-१-६७) इति परिभाषया अप्लुतह्रस्वाकारात् अव्यवहितपरस्य रोः स्थाने उत्वं भवति इति अर्थ आयाति।

---

*शोधच्छात्रः, संस्कृतविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य

अत्र रोरित्युकारानुबन्धस्यैव उत्वविधौ ग्रहणं भवति तेन प्रातरत्र, भ्रातर्गच्छ इत्यत्र रेफस्य उत्वं न भवति। अत्र तु प्रातर् इति हि रेफान्तमव्ययम्। भ्रातर्गच्छ इत्यत्रापि रेफ उकारानुबन्धवान्नास्ति। तेन देव रुही इत्यादौ न दोषः। यतो हि अत्र उकारः इत्संज्ञकः नास्ति। अपि तु अत्र धातोः उकारः प्रयोजनार्थः अस्ति।

किञ्च सूत्रे रुशब्दः समुदायपरकः नास्ति। यदि रुः इति समुदायरूपं स्यात् तदा महातरुवनमित्यत्रापि 'हशि च' (६-१-११४) इत्यनेन उत्वं प्रसज्येत। किञ्च 'ससजुषो रुः' इति उकारानुबन्धकरणमनर्थकं स्यात्।

तेन सूत्रार्थो भवति अप्लुताद् ह्रस्वाकारात् परस्य उकारेत्संज्ञकस्य स्थाने उः स्यादप्लुते ह्रस्वाकारे परे इति। तथा च भट्टोजिदीक्षितेनोक्तम् "अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति"[1] इति।

एवं च काशिकावृत्तौ अपि उक्तमस्ति "अकारादप्लुतादुत्तरस्य रो रेफस्य उकारानुबन्धविशिष्टस्य अकारे अप्लुते परत उकारादेशो भवति"[2] इति।

## २. सूत्रवैयर्थ्यापत्तिः तन्निरासश्च

इदानीं शङ्का समुदेति यत् ननु उत्वं बाधित्वा 'भोभगोऽघोऽपूर्वस्य योऽशि' (८-३-१७) इति सूत्रस्य परत्वात् यत्वं स्यात्। अर्थात् 'भोभगोऽघोऽपूर्वस्य योऽशि' इत्यनेन भोभगोऽघोऽपूर्वस्य रोः यादेशः स्यादशि परे इत्यर्थः लभ्यते। एवञ्च एतत् सूत्रम् 'अतो रोरप्लुतादप्लुते' (६-१-११३) इति सूत्रात्परमस्ति तेन परत्वात् रोः यत्वं स्यात्। पुनः यदि उच्यते यत्वस्य त्रिपाद्यां विद्यमानत्वात् असिद्धत्वात् उत्वं भविष्यति इति चेन्न यतो हि कृतेऽपि उत्वे तस्य स्थानिवत्त्वेन रुत्वाद्यत्वम् अवश्यमेव भविष्यति इति। तेन सूत्रं व्यर्थम् इति।

परन्तु एतदयुक्तं यतो हि 'भोभगोऽघोऽपूर्वस्य' इति प्राप्तस्य यत्वस्यापवादः भवति इदं सूत्रम्। अत्र अपवादः कीदृशः तत् शेखरकारेण नागेशभट्टेन उच्यते 'द्वन्द्वापवाद एकशेष इतिवदत्र अपवादशब्दप्रयोगः।' अर्थात् यथा एकशेषः न स्यात्तदा द्वन्द्वस्य प्राप्तिः पुनः यदा एकशेषः स्यात् तदा द्वन्द्वो न भवति तथैव यदि उत्वं न स्यात्तदा यत्वं स्यात् इत्येतावता अपवादः। उत्वे कृते यत्वस्य असिद्धतया पूर्वमुत्वे गुणे च यत्वस्य अप्राप्तिः भवति। तेन यथा अपवादेन दीर्घादिना यणादेः

[1]सिद्धान्तकौमुदी, पृ.– १५७

[2]काशिका, पृ.– १६६

अप्राप्तिः तथा अस्य अत्र सत्त्वेन अपवादसादृश्येन अपवादत्वारोपादपवादः। तेन सूत्रस्य उत्वविधानं सार्थकमिति।

## ३. रोः असिद्धत्वापत्तिः तन्निरासश्च

'अतो रोरप्लुतादप्लुते' इति सपादसप्ताध्याय्याम्, एवञ्च 'ससजुषो रुः' (८-२-६६) इति त्रिपाद्यां वर्तते, तेन 'पूर्वत्रासिद्धम्' (८-२-१) इति नियमेन उत्वं प्रति रोः असिद्धत्वात् कथम् उत्वं रोः भवति। तदोत्तरमुच्यते भट्टोजिदीक्षितेन "उत्वं प्रति रुत्वस्य असिद्धत्वं तु न भवति, रुत्वमनूद्योत्वविधेः सामर्थ्यात्"[३] इति। अर्थात् रुत्वस्य असिद्धत्वे उकारेत्संज्ञकरोः अभावेन सूत्रस्य वैयर्थ्यापत्तिः स्यात्। अतः सूत्रारम्भसामर्थ्यात् उत्वं प्रति रुत्वं नासिद्धम् इति ज्ञाप्यते।

एतच्च न्यासकारेणापि उच्यते ननु चोत्त्वे कर्तव्ये पूर्वत्रासिद्धमिति रुत्त्वमसिद्धं, तदसतो रोः कथमुत्त्वं शक्यते विधातुम्? इत्यतः आह रुत्वमप्याश्रयात् सिद्धम् इति। यदि रुत्वमसिद्धं स्यात् तदा स्थानित्वे रोराश्रयणमनर्थकं स्यात्, कस्यचिदुकारानुबन्धविशिष्टस्य रोरसम्भवात्। तस्मादाश्रयादेव रोरसिद्धत्वं नास्तीति।[४]

## ४. सूत्रोदाहरणम्

सूत्रस्य उदाहरणं यथा शिवोऽर्च्यः इति। शिवस् अर्च्यः इति स्थिते 'ससजुषो रुः' इति सकारस्य रुत्वे शिव रु अर्च्यः इति जाते रु इत्यस्य उकारस्य 'उपदेशेऽजनुनासिक इत्' (१-३-२) इत्यनेन इत्संज्ञायां 'तस्य लोपः'(१-३-९ ) इत्यनेन तस्य लोपे शिवर् अर्च्यः इति जाते 'अतो रोरप्लुतादप्लुते' इत्यनेन रेफस्य उकारादेशे शिव उ अर्च्यः इति जाते 'आद्गुणः'(६-१-८७ ) इत्यनेन गुणे 'प्रथमयोः पूर्वसवर्णः'(६-१-१०२ ) इत्यनेन पूर्वसवर्णदीर्घे च प्राप्ते परत्वात् पूर्वसवर्णदीर्घे प्राप्ते 'नादिचि'(६-१-१०४ ) इत्यनेन तस्य निषेधे 'आद्गुणः' इत्यनेन गुणे ओकारे शिवो अर्च्यः इति जाते 'एचोऽयवायावः'(६-१-७८ ) इति अवादेशे प्राप्ते 'एङः पदान्तादति' इति पूर्वरूपे ओकारे शिवोऽर्च्यः इति भवति। एवं वृक्षोऽत्र, प्लक्षोऽत्र इत्यादीनि उदाहरणानि अपि भवन्ति।

---

[३]सिद्धान्तकौमुदी, पृ.– १५७

[४]न्यासः, पृ.– १६६

# ५. अतो रोरप्लुतादप्लुते इत्यंशतात्पर्यविचारः

## ५.१. तपरकरणप्रयोजनम्

ननु सूत्रे अतः इति तपरकरणं किमर्थम्। तदुत्तरमुच्यते तपरपदस्य ह्रस्वाकारपरत्वे तद्ग्रहणाभावे देवा अत्र, वृक्षा अत्र इत्यादि उदाहरणमसङ्गतं स्यात्। यतो हि देवास् अत्र इति स्थिते सस्य रुः। तस्य दीर्घादाकारात्परत्वात् अतः परत्वाभावात् उत्वं न, किन्तु 'भोभगोऽघोऽपूर्वस्य' इति सूत्रेण यत्वे 'लोपः शाकल्यस्य' इति लोपः भवति। तपरत्वाभावे तु आदित्यस्य सत्त्वे 'अणुदित्सवर्णस्य चाप्रत्ययः' इति सूत्रेण सवर्णग्रहणात् देवा अत्र इत्यत्रापि उत्वं स्यात्। तस्मात् अतः इति तपरत्वं दत्तम्।

अधुना अति इति तपरकरणं किमर्थमिति चेत् उच्यते तदा श्व आगन्ता, वृक्ष आश्रित इत्यादि उदाहरणमसङ्गतं स्यात्। तथा च श्वस् आगन्तेति स्थिते सस्य रुः। तस्य ह्रस्वाकारपरकत्वाभावात् उत्वं न भवति। अपि तु यत्वं लोपश्च भवति। तपरः इति तपराभावे पूर्ववत् अत्रापि उत्वे रूपमसंगतं स्यात्। अतः अति इति तपरकरणम्।

## ५.२. अतोऽति इत्यस्य प्रयोजनम्

सूत्रे अतः इत्युक्तत्वात् अग्निरत्र इत्यत्र उत्वं न जातम्। यतो हि अत्र रुत्वस्य प्राक् अकारो नास्ति अपि तु इकारोऽस्ति। तस्मात् अकाराभावात् रोः उत्वं न जातम्।

सूत्रे अति इत्युक्तत्वात् वृक्ष इह इत्यत्र उत्वं न जातम्। यतो हि अत्र रुत्वात् परम् अकारो न विद्यते अपि तु इकारो विद्यते। तस्मात् अकारपरकत्वाभावात् रोः उत्वं न जातम्।

## ५.३. अप्लुतादप्लुते इत्यस्य प्रयोजनम्

सूत्रे अप्लुतात् इति किमर्थमिति प्रश्ने उच्यते एहि सुस्रोत३ अत्र स्नाहि इति। अत्र सुस्रोतशब्दः कस्यचित् संज्ञा। सम्बुद्धेर्हल्ङ्यादिलोपः, 'दूराद्धूते च' (८-२-८४) इति टेः तकारोत्तराकारस्य प्लुतः, सस्य रुः। सुस्रोत३र् अत्रेति स्थिते प्लुतात् परस्य रोः उत्वनिवृत्तये अप्लुतादिति पदं दत्तम्।

अप्लुते इति किमर्थमिति चेदुच्यते तिष्ठतु पय अ३ग्निदत्त इत्यत्र पयस् इति सस्य रुः, तस्य प्लुतपरकत्वादुत्वं न भवति। अत्र अग्निदत्त

इत्यत्र 'गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्'(८-२-८६ ) इत्यनेन संयोगपरकगुरुसंज्ञकाद्यवर्णस्य प्लुतः भवति। तेन अप्लुते इति प्लुतस्य निषेधात् रोः उत्वं न जातम्।

ननु 'रोः सुपि' (८-३-१६) इत्यनन्तरम् अत उरति, हशि च इति सूत्रे आस्ताम्। तथा च अप्लुतादप्लुते इति न कर्तव्यं भवति इति। तदा उत्तरमुच्यते तथा हि सति उत्वमसिद्धं भवति, तेन शिवोऽर्च्यः इत्यादौ 'आद्गुणः' इति गुणं प्रति उत्त्वस्य असिद्धतया गुणानापत्तिः भविष्यति।

ननु अत ओरिति इत्योकारादेशविधानेन अदोषः इति न वाच्यं तथा सति ओकारादेशस्य असिद्धतया 'एङः पदान्तात्' इति पूर्वरूपानापत्तिः स्यात्।

एतच्च भाष्यकारेणापि प्रकृतसूत्रे शङ्कामुत्थाप्य तस्य निराकरणं कृतम्। तथा चोच्यते 'अतो रोरप्लुतादप्लुते' इति सूत्रे किमर्थम् अप्लुतादप्लुत इत्युच्यते? प्लुतात्परस्य प्लुते वा परतो मा भूत् इति। प्लुतात्परस्य सुस्रोत३ अत्र न्वसि। प्लुते परतः तिष्ठतु पय अ३ग्निदत्त इति।[5]

किञ्च भाष्यकारेण 'ईदूदेद्द्विवचनं प्रगृह्यम्' (१-१-११) इत्यत्रापि अस्मिन् विषये उक्तम्। तथा च सूत्रे 'ईदूदेद्द्विवचनं प्रगृह्यम्' इत्यत्र तपरकरणं किमर्थमिति प्रश्ने उक्तं प्लुतानां प्रगृह्यसंज्ञानिवृत्त्यर्थं, यतो हि प्लुतः स्वरसन्धिषु सिद्धः तस्मात् सिद्धस्य प्लुतस्य निवृत्त्यर्थं तपरकरणं कृतं, तस्य फलं च अप्लुतादप्लुते इति न वक्तव्यं भवति इत्येवं पूर्वपक्षरूपेण उपन्यासानन्तरम् अन्त्ये सिद्धान्तपक्षरूपेण प्रतिपादितं यत् प्लुतः असिद्धः स्वरसन्धिषु। किञ्च एतस्य प्रयोजनम् अप्लुतादप्लुते इति न वक्तव्यं भवति इत्येवं यत् उक्तमासीत् तस्य तु न्यासः क्रियते एव अप्लुतादप्लुते इति।[6]

## ६. प्लुतस्य असिद्धत्वापत्तिः तन्निरासश्च

अत्र शङ्कोदेति यत् उत्वविधायकमिदम् 'अतो रोरप्लुतादप्लुते' इति सूत्रं सपादसप्ताध्याय्यां किञ्च 'दूराद्धूते च' इति प्लुतविधायकं सूत्रं त्रिपाद्यां वर्तते। तेन 'अतो रोरप्लुतादप्लुते' इति सपादसप्ताध्यायीं प्रति 'दूराद्धूते च' इति त्रैपादिकम् असिद्धं भवति। तेन अप्लुतादिति पदस्य सत्त्वेऽपि प्लुतस्य असिद्धत्वात् अप्लुतात्

[5] महाभाष्यं, पृ.– २८७
[6] महाभाष्यं, पृ.– ५५४

अतः परस्य विद्यमानत्वात् एहि सुस्रोत३ अत्र स्नाहि इत्यादौ रोः उत्वापत्तिः अवश्यमेव भविष्यति।

## ६.१. भाष्यकारमतम्

एतस्य समाधानं भाष्यकारेण आक्षेपसमाधानपुरःसरं प्रकृतसूत्रे प्रदत्तम्। तथा च अत्र शङ्का कृता ननु अतोऽति इत्युच्यते चेदेव तपरकरणात् तस्य एकमात्रिकत्वात् प्लुतस्य च त्रिमात्रिकत्वात् प्लुतस्य निवृत्तिः सम्भवति, तेन प्लुतात् परस्य प्लुते वा परतः कथम् उत्वस्य प्राप्तिः भवति। एतस्योत्तरमुच्यते 'दूराद्धूते च' इति, 'गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्' इति सूत्रेण च विहितः प्लुतः असिद्धः, तस्मात् प्लुतस्य असिद्धत्वात् उत्वं प्राप्नोति। पुनः अप्लुतात्परस्य अप्लुते वा परतः उत्वं न भवति इत्युच्यमानेऽपि प्लुतः तु असिद्धः, तेन असिद्धत्वात् अत्र उत्वं कुतः न प्राप्नोति इति जिज्ञासायाम् उच्यते अप्लुतभाविनः परस्य अप्लुतभाविनि वा परतः इत्यर्थः स्वीक्रियते। तेन सुस्रोत३ अत्र न्वसि, तिष्ठतु पय अ३ग्निदत्त इत्यादौ प्लुतभावित्वात् रोः उत्वं न भवति। एतस्य पुनः खण्डनं क्रियते एतत्प्रयोजनं नास्ति। यतो हि सिद्धः प्लुतः स्वरसन्धिषु। एतच्च प्लुतप्रगृह्या अचि नित्यम् इति सुत्रे प्लुतस्य प्रकृतिभावशासनेन ज्ञाप्यते। सतो हि कार्यिणः कार्येण भवितव्यम्।

अत्र आक्षेपः क्रियते अप्लुतादप्लुतवचने अकारहशोः समानपदे 'हशि च' इत्यनेन विहितस्य उत्वस्य निषेधः प्राप्नोति तस्य प्रतिषेधो वक्तव्यः। यतो हि पयो३ऽट् इत्यत्र दूराद्धूते च इत्यकारस्य वाक्यटेः प्लुतभावित्वादुत्वस्य प्रतिषेधः प्राप्नोति। किञ्च पयोऽ३द् इत्यत्र संयोगपरस्य अकारस्य गुरुत्वात् गुरोरनृत इति प्लुतभावित्वादप्लुतादिति निषेधाद् 'हशि च' इत्यनेन उत्वं न प्राप्नोति। तस्य च उत्वनिषेधस्य प्रतिषेधो वक्तव्यः। तेन उत्वनिषेधस्य प्रतिषेधे पयो३ऽट् पयोऽ३द् इत्यादौ उत्वे कृते आद्गुणः इत्यनेन गुणो भवति। एतस्य खण्डनं क्रियते एतत्तु न वक्तव्यं यतो हि बहिरङ्गः प्लुतः अन्तरङ्गम् उत्वम्। तेन 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्यनेन प्लुतस्य बहिरङ्गत्वात् प्लुतः असिद्धः।

पुनः आक्षेपः क्रियते ननु यदि प्लुतः बहिरङ्गः उत्वम् अन्तरङ्गम् इति स्वीक्रियते तर्हि सुस्रोत३ऽत्र न्वसि इत्यत्रापि उत्वं प्राप्नोति। अतः उच्यते अत्र अन्तरङ्गः प्लुतः, बहिरङ्गम् उत्वम्। तर्हि कुत्र प्लुतः अन्तरङ्गः बहिरङ्गो वा किञ्च उत्वं कुत्र अन्तरङ्गं बहिरङ्गं वा इत्येवं जिज्ञासायाम् अन्तरङ्गत्वबहिरङ्गत्वभावं स्पष्टीकर्तुम् उच्यते

भाष्यकारेण "वाक्यान्तस्य वाक्यादावन्तरङ्गः प्लुतः, बहिरङ्गमुत्वम्। समानवाक्ये पदान्तस्य पदादावुत्वमन्तरङ्गं, बहिरङ्गः प्लुतः"[७] इति।

ननु किमर्थम् उत्वं प्रति बहिरङ्गत्वं हेतुत्वेन स्वीक्रियते न पुनः असिद्धत्वम्। यथा उत्वं बहिरङ्गं वर्तते तद्वत् असिद्धोऽपि वर्तते इति चेन्न यतो हि आश्रयणसामर्थ्यात् पूर्वत्रासिद्धम् इति असिद्धत्वस्य बाधे असिद्धः प्लुतः सिद्धो भवति, परन्तु बहिरङ्गासिद्धत्वस्य बाधः कर्तुं न शक्यते। अथवा यस्याम् अवश्यप्राप्तायां परिभाषायामुत्त्वमारभ्यते सा आश्रयात् सिद्धा स्यात्। यथा असिद्धपरिभाषायाम्। बहिरङ्गपरिभाषायां तु प्राप्तायाम् अप्राप्तायां वा उत्त्वम् आरभ्यते। तस्मात् आश्रयणसामर्थ्यात् प्लुतः सिद्ध एव। तद्वारणाय च प्रकृतसूत्रे अप्लुतादप्लुते इति सूत्रकरणं सार्थकमिति।

## ६.२. भट्टोजिदीक्षितमतम्

अस्यां शङ्कायां भट्टोजिदीक्षितेनोच्यते 'अप्लुतादिति विशेषणे तु तत्सामर्थ्यान्नासिद्धत्वम्'[८] इति। अर्थात् अप्लुतात् इति पदं सूत्रे गृहीतं, तेन तत्सामर्थ्यात् प्लुतः नासिद्धः। यदि प्लुतः असिद्धः भवति तदा अप्लुतादिति व्यर्थं स्यात्। अतः तत्सामर्थ्यात् प्लुतस्य नासिद्धत्वमिति।

ननु तथापि अप्लुतादित्यस्य वैयर्थ्यापत्तिः, यतो हि प्लुतात् परस्य रोः अतः इति तपरकरणादेव उत्वनिवृत्तिः सम्भवति। किञ्च यदि उच्यते उत्वे कर्तव्ये प्लुतस्य तु असिद्धत्वात् अतः परस्यापि सत्त्वाद् उत्वं स्यादिति चेत् भट्टोजिदीक्षितेन उच्यते "तपरकरणस्य तु न सामर्थ्यम्, तस्य दीर्घनिवृत्त्या चरितार्थत्वात्।"[९] तथा च देवा अत्र इत्यादौ दीर्घव्यावृत्तिः तपरकरणस्य प्रयोजनं वर्तते। तेन तपरकरणस्य अन्यत्र चरितार्थत्वात् प्लुतस्य असिद्धत्वाभावसाधने न सामर्थ्यम्।

## ६.३. नागेशमतम्

अत्र शेखरकारेण नागेशभट्टेन उच्यते 'प्रतियोगित्वेन तदाश्रयणसामर्थ्यात्'[१०] इति। अर्थात् यदि अप्लुतादिति विशेषणबलात् प्लुतस्य सिद्धत्वं ज्ञाप्यते इत्युच्यते

[७]महाभाष्यं, पृ.– २८९

[८]सिद्धान्तकौमुदी, पृ.– १५९

[९]सिद्धान्तकौमुदी, पृ.– १५९

[१०]लघुशब्देन्दुशेखरः, पृ.– ४८१

तर्हि अतः इति तपरकरणेनैव तद्व्यावृत्त्या सिद्धिः स्यात्। तेन तद्विशेषणस्य स्वांशे चारितार्थ्याभावेन मूलमसङ्गतं स्यात्। अतः प्रतियोगित्वेन तदाश्रयणसामर्थ्यादिति नागेशभट्टेन उच्यते। अत्र न प्लुतः इति अप्लुतः इत्येवं समासेन निष्पन्ने अप्लुतशब्दभेदप्रतियोगी प्लुतः। एवञ्च भेदप्रतियोगित्वेन प्लुतस्याश्रयणसामर्थ्यात् पूर्वत्रासिद्धमित्यनेन प्लुतस्य असिद्धत्वं न भवति। अतः एहि सुस्रोत३ अत्र स्नाहि इति उदाहरणे प्लुतस्य सिद्धत्वात् रोः उत्वं न भवति।

भाष्यकारेणापि उक्तम् आश्रयात् सिद्धः इति। तच्च 'अदसो मात्' (१-१-१२) इत्यत्र भाष्यकारेण प्रतिपादितम्। तथा च 'अदसो मात्' इत्यनेन प्रगृह्यसंज्ञा विधीयते, परन्तु तत्र दोषः भवति। यतो हि अमू अत्र, अमी आसते इत्यादौ मात् प्रगृह्यसंज्ञायां तस्य ईत्वस्य ऊत्वस्य मत्वस्य च असिद्धत्वात् अयावेकादेशाः प्राप्नुवन्ति इति, तस्य समाधानार्थं वार्तिकं प्रस्तुतम् 'आश्रयात् सिद्धत्वं यथा रोरुत्वे'[११] इति। एतस्य अर्थो भवति यत् 'ससजुषो रुः' इति त्रैपादिकेन सूत्रेण सकारस्य रुत्वं विधीयते। ततः विहितस्य रोः 'अतो रोरप्लुतादप्लुते' इत्यनेन उत्वं विधीयते। तेन रुत्वस्य त्रैपादिकत्वात् असिद्धत्वं भवति, तस्मात् सूत्रेण उत्वविधानं व्यर्थं स्यात्, तस्मात् तत्र आश्रयात् सिद्धत्वं स्वीक्रियते, तथा अत्र आश्रयात् ईत्वादीनां सिद्धत्वे 'अदसो मात्' इत्यनेन प्रगृह्यसंज्ञा विधीयते।

किञ्च आश्रयात् सिद्धः इति किमर्थं, यत्रैव रुः सिद्धः तत्रैव उत्वमपि विधीयताम्। अर्थात् रोः सुपि इत्यनन्तरम् अत उरति इत्येवं सूत्रकरणेनैव रोः उत्वं भवति। तेन 'पूर्वत्रासिद्धम्' इत्यस्य प्रसङ्ग एव न भवति इति आक्षेपे क्रियमाणे तदुत्तरमुच्यते सिद्धान्तवार्तिकेन असिद्धे ह्युत्वे आद्गुणाप्रसिद्धिः इति।[१२] अर्थात् यदि उत्वविधायकं सूत्रं त्रिपाद्यां पठ्येत तर्हि 'आद्गुणः' इति सूत्रदृष्ट्या तस्य असिद्धत्वात् वृक्षोऽत्र, प्लक्षोऽत्र इत्यादौ गुणो न प्राप्नोति। तस्मात् आश्रयात् रुत्वस्य सिद्धत्वं स्वीक्रियते। तेन न दोषः।

अत्र शङ्कोदेति यत् भेदप्रतियोगित्वेन प्लुतस्य आश्रयणसामर्थ्यात् 'पूर्वत्रासिद्धम्' इति असिद्धत्वं बाध्यते इति ज्ञापनेन पयोऽट्, पयोऽद् इति उदाहरणद्वये रोः उत्वं न भवति। तथा चोच्यते पयसि अटति इत्यर्थे

[११]महाभाष्यं, पृ.– ५७४

[१२]महाभाष्यं, पृ.– ५७६

पयश्शब्दपूर्वादटतेः क्विप्, पयो ददातीत्यर्थे तत्पूर्वात् ददातेः 'आतोऽनुपसर्गे कः' इति कप्रत्ययः। ततः सम्बुद्धौ आगच्छ हे पयोऽट् , आगच्छ हे पयोऽद इति प्रक्रियादशायां 'पयस् अट्' तथा 'पयस् द' इति स्थिते सकारस्य रुत्वे प्रथमप्रयोगे 'दूराद्धूते च' इति सूत्रेण अटः अकारस्य प्लुतः प्राप्नोति, अन्यत्र च रेफदकारयोः संयोगात् पूर्वस्य गुरुसंज्ञा भवति, ततः गुरुभूतस्य यकारोत्तराकारस्य 'गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्' इत्यनेन प्लुतः प्राप्नोति। उभयत्र तस्मिन्नेव समये उत्वमपि प्राप्नोति। परन्तु इदानीं प्लुतस्य सिद्धत्वात् प्रथमे प्लुते कृते प्रथमे उदाहरणे रोः परम् अप्लुताकाराभावात् उत्वं न भवति। एवमेव द्वितीये उदाहरणे रुः प्लुतात् परमस्ति। अतः उत्वं न भवति। अतः उभयत्र उत्वानापत्तिः स्यात्।

एतस्य समाधानम् उच्यते शेखरकारेण एकपदस्थवर्णद्वयसापेक्षत्वात् उत्वमन्तरङ्गं, 'वाक्यस्य टेः प्लुतः उदात्तः' इत्युक्तत्वेन वाक्यसम्पादकपदान्तरसापेक्षत्वात् प्लुतस्य बहिरङ्गत्वं भवति। एवञ्च 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया अन्तरङ्गोत्वदृष्ट्या प्लुतस्य असिद्धत्वेन प्रथमतः उत्वे प्लुतसिद्धिः। एवञ्च प्रतियोगित्वेन प्लुतस्याश्रयणसामर्थ्यात् पूर्वत्रासिद्धमित्यसिद्धत्वमेव बाध्यते, न तु बहिरङ्गासिद्धत्वमिति। अन्यथा प्रतियोगित्वेन प्लुतस्याश्रयणसामर्थ्यात् असिद्धत्वसामान्यस्य बाधे तु उत्वात् परत्वात् आद्येऽङ्बद्दाकारस्य 'दूराद्धूते च' इत्यनेन, अन्त्ये यकाराकारस्य 'गुरोरनृतो' इति प्लुते तस्य प्लुतस्योत्वदृष्ट्या सिद्धत्वात् परत्वात् प्लुते आद्ये उदाहरणे अप्लुतपरत्वाभावात् अन्त्ये उदाहरणे अप्लुतात्परत्वाभावात् उत्वं न स्यात्। एवञ्च तत्सामर्थ्यात् पूर्वत्रासिद्धमित्यसिद्धत्वमेव बाध्यते न तु बहिरङ्गासिद्धत्वमिति।

अत्र पुनः प्रश्नः यत् ननु अन्तरङ्गपरिभाषा वाह ऊठ् इति सूत्रेण ज्ञाप्यते, तस्मात् अन्तरङ्गपरिभाषा सपादसप्ताध्यायीस्था वर्तते। तद्दृष्ट्या त्रिपाद्या असिद्धत्वात् तत्र अन्तरङ्गपरिभाषाया अप्रवृत्त्या कथमनया परिभाषया प्लुतस्य असिद्धत्वप्रतिपादनं क्रियते इति। एतस्य उत्तरमुच्यते अन्तरङ्गपरिभाषादृष्ट्या पूर्वत्रासिद्धमित्यनेन बहिरङ्गस्य प्लुतस्य असिद्धत्वेऽपि न क्षतिः। परिभाषादृष्ट्या असिद्धस्यापि बहिरङ्गस्य अन्तरङ्गं प्रति असिद्धत्वं सम्भवत्येव। कथमिति चेत् उच्यते यथा लोके स्वदृष्ट्या अविद्यमानस्य घटादेः परं प्रत्यविद्यमानत्वप्रतिपादनं दृश्यते तथा प्रकृते अन्तरङ्गपरिभाषादृष्ट्या अविद्यमानस्यापि त्रैपादिकस्य बहिरङ्गस्यान्तरङ्गं

प्रत्यसिद्धत्वप्रतिपादनं युज्यते एव। किञ्च असिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषायाः लिङ्गमन्तरङ्गशास्त्रं भवति। तेन अन्तरङ्गस्य सिद्धत्वात् अन्तरङ्गपरिभाषया तस्य बलवत्त्वं भवति। अन्तरङ्गस्यासिद्धत्वे तु भोज्यस्य अभावे यथा भोजनस्य प्रतिपादनं न सम्भवति तद्वत् परिभाषादृष्ट्या अन्तरङ्गस्य असिद्धत्वे तस्य अदर्शनात् प्रतिपाद्याभावे कं प्रति बहिरङ्गस्य असिद्धत्वं प्रतिपाद्येत। एवञ्च यदि बहिरङ्गस्य प्लुतस्य असिद्धिः न भवेत् तर्हि अत्र उत्वस्य सिद्धिः न स्यात्।

अत्र शङ्कोदेति यत् ननु अप्लुतः इति प्रतियोगित्वेन प्लुतस्याश्रयणसामर्थ्यात् यथा पूर्वत्रासिद्धमिति सूत्रेण विहितस्य असिद्धत्वस्य बाधः क्रियते तथैव असिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषाबोधितस्य बहिरङ्गासिद्धत्वस्यापि बाधः कुतो न भवति। तस्य उत्तरमुच्यते अप्लुतात् इति पदे प्रतियोगित्वेन प्लुतस्य आश्रयेण येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीति न्यायेन पुनः पाणिनिना साक्षादुच्चारितत्वात् प्रत्यक्षत्वेन केवलं पूर्वत्रासिद्धम् इति सूत्रेण क्रियमाणस्य असिद्धत्वस्यैव बाधः क्रियते न तु बहिरङ्गासिद्धत्वस्य।

परन्तु पूर्वत्रासिद्धमिति सूत्रं यथा सर्वदा प्लुतस्य असिद्धत्वं प्रतिपादयति तद्वत् असिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषा सर्वदा प्लुतस्य असिद्धत्वं न प्रतिपादयति। तथा च एहि सुस्रोत३ अत्र स्नाहि इत्यादौ तु एकवाक्यमात्रसापेक्षत्वात् प्लुतोऽन्तरङ्गः भवति। भिन्नवाक्यस्थाकारसापेक्षत्वात् उत्वं बहिरङ्गं भवति। एतेन अत्र परिभाषया प्लुतस्य असिद्धिः नास्ति। एवञ्च परिभाषाप्रतिपादितासिद्धत्वस्य बाधः अप्लुताद्ग्रहणसामर्थ्यात् न भवति इति भाष्ये स्पष्टमिति। एतेन प्रकृतसूत्रे अप्लुतादप्लुते इति सूत्रकरणं सार्थकमिति।

## ७. उपसंहृतिः

एवं पर्यालोचनेन वक्तुं शक्यते यत् सूत्रेऽस्मिन् पूर्वत्रासिद्धमिति असिद्धत्वं न प्रवर्तते। तेन प्लुतस्य त्रिपाद्यां विद्यमानत्वेऽपि तस्य अत्र न असिद्धत्वापत्तिः। एवञ्च सूत्रे पदानां बहुधा वैयर्थ्यापत्तिरूपाक्षेपेऽपि सर्वेषां मते प्रतिपदं सार्थकमेव। तेन अतोऽति इत्यादिरूपं यत् लाघवं स्यात् इति पूर्वपक्षिभिः आक्षेपः कृतः तत्तु सर्वैः निराकृत्य अतो रोरप्लुतादप्लुते इति समग्रं सूत्रमेव करणीयम् इति प्रतिपादितम्। तच्च आक्षेपसिद्धान्तविचारादिपुरःसरम् उपन्यासेन आलोचितमित्यलमतिजल्पनेन।

-★-

# प्रसिद्धपाणिनीतरव्याकरणानां प्रत्याहारसूत्रविमर्शः

सुजितमाइतिः*

पाणिनीयव्याकरणस्य प्रारम्भे 'अइउण्' इत्यारभ्य 'हल्' इति यावत् चतुर्दशमाहेश्वरसूत्राणि सन्निवेशितानि। व्याकरणशास्त्रे एतेषां चतुर्दशसूत्राणां माहेश्वरसूत्रं शिवसूत्रं शिवसूत्रजालं प्रत्याहारसूत्रम् अक्षरसमाम्नायः वर्णसमाम्नायः चेत्यस्ति नामान्तरम्। अक्षरसमाम्नाये स्वरव्यञ्जनादीनां भेदः स्पष्टतया प्रतिभाति। तथाहि पतञ्जलिना उक्तम्– "एषा ह्याचार्यस्य शैली लक्ष्यते, यत्तुल्यजातीयान्, तुल्यजातीयेषूपदिशति अचोऽक्षु हलो हल्सु"[१] इति। अस्य भाष्यस्य तात्पर्यं विवरितुकाम आचार्यः कैयट आह– "यथा लोके ब्राह्मणैः सह ब्राह्मणा भोज्यन्ते क्षत्रियैः सह क्षत्रिया इति एवमिहापि आचार्येण वर्णा निर्दिष्टा इत्यर्थः"[२] इति।

एतेषां चतुर्दशप्रत्याहारसूत्राणां प्रणेता क इत्यस्मिन् विषये अस्ति मतानैक्यम्। उच्यते एतानि चतुर्दश सूत्राणि महेश्वरादेव अधिगतानि। महेश्वरादागतानीति विग्रहे 'तत आगतः' इति पाणिनीयसूत्रेण अणि बहुवचनविवक्षायां माहेश्वराणि इति जायते। अर्थात् एतानि १४ सूत्राणि महेश्वरात् अधिगतानि। श्लोकप्रमाणेन अधस्तावद् स्पष्टीक्रियते–

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
उद्धर्तुकामः सनकादिसिद्धान् एतद्विमर्शे शिवसूत्रजालम्॥[३] इति।

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥[४] इति।

महाभाष्यकारस्य मते वृत्तिसमवायार्थः अनुबन्धकरणार्थश्च वर्णानामुपदेशो क्रियते। वृत्तिसमवायश्च अनुबन्धकरणं च प्रत्याहारस्य कृते एव। प्रत्याहाराय

---

*शोधच्छात्रः, संस्कृतविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य

[१]महाभाष्यस्य प्रत्याहाराह्निके, पृ. १३७

[२]तत्रैव

[३]नन्दिकेश्वरकाशिका, श्लो. १

[४]पाणिनीयशिक्षा, श्लो. ५७

सूत्राणि इति विग्रहे चतुर्थीतत्पुरुषसमासेन प्रत्याहारसूत्राणि इति पदनिष्पत्तिः। पाणिनीयव्याकरणमेव उपजीव्यत्वेनादाय साधारणजनानाम् अक्लेशेनावबोधाय बहुषु प्रदेशेषु बहवः पण्डिताः पाणिनीयसूत्राणि विपर्यस्य व्याकरणग्रन्थान् प्रणिन्युः। तेषु कातन्त्र-चान्द्र-जैनेन्द्रादिव्याकरणग्रन्थाः अपाणिनीयव्याकरणनाम्ना प्रसिद्धिं गताः। अधुना कातन्त्र-चान्द्र-जैनेन्द्र-शाकटायन-सुपद्म-मुग्धबोध-संक्षिप्तसार-हरिनामामृतप्रभृतिषु पाणिनीतरव्याकरणेषु पठितानि प्रत्याहारसूत्राणि उल्लिख्य पाणिनीयप्रत्याहारसूत्रदिशा यथामति विशिष्टम् अध्ययनं प्रस्तूयते।

## कातन्त्रव्याकरणम्

अपाणिनीयव्याकरणग्रन्थेषु कातन्त्रव्याकरणं विशिष्टं स्थानं लभते। 'कलापम्', 'कलापकम्', 'कौमारम्' इत्यादीनि व्याकरणस्यास्य नामान्तराणि। प्रसिद्धमस्ति यत् कार्तिकेयस्याज्ञया शर्ववर्मणा व्याकरणमिदं विरचितम्। व्याकरणस्यास्य द्वौ पाठौ दृश्येते, लघुपाठः वृद्धपाठश्च। तत्र लघुपाठः अनधीतव्याकरणछात्राणां कृतैव प्रणीतोऽभवत्। अत्र यद्यपि प्रत्याहारसूत्राणि साक्षात् न दृश्यन्ते तथापि अस्य व्याकरणस्य प्रारम्भे ग्रन्थकारैः वर्णसमाम्नायानां सिद्धत्वं स्वीकृत्य स्वकृतैः प्रत्याहारैः व्याकरणप्रक्रियायाः कार्यं कृतमस्ति। ग्रन्थकारकृतैः प्रत्याहारैरेव व्याकरणेऽस्मिन् स्वर-नामिन्-सन्ध्याक्षर-व्यञ्जन-वर्ग-घोष-अघोष-अन्तःस्थ-अनुनासिकादीनां शब्दानां कार्यं लक्ष्यते। पाणिनीतरव्याकरणेषु कातन्त्रव्याकरणं हि सर्वप्रथमं पाणिनीयव्याकरणस्य प्रत्याहारशैलीं त्यक्त्वा नवीनया पद्धत्या शब्दानां साधुत्वं प्रतिपादितम् अस्ति। अतः अस्य प्रथमे पादे एवं गुम्फितम् अस्ति–

सिद्धो वर्णसमाम्नायः॥१॥ तत्र चतुर्दशादौ स्वरः॥२॥ दश समानाः॥३॥ तेषां द्वौ द्वावन्योन्यस्य सवर्णौ॥४॥ पूर्वो ह्रस्वः॥५॥ परो दीर्घः॥६॥...चेत्यादीनि।

## चान्द्रव्याकरणम्

चन्द्रेण वा चन्द्राचार्येण वा चन्द्रगोमिना वा प्रणीतं चान्द्रव्याकरणं पाणिन्यनन्तरकालिकेषु व्याकरणेषु प्रसिद्धम् अस्ति। षडध्यायात्मकं व्याकरणशास्त्रमिदम्। बौद्धाचार्येण चन्द्रगोमिना व्याकरणेऽस्मिन् एकं स्थलं परिवर्त्य पाणिनीयप्रत्याहारसूत्राणि एव आश्रितानि। अतः अत्र चन्द्रगोमिना पाणिनीयतन्त्रं हि अनुसृतम् अस्ति। व्याकरणेऽस्मिन् प्रत्याहारसूत्राणां व्यवस्था

एतादृशी अस्ति– अइउण्॥१॥ ऋॡक्॥२॥ एओङ्॥३॥ ऐऔच्॥४॥ हयवरलण्॥५॥ ञमङणनम्॥६॥ झभञ्॥७॥ घढधष्॥८॥ जबगडदश्॥९॥ खफछठथचटतव्॥१०॥ कपय्॥११॥ शषसर्॥१२॥ हल्॥१३॥

अतः त्रयोदश प्रत्याहारसूत्राणि अत्र वर्तन्ते। व्याकरणेऽस्मिन् हयवरट् लण् चेति सूत्रद्वयं मिलित्वा हयवरलण् इति विशेषरूपं दृश्यते। तेन चान्द्रव्याकरणे अट् इति प्रत्याहारः नास्तीति वक्तुं शक्नुमः। पाणिनीयव्याकरणे तु अट् इति प्रत्याहारः द्विः व्यावहृतोऽस्ति। एकं 'शश्छोऽटि' (पा.सू. ८.४.६२) इत्यस्मिन् सूत्रे अपरन्तु 'अट्कुप्वाङ्नुम्व्यवायेऽपि' (पा.सू. ८.४.२) इत्यत्र। परन्तु शश्छोऽटि इत्यस्य सूत्रस्य स्थाने चन्द्रगोमिना अमिति प्रत्याहारेण 'शश्छोऽमि'[५] इति सूत्रं प्रणीतम्। सूत्रमिदमपि त्रिमुनिसम्मतम् अस्ति। यतो हि पाणिनीयव्याकरणेऽपि अस्य सूत्रस्य व्याख्यानकाले उक्तानुक्तदुरुक्तार्थकृता वार्त्तिककारेण अमिति प्रत्याहारः स्वीकृतोऽस्ति 'छत्वममीति वाच्यम्'[६] इत्यनेन वार्त्तिकेन। 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यस्य स्थाने अडिति प्रत्याहारस्य त्यागाय चन्द्रगोमिना 'चुटुतुलशर्व्यवाये'[७] इति सूत्रं विरच्य निषेधमुखेन णत्वं प्रतिपादितम्। तेन अट् इति प्रत्याहारस्यावश्यकता न दृश्यते। किन्तु पाणिनिना येषु वैदिकसूत्रेषु अडिति प्रत्याहारः व्यवहृतः तत्र तत्र चन्द्रगोमिना कया रीत्या तत् परिहृतं तत्तु न ज्ञायते। यतः चान्द्रव्याकरणस्य वैदिकभागो न प्राप्यते।

## जैनेन्द्रव्याकरणम्

जिनेन्द्रेण प्रोक्तं व्याकरणं हि जैनेन्द्रव्याकरणम्। अस्य व्याकरणस्य मुख्याचार्यो भवति देवनन्दी। जिनेन्द्रबुद्धिरिति आचार्यस्यास्य नामान्तरम्। दक्षिणभारते जैनसम्प्रदायानां मध्ये व्याकरणमिदं प्रचलितम् आसीत्। जैनेन्द्रव्याकरणे यद्यपि अइउणादिप्रत्याहारसूत्राणाम् उपस्थितिः न दृश्यते तथापि प्रत्याहारविहितानां कार्याणां बहुशः प्रयोगो दरीदृश्यते। अतः प्रसिद्धत्वात् देवनन्द्याचार्येण व्याकरणेऽस्मिन् प्रत्याहारसूत्राणि नोल्लिखितानीति मे मतिः। यतो हि तत्र प्रत्याहारविधायकम् 'अन्त्येनेतादिः'[८] इति सूत्रं दृश्यते। अतः

---

[५]चा. ६.४.१५७

[६]वा. ५०२५

[७]चा. ६.४.१३२

[८]जै. १.१.७३

एवं वक्तुं शक्नुमः यत् आचार्येण प्रत्याहारविधायकं सूत्रं प्रणीय प्रत्याहारसूत्राणि तेन स्वीकृतानीति ज्ञापितम् अस्ति। स्पष्टार्थं पाणिनीयप्रत्याहारसूत्राण्याश्रितानि कानिचन कार्याणि उल्लिख्यन्ते। यथा– जैनेन्द्रव्याकरणे अण् इति प्रत्याहारस्य 'रन्तोऽण् उः'[९] इत्यस्मिन् सूत्रे, इक्प्रत्याहारस्य 'इकस्तौ'[१०] इत्यस्मिन् सूत्रे, अच्प्रत्याहारस्य 'द्वित्वेऽचि'[११] इत्यत्र व्यवहारः दृश्यते।

## शाकटायनव्याकरणम्

जैनाचार्यपाल्यकीर्तिविरचिते शाकटायनव्याकरणेऽपि त्रयोदश प्रत्याहारसूत्राणि दृश्यन्ते– अइउण्॥१॥ ऋक्॥२॥ एओङ्॥३॥ ऐऔच्॥४॥ हयवरलञ्॥५॥ ञमङणनम्॥६॥ जबगडदश्॥७॥ झभघढधष्॥८॥ खफछठथट्॥९॥ चटतव्॥१०॥ कपय्॥११॥ शषसअंअः क पर्॥१२॥ हल्॥१३॥

पाणिनीयप्रत्याहारसूत्रेभ्यः अत्र नैका भेदा दृश्यन्ते। प्रथमतः अस्मिन् व्याकरणे प्रत्याहारसूत्रेषु ऌकारस्य ग्रहणं नास्ति। वर्णसमाम्नाये ऋकारे सत्यपि पृथक् ऌकारोपदेशस्य प्रयोजनं न दृष्ट्वा आचार्येण ऌकारोपदेशो न कृतः इति मन्ये। यतः ऋकारऌकारयोः सावर्ण्यम् अस्ति। द्वितीयतः 'हयवरट्' 'लण्' चेति सूत्रयोः स्थाने अत्र 'हयवरलञ्' इति विशेषसूत्रं परिलक्ष्यते। अत्र अनुबन्धस्यापि परिवर्तनम् अस्ति। तस्मात् व्याकरणेऽस्मिन् 'अट्' इति प्रत्याहारस्य उपयोगो नास्ति। तृतीयतः पाणिनीयवर्णसमाम्नाये चतुर्थवर्णानां स्थानं आदौ ततः तृतीयवर्णानां स्थितिः परिलक्ष्यते। परन्तु शाकटायनव्याकरणे अस्य क्रमस्य परिवर्तनं दृश्यते। चतुर्थतः 'झभञ्' 'घढधष्' चेति सूत्रद्वयं मिलित्वा अत्र 'झभघढधष्' इति एकं सूत्रं प्रणीतम् अस्ति। अतः अस्मिन् व्याकरणे 'यञ्' इति प्रत्याहारः नास्ति। तस्मात् 'अतो दीर्घो यञि' इति पाणिनीयसूत्रस्य स्थाने पाल्यकीर्त्तिमहाभागः 'आद् मव्यतः' इति सूत्रं निर्मितवान्। पञ्चमतः शाकटायव्याकरणे 'झट्' इति प्रत्याहारस्योपयोगार्थं आचार्येण 'खफछठथचटतव्' इति पाणिनीयप्रत्याहारसूत्रस्य विभागं कृत्वा सूत्रद्वयं निर्मितम् अस्ति। एकं 'खफछठथट्' परं हि 'चटतव्'। षष्ठतः अत्र शषसर् इति पाणिनीयप्रत्याहरसूत्रे

---

[९]जै. १.१.४८

[१०]जै. १.१.१७

[११]जै. १.१.५९

अनुस्वार-विसर्ग-जिह्वामूलीय-उपध्मानीयानामपि अन्तर्भावो दृश्यते। परन्तु त्रिमुनिव्याकरणे वार्त्तिकैः एते वर्णा संगृहीताः।

## सरस्वतीकण्ठाभरणम्

भोजराजेन एकादशे क्रैस्तशतके सरस्वतीकण्ठाभरणम् नाम व्याकरणग्रन्थः प्रणीतः। भोजः मालवस्य नृपः आसीत्। सरस्वतीकण्ठाभरणम् इत्येकेनैव नाम्ना भोजेन व्याकरणशास्त्रस्य अलङ्कारशास्त्रस्य च ग्रन्थद्वयं विरचितम्। अष्टाध्यायीवत् सरस्वतीकण्ठाभरणेऽपि अष्टौ अध्यायाः, द्वात्रिंशच्च पादा दृश्यन्ते। व्याकरणेऽस्मिन् भोजेन त्रयोदश प्रत्याहारसूत्राणि उल्लिखितानि। तानि च–

अइउण्॥१॥ ऋॡक्॥२॥ एओङ्॥३॥ ऐऔच्॥४॥ हयवरलण्॥५॥ ञमङणनम्॥६॥ झभञ्॥७॥ घढधष्॥८॥ जबगडदश्॥९॥ खफछठथचटतव्॥१०॥ कपय्॥११॥ शषसर्॥१२॥ हल्॥१३॥

अतः पाणिनीयप्रत्याहारसूत्रेभ्यः एकस्मिन् स्थाने एव अत्र वैषम्यं परिलक्ष्यते। 'हयवरट्' 'लण्' चेति पाणिनीयप्रत्याहारसूत्रद्वयस्य स्थाने 'हयवरलण्' इति एकमेव सूत्रम् अत्र दृश्यते। अतः 'अट्'-प्रत्याहारः अस्मिन् व्याकरणे नोपयुक्तोऽस्ति। व्याकरणमिदं प्रायशः पाणिनीयतन्त्रं चान्द्रतन्त्रञ्चाश्रित्य विरचितम् अस्ति।

## सुपद्मव्याकरणम्

विद्वत्कुलावतंसमहामहोपाध्यायपद्मनाभदत्तप्रणीतं सुपद्मव्याकरणम् अपाणिनीयतन्त्रे सुपरिचितम्। अष्टाध्यायीमाश्रित्य विरचितमिदं व्याकरणशास्त्रम्। तथाहि व्याकरणेऽस्मिन् अध्यायक्रमेण विभागो दृश्यते। वङ्गदेशे व्याकरणस्यास्याधिकं प्रचलनमासीत्। व्याकरणेऽस्मिन् पद्मनाभदत्तेन पाणिनीप्रत्याहारसूत्राणि साक्षात् नोल्लिखितानि। परन्तु तेन प्रायशः पाणिनीयप्रत्याहारा एव सुपद्मे पृथक्तया संज्ञासूत्रैः स्वीकृताः। यथा– 'अचोऽन्ये हल्' (१.१.२), 'खयादिद्वयं वर्गस्य' (१.१.३), 'तृतीयो जश्' (१.१.४), 'तुर्य्यो झष्' (१.१.५), 'झय् वर्गोऽङम्' (१.१.७), 'यवरलो यण्' (१.१.८), 'शषसाः शर्' (१.१.९) चेत्यादीनि।

अतः पाणिनीयप्रत्याहारसूत्राणि विहाय पद्मनाभदत्तेन स्वकीयरीत्या संज्ञयैव पाणिनीयप्रत्याहारा आश्रिताः स्वस्य व्याकरणे। अत्रैव अस्य व्याकरणस्य महत्त्वम् अस्ति। अतः परम्परया तेन पाणिनीयप्रत्याहारसूत्राण्येव स्वीकृतानीति वक्तुं पारयामः।

## मुग्धबोधव्याकरणम्

अपाणिनीयव्याकरणग्रन्थेषु मुग्धबोधव्याकरणं श्रेष्ठतमम्। वङ्गदेशे एकदा मुग्धबोधव्याकरणस्य प्रचलनम् समासीत्। अधुनापि वङ्गे व्याकरणस्यास्य प्रभावो दरीदृश्यते। बोपदेवेन व्याकरणमिदं विरचितम्। क्रैस्तीयत्रयोदशशतके व्याकरणस्यास्य रचना अभवदिति अनुमीयते। अत्र दश अध्यायाः चत्वारश्च पादाः सन्ति। पाणिनिव्याकरणस्य चतुर्दश शिवसूत्राणि मुग्धबोधे दश जातानि। तानि यथा– अइउऋऌक॥१॥ एओङ॥२॥ ऐऔच॥३॥ हयवरल॥४॥ ञणनङम॥५॥ झढधघभ॥६॥ जडदगव॥७॥ खफछठथ॥८॥ चटतकप॥९॥ शषस॥१०॥

बोपदेवेन मुग्धबोधे साकल्येन चत्वारिंशत् प्रत्याहारसंज्ञाः स्वीकृताः। ताः यथा– अक् अच् अव् अम् अब् इति पञ्च। इक् इङ् इच् इल् इति चतस्रः। ऋक् इत्येका। एङ् एच् एह् इति तिस्रः। ऐच् इत्येका। हल् हव् हस् इति तिस्रः। यल् यम् यप् इति तिस्रः। वस् इत्येका। ञम् ञप् ञस् इति तिस्रः। णङ् णम् णप् इति तिस्रः। झभ् झब् झप् झस् इति चतस्रः। ढभ् इत्येका। जब् इत्येका। खथ् खप् खस् इति तिस्रः। छत् इत्येका। चक् चप् इति द्वे। शस् इत्येका। एतेषां चत्वारिंशत् संज्ञानां मुग्धबोधे यथास्थानं प्रयोजनं दृश्यते। तत्र पुनः अक् अच् इक् इङ् इच् ऋक् एङ् एच् ऐच् चेतेषां प्रत्याहाराणां अन्त्याः कङचवर्णाः न गृह्यन्ते। कङचवर्णानां 'इत् कृते'[१२] इति सूत्रेण इत्संज्ञत्वेन लोपो जायते। परन्तु तत्र अवशिष्टेषु प्रत्याहारेषु अन्त्यवर्णानां ग्रहणं दृश्यते। यथा यल् इति प्रत्याहारे अन्त्यलकारस्य ग्रहणं भवति।

## श्रीहरिनामामृतव्याकरणम्

वैष्णवव्याकरणपरम्परायां हरिनामामृतव्याकरणं विशिष्टं स्थानमावहति। सम्भवतः श्रीरूपगोस्वामी लघुहरिनामामृतव्याकरणं विरचितवान्। ग्रन्थेऽस्मिन् अष्टौ प्रकरणानि दृश्यन्ते। व्याकरणमिदं दृष्ट्वा श्रीजीवगोस्वामी बृहदाकारेण ३१९२ सूत्रसमन्वितं श्रीहरिनामामृतव्याकरणं विरचयमास। व्याकरणज्ञानेन साकं श्रीहरिनामसंकीर्तनरूपपुण्यार्जनं हरिनामामृतव्याकरणस्य प्रधानप्रयोजनम्। श्रीजीवगोस्वामिना श्रीहरिनामामृतव्याकरणस्य प्रारम्भे एको नवीनः वर्णक्रमः

---

[१२]मु. बो. ४

उल्लिखितोऽस्ति। तस्य मते अयं वर्णक्रमः नारायणादुद्भूतोऽभवत्[१३]। स वर्णक्रमः अत्र वितन्यते– अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः॥ क ख ग घ ङ॥ च छ ज झ ञ॥ ट ठ ड ढ ण॥ त थ द ध न॥ प फ ब भ म॥ य र ल व श ष स ह क्ष॥

परन्तु श्रीजीवगोस्वामिना व्याकरणेऽस्मिन् हरिनामपरकसंज्ञाभिः सह तदर्थीयाः पाणिनीयसंज्ञा एव स्मृताः।अधस्तावद् हरिनामपरकसंज्ञाभिः सह तदर्थीयाः पाणिनीयप्रत्याहारसंज्ञाः संकलिताः सन्ति–

| हरिनामामृतसंज्ञाः | पाणिनीयसंज्ञाः | हरिनामामृतसंज्ञाः | पाणिनीयसंज्ञाः |
|---|---|---|---|
| सर्वेश्वरः | अच् | हरिमित्रम् | यण् |
| दशावतारः | अक् | हरिगोत्रम् | शल् |
| ईश्वरः | इच् | शौरिः | शर् |
| ईशः | इक् | वैष्णवः | झल् |
| अनन्तः | अण् | गोपालः | हश् |
| चतुःसनः | इण् | यादवः | खर् |
| चतुर्भुजः | उक् | हरिकमलम् | चय् |
| चतुर्व्यूहः | एच् | हरिखड्गः | नास्ति |
| विष्णुजनः | हल् | हरिगदा | जस् |
| बलः | रल् | हरिघोषः | झष् |
| विष्णुगणः | मय् | विष्णुदासः | झय् |
| हरिवेणुः | ञम् | सात्वतः | खय् |

-★-

[१३]संज्ञासन्धिप्रकरणस्यादिमं सूत्रम्

# वैयाकरणालङ्कारिकाभिमतं ध्वनितत्त्वम्

कृष्णगोपालपात्रः*

## उपोद्घातः

शब्दातिरिक्तमिदं जगत् अन्धकारमयं स्यात् इत्युक्तं दण्डिना–

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥ [काव्यादर्शः १/४]

कश्चायं शब्दः इति विषये विद्यते विदुषां विप्रतिपत्तिः। शाब्दिकनये 'प्रतीतपदार्थकः लोके ध्वनिः शब्दः इत्युच्यते' इति ध्वनिः शब्दः इति पक्षे समाधानम्। स्फोटात्मक इति पक्षे तु 'येनोच्चारितेन सास्नालाङ्गूलककुदखुर-विषाणिनां सम्प्रत्ययो भवति स शब्दः' इति, अथवा 'श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेनाभिज्वलितः आकाशदेशः शब्दः' इति। स्फोटरूपः ध्वनिरूपश्च द्विविधः शब्दः इति शाब्दिकमतम्। ध्वन्यात्मकः वर्णात्मकः द्विविधः इति तार्किकमतम्। ध्वन्यात्मकस्य शब्दस्य व्यवहारः एव लोकचालकः। शब्दस्य अभिव्यक्तिः ध्वनेः भवति। प्राकृतवैकृतभेदात् ध्वनिः द्विविधः। आलङ्कारिकमतानुसारं ध्वनिर्नाम काव्यविशेषो व्यङ्ग्यः वा। ध्वनिविषये शाब्दिकसिद्धान्तः आलङ्कारिकसिद्धान्तैः सह क्वचिदेकरूपः क्वचिच्च विरूद्धः भवति। प्रबन्धेऽस्मिन् तेषां सिद्धान्तानां यत्र साम्यं वैषम्यं च विद्यते तत्सर्वं विमृश्यते।

## शाब्दिकमतम्

ध्वनेः शब्दस्याभिव्यक्तिर्भवतीत्युच्यते। तत्र ध्वनिः द्विविधः प्राकृतध्वनिः वैकृतध्वनिश्च। प्रकृत्यार्थबोधनेच्छया स्वभावेन वा जातः स्फोटव्यञ्जकः प्राकृतो ध्वनिरित्युच्यते। अर्थात् येन ध्वनिना प्राथम्येन स्फोटोपलब्धिर्भवति स प्राकृतो ध्वनिः। तथा चोक्तम्– "स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरुच्यते।"[१] इति।

प्राकृताज्जातो विकृतिविशिष्टश्चिरस्थायी वैकृतो ध्वनिः। येन चोपलब्धोऽपि स प्रचिततरकालं यावदुपलभ्यते स वैकृतो ध्वनिः। तत्रैवोक्तं–

---

*शोधच्छात्रः, व्याकरणविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य

[१]अयं कारिकाभागः बहुत्र मुद्रितग्रन्थेषु वाक्यपदीयकारिकात्वेन सङ्गृहीतः परन्तु वस्तुतः अयं व्याडिविरचिता कारिका इति विपश्चितां मतम्।

शब्दस्योर्ध्वमभिव्यक्तेः वृत्तिभेदे तु वैकृताः।
ध्वनयः समुपोहन्ते स्फोटात्मा तैः न भिद्यते॥ [वाक्यपदीयम् १/७७]

वस्तुतः "स्फोटः शब्दः, ध्वनिः शब्दगुणः" इति स्वयं भाष्यकार आह तपरस्तत्कालस्य इति सूत्रभाष्ये।

## आलङ्कारिकमतम्

ध्वनिशब्दस्यार्थनिर्धारणं ध्वनिकृता आनन्दवर्धनेनैव ध्वन्यालोके कृतम्–

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥[२] इति।

वृत्तिभागे स एव तदर्थं प्रतिपादयति– "यत्रार्थौ वाच्यविशेषो वाचकविशेषः वा शब्दो तमर्थं व्यङ्क्तः स काव्यविशेषो ध्वनि"[३]रिति।

किञ्च ध्वन्यर्थप्रतिपादककारिकायां तमर्थमिति पदस्य स्पष्टीकरणं पूर्वं तेनैव व्यधायि। तद्यथा–

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकविनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥[४] इति।

तमर्थमित्यस्य आशयस्तु स प्रतीयमानः स्वादुः सरस अर्थः यो हि प्रतिभाजन्यः किञ्च महाकवीनां वाणीषु वाच्याश्रितः अलङ्कारादिभिन्नः यथा हि अङ्गनासु अवयवसन्निधानातिरिक्तं किञ्चित् लावण्यं दृश्यते तद्वत्। वाच्यातिरिक्तं भिन्नं वस्तु यच्च प्रतीयमानम्। उक्तं च ध्वन्यालोके–

सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्॥[५] इति।

ध्वनिर्नामोत्तमं काव्यमिति आलङ्कारिकसम्प्रदाये प्रसिद्धिः। परन्तु ध्वनिशब्देन केवलं काव्यमात्रस्यैव न ग्रहणमिति आलङ्कारिकाः। शब्दः अर्थः तयोः व्यापारश्चापि ध्वनिपदवाच्याः। ध्वनिशब्दस्य व्युत्पत्तिलभ्यः यः अर्थः तत एव पञ्च अर्थाः जायन्ते। तथा हि पञ्च व्युत्पत्तयः– ध्वनतीति ध्वनिः, ध्वनतीति ध्वनिः, ध्वन्यते इति ध्वनिः, ध्वन्यते अनेन इति ध्वनिः, ध्वन्यते अस्मिन्निति ध्वनिः। ध्वनतीति

[२] ध्वन्यालोकः १/१३।

[३] ध्वन्यालोके प्रथमोद्योतः।

[४] तत्रैव १/४।

[५] तत्रैव १/६।

यः ध्वनिः स व्यञ्जकः शब्दः। ध्वनतीति ध्वनिः व्यञ्जकः अर्थः। ध्वन्यते इति ध्वनिः व्यङ्गः अर्थः। अस्य च त्रयो भेदा रसध्वनिः अलङ्कारध्वनिः वस्तुध्वनिः। एषु भेदेषु रसध्वनिः मुख्यः। ध्वन्यते अनेन इति ध्वनिः शब्दस्य व्यञ्जनाव्यापारः इत्यर्थः। ध्वन्यते अस्मिन्निति ध्वनिः उत्तमं काव्यम् इत्येवं पञ्चसु अर्थेषु ध्वनिशब्दस्य व्यवहारः दृश्यते। ध्वनेः पञ्चविधार्थं सङ्गृह्य वृत्तिकारः ध्वन्योलोके प्राह "वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यः" इति। सामान्यतया ध्वनिशब्दार्थस्तु व्यङ्ग्यः परन्तु स वाच्यातिशायी स्यात्। अर्थात् वाच्यार्थापेक्षया व्यङ्ग्यार्थः अधिकचमत्कारशाली स्यात् चेदेव तस्य ध्वनिपदवाच्यता। ध्वनिसत्त्वे अपि तत्प्राधान्याभावे तु ध्वनिरिति व्यपदेशः न सम्भवति। उक्तं च ध्वन्यालोके– "न ध्वनिर्यत्र वा तस्य प्राधान्यं न प्रतीयते" इति।

वाच्यव्यङ्ग्ययोश्च प्राधान्यविवक्षा च चारुत्वोत्कर्षनिबन्धना। यथा–

अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः।
अहो दैवगती कीदृक् तथापि न समागमः॥[६] इति।

इत्यादौ श्लोके यद्यपि नायकनायिकयोः न समागमः इत्याकारकः व्यङ्ग्यार्थः निष्पद्यते तथापि तदपेक्षया सन्ध्यादिवसरूपः वाच्यार्थः एव चमत्कारः भवति। अतः नेदं ध्वनिकाव्यम्। कारणं हि अत्र सत्यामपि व्यङ्ग्यप्रतीतौ वाच्यस्यैव चारुत्वम् उत्कर्षवदिति तस्यैव प्राधान्यविवक्षा। अतः वाच्यातिशायीत्यस्यार्थः वाच्यार्थापेक्षया अधिकः रमणीयः।

## ध्वनेर्मूलं स्फोटवादः

स्फुटति अस्मादर्थः इति स्फोटः अर्थात् यस्मादर्थो स्फुटितो भवति स शब्दः स्फोटः। ध्वनिस्फोटौ शब्दस्यैव भेदद्वयम् इति वैयाकरणनिकाये प्रसिद्धिः। यथाह आचार्यो भर्तृहरिः वाक्यपदीये ब्रह्मकाण्डे–

द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।
एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते॥ [वाक्यपदीयम् १/४४]

श्रोतृबुद्धौ स्थितः क्रमरहितः शब्दः, स्फोटः अथवा ध्वनिः शब्दस्य श्रवणेन अभिव्यक्तो भवति ततः अर्थबोधं जनयति। एवञ्च स्फोटः व्यङ्ग्यः, ध्वनिः व्यञ्जकः।

वाक्ये पदानि प्रविभज्य पदे च प्रकृतिप्रत्ययविभागं कल्पयित्वा तत्तदर्थवाचकत्वं

---

[६]चारुत्वोत्कर्षनिबन्धना एव वाच्यव्यङ्ग्ययोः प्राधान्यविवक्षा इति प्रसङ्गे ध्वन्यालोके प्रथमे उद्योते प्रदर्शितः अयं श्लोकः।

व्याकरणशास्त्रे प्रतिपादितम्। तत्र वर्णपदवाक्यभेदेन स्फोटस्त्रिधा। तत्रापि जातिव्यक्तिभेदेन पुनः षोढा। अखण्डपदस्फोटः अखण्डवाक्यस्फोटश्चेति आहत्य अष्टौ स्फोटाः। तेषु च वाक्यस्फोटो मुख्यः तस्यैव लोके अर्थव्यवहारात् तेनैवार्तसमाप्तेश्च। न्यायभाष्यकारः भगवान् वात्स्यायनः आह न्यायभाष्ये– 'पदसमूहो वाक्यम् अर्थसमाप्तौ' इति। किञ्च वाक्यस्फोटस्यैव मुख्यतेति प्रादर्शि कौण्डभट्टेन तदीये वैयाकरणभूषणसारे स्फोटनिर्णयप्रकरणे– 'वाक्यस्फोटः अतिनिष्कर्षे तिष्ठतीति मतस्थितिः' इति। तत्र स्फोटेषु वाक्यस्फोटातिरिक्तानाम् अवास्तवत्वम् एव। शाब्दिकनये वाक्यस्फोटस्य मुख्यत्वम् इति सर्वजनविदितम्। यतो हि शक्तिग्राहकशिरोमणिना वृद्धव्यवहारेण लोकानां प्रथमतो वाक्ये एव शक्तिग्रहः। वस्तुत अखण्डवाक्यस्फोट एव अन्ततो गत्वा स्वीकार्यः। किञ्च अखण्डस्फोटस्वीकारे वाक्यपदीयकारिका प्रमाणीभूता–

पदे वर्णा न विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन॥ [वाक्यपदीयम् १/७३]

वस्तुतः स्फोट एकः अखण्डश्च। अष्टौ स्फोटा इति भेदस्तु औपाधिकः।

आलङ्कारिकाभिमतस्य ध्वनितत्त्वस्य मूलं वस्तुतः वैयाकरणसम्प्रदाये सुप्रसिद्धः स्फोटवादः। सर्वशास्त्रमूलत्वात् प्रथमे विद्वांसो वैयाकरणाः इति आलङ्कारिकैरपि स्वीक्रियते।

उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम्॥

इति स्मृत्या सर्वविद्यासु व्याकरणस्य महत्त्वं स्पष्टम्।

स्फोटो नित्यः, नात्र पैर्वापर्यभाव अवगम्यते। नास्त्यत्र किञ्चित्क्रमनिर्धारणम्। ध्वनौ एव पौर्वापर्यभावो भवति। ततः ध्वनेः पौर्वपर्यात् स्फोटे क्रमप्रतीतिः जायते- यथोक्तं वाक्यपदीये–

नादस्य क्रमजन्मत्वान्न पूर्वो नापरश्च स।
अक्रमः क्रमरूपेण भेदवानिव गृह्यते॥ [वाक्यपदीयम् १/४८]

## मतैक्यं वैमत्यञ्च

केचन विद्वांसः ध्वनिवर्णयोः अभेदं प्रतिपादयन्ति। यथोक्तं च काव्यप्रकाशे 'बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः'।

प्रतिक्षणपरिणामिनो हि शब्दाः प्रथमक्षणे उत्पद्यन्ते द्वितीये तिष्ठन्ति तृतीये च नश्यन्ति।[७] अर्थात् प्रथमक्षणे उत्पन्नो शब्दो स्वमप्रधानीकृत्य द्वितीयं शब्दमुत्पादयति। तत्र प्रथमस्य शब्दस्य नाशः एव भवति। ध्वनिरपि स्वमप्रधानीकरोति।[८]

वैयाकरणाः श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। श्रोत्रशष्कुलीपर्यन्तं सन्तानेनागताः अन्त्याः शब्दाः श्रूयन्ते इति प्रक्रियायां शब्दजाः शब्दा इत्युच्यन्ते। ते च शब्दाः ध्वनिशब्देनोक्ताः। यथोक्तं वाक्यपदीये–

यः संयोगविभागाभ्यां करणैरुपजन्यते।
स स्फोटः शब्दजाः शब्दाः ध्वनयोऽन्यैरुदाहृताः॥ [वाक्यपदीयम् १/१०२]

इति व्यञ्जकः शब्दः ध्वनिरिति व्यवह्रियते। एवञ्च घण्टादिनिर्ह्रादस्थानीयः अनुरणनात्मोपलक्षितो व्यङ्ग्योऽप्यर्थो ध्वनिरिति व्यवहृतः। तथा श्रूयमाणा ये वर्णा नादशब्दवाच्या अन्त्यबुद्धिनिर्ग्राह्यस्फोटाभिव्यञ्जकास्ते ध्वनिशब्देनोक्ताः। यदाह भगवान् भर्तृहरिः वाक्यपदीये ब्रह्मकाण्डे–

प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुण्यैस्तथा।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते॥ [वाक्यपदीयम् १/८३]

इति व्यञ्जकः अर्थः ध्वनिरिति पक्षः। एवं व्यञ्चकौ शब्दार्थौ ध्वनिशब्दनोक्तौ वैयाकरणनये। तत्समानतया आलङ्कारिकैरपि शब्दार्थौ व्यञ्जकौ इत्युच्येते।

वैयाकरणमतानुसारं येषां वर्णानामुच्चारणमस्माभिः क्रियते तेषाम् अभिव्यक्तौ द्रुतबिलम्बितादिभेदो भवति। एवं शब्दस्योच्चारणभेदे अपि अर्थस्य भेदो न भवति। प्राकृतवैकृतभेदात् शब्दस्य रूपद्वयम्। द्रुतविलम्बितादिवृत्तिभेदस्तु वैकृतध्वनौ भवति। इत्थं श्रूयमाणवर्णस्योच्चारणेन प्रसिद्धव्यापारातिरिक्तस्य द्रुतविलम्बितादिवृत्तिभेदेन अधिकव्यापारस्य स्वीकारः वक्त्रा कर्तव्यः। एवञ्चायमतिरिक्तव्यापारोऽपि ध्वनिरिति वैयाकरणैः स्वीकृतः।

एतदादायैव आलङ्कारिकैरपि अभिधादिशब्दव्यपारान् परित्यज्य एतदिरिक्तः व्यञ्जनाव्यापारोऽपि स्वीकृतः।

---

[७]इदं तार्किकाणां मतम्। अत्र शब्दपदेन ध्वनिः गृह्यते। तत्र सिद्धान्ताविरोधात् वयम् अस्मिन् मते दोषं न पश्यामः।

[८]यत्रार्थः शब्दो वा तम् अर्थम् उपसर्जनीकृतस्वार्थौ व्यङ्क्तः काव्यविशेषो स ध्वनिरिति बुधैरुच्यते।

ध्वन्यालोकस्य दीधितिटीकायां प्रोक्तं "समग्रपदप्रत्यक्षम् अन्तरेण शाब्दबोधो न सम्भवति। वर्णानाम् आविर्भावतिरोभावयोः आशुभावित्वेनैकदा अनेकवर्णात्मकपदप्रत्यक्षं तु दुर्घटम्। तस्माद् मध्यमानादाभिव्यङ्ग्यं नित्यमखण्डात्मकं शब्दस्वरूपं शाब्दबोधोपयोगिनं स्फोटं तद्यञ्जकं मध्यमानादरूपञ्च ध्वनिं शाब्दिकाः पूर्वम् अवोचन्। पश्चात् तदनुयायिन आलङ्कारिकाश्चमत्कारि व्यङ्ग्यार्थव्यञ्जकं शब्दार्थोभयं ध्वनिम् आहुरिति नेयम् अपूर्वाऽसम्भविनी कल्पना। नास्तीह भूयः परीक्षाप्रयोजनम्।"[९] इति।

भाषावैज्ञानिकानां मते शब्दस्य रूपद्वयं प्रथमं बाह्यार्थः ध्वनिः, द्वितीयं च आन्तरिकार्थः स्फोटः। परं ध्वनिरेव आन्तरिकार्थः आलङ्कारिकमते इति मतभेदः अत्र वक्तुं शक्यः।

आलङ्कारिकाभिमतं ध्वनितत्त्वं वैयाकरणाभिमतस्य स्फोटतत्त्वस्य अत्यन्तं सामीप्यम् आवहतीति बहवो विद्वांसः आमनन्ति। शाब्दिकसम्प्रदाये यथा मूलभूतं तत्त्वं स्फोटतत्त्वं तथैव आलङ्कारिकसम्प्रदाये मूलतत्त्वं ध्वनितत्त्वम्। रसादिरूपः व्यङ्ग्य एव काव्ये जीवनाधायक इति कथनार्थं ध्वनिकृता 'काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा' इति रामायणादिप्राचीनविवृत्त्या स्वमतं द्रढीकृतम्।

## उपसंहृतिः

यथा विभिन्नवर्णश्रवणेन शाब्दबोधो न भवति, शाब्दबोधश्च स्फोटेन ध्वनिना वा भवति तथैव वाच्यार्थं सङ्गृह्य अपि काव्यस्य सौन्दर्यप्रतीतिः न भवति, तच्च केवलं व्यङ्ग्यार्थेन ध्वनिनैव। ध्वनिः शब्दः, ध्वनिः काव्यमिति वैयाकरणालङ्कारिकसम्प्रदायगतः राद्धान्तः[१०]। एवं यद्यपि ध्वनिपदस्य अर्थः वैयाकरणालङ्कारिकदिशा भिन्नः तथापि व्युत्पत्तिगते अर्थे साम्यं विद्यते इति मे

---

[९]ध्वन्यालोकदीधितिः, पृ.– ४७।

[१०]कोऽयं शब्द इति प्रश्ने प्रतीतपदार्थकः लोके ध्वनिः शब्दः इत्युच्यते। तस्मात् ध्वनिः शब्दः इत्याह पतञ्जलिः महाभाष्ये पस्पशाह्निके। तपरस्तत्कालस्य इत्यत्र सूत्रे 'सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचरितवचनात् वृत्तयो विशिष्यन्ते' इति कात्यायनप्रणीते वार्तिके स एव प्राह 'एवं तर्हि स्फोटः शब्दः, स्फोटस्तावानेव भवति, ध्वनिकृता वृद्धिः' इति। तथाहि एतत्सम्बन्धिनी कारिका–

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः॥ इति।

इमां भाष्योक्तिं सम्यग् विचार्य हरिणा मध्यमाननादाभिव्यङ्ग्यस्य शब्दस्य स्फोटात्मकता ब्रह्मरूपता नित्यता, ध्वन्यात्मकस्य च तस्यानित्यता प्रतिपादिता।

मतिः। इदं च ध्वनितत्त्वं तत्तत्सम्प्रदाये मूर्धाभिषिक्तम् जातम्। काव्ये सारभूतं तत्त्वं किमिति जिज्ञास्यमानाः समीक्षकाः सूक्ष्मातिसूक्ष्मं तत्त्वं परिशीलयन्ति स्थापयन्ति च। अत एव ध्वनिशब्दव्यवहारे अयमेव विशेषो यत् व्यञ्जकस्य शब्दार्थयुगलस्य कृते व्यञ्जनाव्यापारस्य कृते व्यङ्ग्यार्थस्य कृते काव्यविशेषस्य कृते च ध्वनिशब्दस्य व्यवहारः सम्भवतीति आलङ्कारिकसमयः।

-★-

# गजानन-बालकृष्ण-पळसुलेवर्यस्य 'भासोऽहासः'– समीक्षणम्

शुभ्रजित्सेनः*

## उपोद्घातः

यथा कालिदासाज्जगन्नाथं यावदलक्षि काप्यविच्छिन्ना परम्परा लौकिक-संस्कृतसाहित्यस्य तथैव सप्तविंशत्युत्तरवर्षाद्द्यतनकालं यावद्यत्साहित्यं गीर्वाणवाण्या लिखितं, तत्र नैके प्रौढा विदग्धास्तथा चोदीयमानास्तरुणास्तेजस्विनो विद्वांसः प्रकटयन्ति शास्त्रवैभवमस्यास्तथा च कवयन्ति परःशतं सुकवयो निबध्नन्ति च विविधान् ग्रन्थान्। तत्र विविधगद्य-पद्य-नाट्य-प्रबन्धादिनिबन्धनैः सरस्वत्याः साधकाः नवीनसाहित्यमार्गाणां सुविहिता एवासन् महाराष्ट्रवास्तव्या आन्तर्जातिकख्यातिभाजो गजानन-बालकृष्ण-पळसुलेवर्याः।

## गजानन-बालस्य साहित्यकृतयः

प्रतिभा हि काव्यस्य प्रधानं कारणम्। प्रतिभा तावज्जन्मान्तरसंस्कारविशेषः। तां विना काव्यं न प्रसरेत्, यदि वा स्यात्तदुपहासास्पदं भवेत्। तदुक्तं कैश्चिदालंकारिकैः–

कवित्वं जायते शक्तेर्वर्द्धतेऽभ्यासयोगतः।
तस्य चारुत्वनिष्पत्तौ व्युत्पत्तिस्तु गरियसी[१]॥

अर्थात् प्रतिभातः कवित्वोत्पत्तिः, व्युत्पत्तिरेव काव्यचारुत्वहेतुस्तथा चाभ्यासो वृद्धिनिदानम्। एतेषां कारणानां विरलसमन्वयस्याधारविशेषोऽयं पळसुलेमहाभागः।

प्रतिभा द्विधा विभक्ता– कारयित्री भावयित्री चेति। प्रतिभाद्वितयस्यैकत्र विरल आधारो हि गजाननः। तत्र तस्य कृतिर्विभज्यते द्विधा– शास्त्रीया, इतरा चेति।

तस्य शास्त्रीया ग्रन्थाः केवलं व्याकरण-वेदादिशास्त्राण्यवलम्ब्य रचिताः। ते यथा–

---

*सहायकाचार्यः, संस्कृतविभागे, गौडवङ्गविश्वविद्यालये

[१]आधुनिक संस्कृत साहित्य (१९१०-२०१०) छोटगल्प ओ नाटक, ऋताचट्टोपाध्याय (सम्पा०), पृष्ठा १९३

a) Sanskrit Dhātupāthas: A Critical Study

b) A Concordance of the Sanskrit Dhātupāthas

c) कविकल्पद्रुमः (वोपदेवीयो धातुपाठः)

d) Verbal Forms in the Ṛgveda (Mandala 6)

e) युभातः संस्कृतं प्रति (संस्कृतस्य तुलनात्मकैतिहासिकपरिचयः)

f) Sixty Upaniṣads of the Veda (डायसन-कृत-जर्मन्-ग्रन्थस्य अनुवादः)

g) संस्कृतचा इतिहास आणि पूर्वेतिहास (मराठीव्याख्यानमाला)

h) संस्कृत-भाषेच्या काही समस्यांवर आधुनिक भाषाशास्त्राने टाकलेला प्रकाश (मराठीव्याख्यानमाला)

i) वैदिक भाषेच्या जडणघडणीचे काही पैलू (मराठीव्याख्यानमाला)

J) महाभाष्यदीपिकायाः कतिपयखण्डानाञ्चिकित्सकसम्पादनम्

एतान् ग्रन्थान् व्यतिरिच्यान्ये च परःशताः संशोधनलेखाः।

इतराः नाम साहित्यकृतयः। तत्र–

## 1. अनुवादाः

### अ) त्रीणि काव्यानि (स्मारकरमूलानि)–

१. अग्निजा २. कमला ३. तुका व्यक्ति

(शारदायां पत्रिकायां प्रकाशितानि)

### आ) नाटकानि–

१. भ्रातृकलहः २. अथातो ज्ञानदेवोऽभूत्

३. धन्येयं गायनी कला ४. यदा रायदुर्गो जागर्ति

५. अत्र मृत्युर्विलज्जितः ६. अन्धं युगम्

## 2. मौलिक्यः

### अ). नाटकानि–

१. समानमस्तु वो मनः २. धन्योऽहं धन्योऽहम्

३. भासोऽहासः ४. उत्तिष्ठ, कौन्तेय!

## आ. चरितकाव्यम्–

१. विनायक-वीरगाथा २. विवेकानन्दचरितम्

## इ. महाकाव्यम्–

१. वैनायकम्

## गजाननस्य नाट्यसाहित्यम्

गजाननः स्वजीविते कारयितृप्रतिभाप्रभावादेव मौलिकं नाटकत्रितयं ससर्ज। तानि यथा– 'भासोऽहासः', 'समानमस्तु वो मनः', 'धन्योऽहं धन्योऽह'ञ्चेति। प्रतिनाटकं विषयविन्यासगतदृष्ट्या नवनवीनं, तथ्यप्रपूरितं, हृदयस्पर्शि च। नाटकत्रयमिदं साम्प्रतिककालस्य सर्वाणि नाटकान्यतिशेते वस्त्वाङ्गिकयोरपूर्वमेलबन्धनेन। किन्तु एतदपि ध्रुवं यत् प्रत्येकं नाटकेषु विषयगतं वैविध्यं विलसति। केनापि नाट्यविषयेण सममितरनाटकानां कुत्रापि सादृश्यं नासीत्। अपि च, दरीदृश्यते प्रतिनाटकं कवेरस्य जीवनबोध-मूल्यबोध-आदर्शानां प्रतिफलनम्। प्रबन्धेऽस्मिन् मया 'भासोऽहासः' इति नाट्यस्य विषयगतं नाट्यतत्त्वगतञ्च वैशिष्ट्यं समीक्षितुमीष्यते–

## भासोऽहासः

संस्कृतसाहित्याकाशे भासो हि उज्ज्वलज्योतिष्कत्वेनाभाति। खृष्टिय-विंशशताब्द्याः पूर्वं भासविषये ज्ञानमासीदस्माकं स्वल्पम्। वाणभट्ट-दण्डि-कालिदास-जयदेवानां कवीनां सप्रसङ्गमुक्तिभ्यो भासस्यासामान्यं नाट्यकृतित्वं परिज्ञायते। संस्कृतसाहित्ये स च वैप्लविकः कविः। भासस्य नाटकसम्पर्के राजशेखरेणोक्तम्–

भासनाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम्।
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः॥ इति।

भासस्य नाटकानि समालोचनात्मकाग्निना दग्धान्यपि स्वप्नवासवदत्तमिति केवलं नाटकमक्षतमासीदिति नाट्यरसिकेषु चिरपरिचितो वादः। किन्तु नाट्यकृदां मनसि सम्प्रश्नः समुदेति यत्सत्यमेव गुण-दोषपरीक्षणार्थमेव भासनाटकानाम् अग्निदिव्यं सोढव्यमासीत्, उत भवितव्यं तत्र केनापि कारणान्तरेण? परं नान्यकविप्रसङ्गेऽग्निदिव्यकथा श्रूयते। तथाहि नाटकस्य प्रस्तावनायां नाट्यकृतोदितम्–

"अथैकस्मिन् दिने सहसा भातम्। भासेन हि रामायण-महाभारताभ्यां

कथाबीजान्यादाय सन्ति अनेकानि नाटकानि रचितानि। एकतः तेन कथायां बहूनि परिवर्तनानि कृतानि सन्ति। अपरतश्च खलपात्राणामुन्नयनमपि स करोति। (सर्वसंस्कृतज्ञेषु प्रथितत्वान्नेदमत्र सोदाहरणं प्रपञ्च्यते।) अपि इदमेव जनस्य रोषकारणं स्यात्? यदा तावत् संप्रत्यपि अस्मिन् विंशतितमे शतकेऽपि, रामायणभारतीयकथानां विकृतीकरणं तत्रस्थानां खलपात्राणाञ्चोदात्तीकरणमनेकैर्नानुमन्यते, तदा द्विसहस्रवर्षपूर्वे काले आस्तिकतरया तदानीन्तनया जनतया यदि तन्न सम्मतं स्यात्, तर्हि किमत्र चित्रम्? तस्माद्यदि नाम भासनाटकानाम् अग्निदिव्यरूपेयं कथा वास्तविकी घटना स्यात्, तर्हि तत्र भासकृतेन रामायणमहाभारतयोः विपर्यासेन जनितः प्रजारोषोऽपि कारणं स्यादिति विचारः मम मनः क्रमेण गृहीकर्तुं प्रवृत्तः। नाट्यबीजं लब्धम् ”[२] इति।

सकृन्नाट्यबीजे स्फुरिते, तस्य विकासनार्थं भासनाटकचक्रं भूयो भूयः पठित्वा वृत्तप्रपञ्चः निर्धारितो नाट्यकृता। प्रसङ्गेऽस्मिन् तथ्यमिदमुपयोगं वर्तते यज्जयदेवस्तदीये प्रसन्नराघवे[३] नाटके भासं सरस्वत्या निर्मलहास्येन तुलितवान्। नाटकस्य कथावस्तुमूलतया भासकृतो रामायण-महाभारतयोरिदं पूर्व उपयोगः, भासोपज्ञं दुःखान्तनाटकप्रणयनम्, भासनाटकेषु बहुशो निर्दिष्टः कश्चित् राजसिंहः, परचक्रम्, तत्र वर्तमाना अपाणिनीयाः प्रयोगाः, तत्र क्वचिद्दृश्यमानं भरतादिभ्यो भिन्नं नाटकतन्त्रम् 'भासो हासः' इति सुभाषितप्रसिद्धा तस्य कीर्तिः। अत्रेदमुल्लेखार्हं यदकारप्रश्लेषं कृत्वायं शब्दप्रयोगो 'लुप्तहास्यो भास' इत्यर्थकः सन् नाटकस्यास्य नामत्वेन प्रयुक्तोऽस्ति। प्राकृतभाषायाः कविना वाक्पतिराजेन गौडवधकाव्ये भासः ज्वलनमित्रमिति नाम्नाभिहितम्। सुभाषितसंग्रहेषु भासीयत्वेन निर्दिष्टानि सुभाषितानि, 'ज्वलनप्रिय' इति क्वचिदुपयुक्तो भासोपाधिः, कालिदासेन भासनाम्ना सहैव निर्दिष्टौ द्वावन्यौ नाट्यकारौ, बहुकालोत्तरमनपेक्षिततयोपलब्धो भासनाटकसंग्रहः, भासीया भाषाशैली चेत्यादिसामग्रीमुपयुज्येदं नाटकं प्रणीतमासीत्।

रामायण-महाभारतयोर्विषयमुपजीव्य लिखितासु कृतिषु किं किमपि स्वातन्त्र्यं नाट्यकृद्भिरवलम्बनीयमिति प्रश्नः आधुनिकवाङ्मयेऽपि विवादस्पदं जातः। भासः

---

[२]भासोऽहासः, प्रस्तावना

[३]भासोऽहासः

खलु नव्यपरम्पराया अस्या आद्यः प्रवर्तयिता। तथाहि नाट्यवस्तुत्वेनायं विषयो नैव यातयामतां गतोऽस्ति। प्रत्युत स किमपि औचित्यं बिभर्ति।

भासः नाटकचक्रस्यास्य प्रणेता भवतु, न वा। एतद्विचारनिरपेक्षमेवैतन्नाटकं प्रणीतमस्ति। परमेतदपि सत्यं यद्भासमुपजीव्य नैके लेखाः विद्यमाना आसन्। किन्तु भासीयनाटकानामग्निदिव्यमृते सर्वेषां विचाराः प्रायेणैकरूपाः इति नाट्यकर्तुराशयः।

## प्रत्यङ्कं नाट्यविषयविश्लेषणम्

नाटकमिदमङ्कत्रितयात्मकम्। प्रथमाङ्कस्य स्थानं महाकवेर्भासस्य गृहम्। गृहस्योपस्थानशालायां नटराजस्य च शारदाया मूर्तिर्दृश्यते। गेहस्य कृत्स्नं वातावरणं भासस्य समृद्धिं वैदग्ध्यञ्च द्योतयति। प्रथमाङ्कस्य प्रथमे दृश्ये चरित्रत्वेनोपस्थाप्यन्ते तावत् पञ्चत्रिंशद्वर्षवयस्का भासभग्नी संगीता, चतुरिका, शरद्वतः, भासः स्वयं, देवरातश्चेति।

नाटकस्यावेव दृश्यते यत् राजसभायां महाराजः आर्यपुत्राय गौरवोपाधिप्रदानेन सम्मानयिष्यति। यदा प्रभृति पूर्वस्मिन् दिवसे नाटकप्रयोगावसरे राज्ञोद्घोषितं– 'तत आरभ्य कृतार्थमिवात्मानं पश्यामि। ननु पत्युः सार्वजनीनात् गुणग्रहणोत्सवादृते किमन्यत् स्त्रीणां प्रीतिस्थानम्?'[४] संगीता-चतुरिकयोर्मध्ये भासविषये कथोपकथनं प्रचलति। अत्रान्तरे कश्चन पञ्चदश-षोडशवर्षवया बालकः पित्रा परित्यक्तः सन् नाट्यविरचनकौशलस्य शैलीं परिज्ञातुं भाससमीपं समागतः। नचिकेतावत् तस्यापि नाट्यशैल्याः परिज्ञानार्थं सुदृढं प्रयत्नं दृष्ट्वा भासस्तं प्रथमशिष्यत्वेनाचिनोति स्म। उभयोः कथोपकथनादेव नाट्यकृतो जीवनदर्शनं प्रतिविम्बितम्–

"नाट्यं मनुष्यस्य निखिलं जीवनं व्याप्य स्थितमस्ति। केवलम् अमोघदर्शिनी दृष्टिः अपेक्ष्यते, या तत् लक्ष्यीकुर्यात्। तन्न केवलं राजप्रासादे वर्तते, किन्तु पांशुलपादस्य हालिकस्य हालिकस्य कुट्यामपि। न केवलं महापुरुषाणां जीवने, किन्तु युस्मदस्मदादीनां जीवनेऽपि। यदि तव हृदयं संवेदनाक्षमं स्यात्, करुणामसृणं स्यात्, तर्हि शक्ष्यसि त्वं जगति ओतं प्रोतं च इदं नाट्यं संवेत्तुम्।

यदि एतादृशं किमपि नाट्यबीजं कस्यापि लब्धनाट्यप्रतिभस्य पुरुषस्य

---

[४]भासोऽहासः, पृष्ठा– २

मनसि स्फुरेत्, तर्हि तत् स्वयमेवाङ्कुरितम्, आकारितं च भवेत्। नाटकं न लेखकः लिखति। स्वयं नाटकमेव लेखकेन आत्मानं लेखयतीव। नेयं नाट्यलेखनविद्या अध्यापनेन लब्धव्या। नाट्यात्मनि पुरुषे इयं स्वभावादेव विकसति"[५] इति। भासः 'सर्वं दुःखं दुःखं सर्वं क्षणिकं क्षणिकम्' इति सौगतमतमङ्गीकृत्य ब्रुते– 'जन्म-मृत्यु-जरा-व्याधि-दुःखदोषानुदर्शिनाम्, अत एव सर्वमेव दुःखं विवेकिनामि'ति मन्वानानामस्माकमास्तिकानामपि अयमेव सिद्धान्तः'[६]। भासनये रामायण-महाभारतयोर्मध्ये वर्तते कापि अक्षय्या खनिर्नाट्यवस्तूनाम्। कविरयं रामायणमहाभारते नाट्यमञ्चे अवतारयितुं वाञ्छति। तस्य नाट्यपात्राणि भविष्यन्ति स्वाभाविकतराणि सचेतनतराणि सूक्ष्मतराणि मानवतराणि च। आर्षमहाकाव्यद्वितयस्य नाट्यीकरणमिदानीं महाकवेर्जीवनकार्यम्। तन्नये लेखकेन न केवलं जनरुचिः सम्माननीया, सा स्वकमतानुसारं निर्मातव्या संस्कर्तव्या च।

अत्रान्तरे आस्थानपण्डितस्य देवरातस्यागमनं दृश्यते नाट्यमञ्चे। स तु राज्ञः सन्देशमादाय भाससकाशमागतः। राजा राजसिंहो भासाय उपाधिना समं किमपि पारितोषिकं प्रदातुमिष्टवान्। किन्तु भासः कथयति प्रत्युत्तरेण–

"कस्य वान्यस्य प्रसादं भुञ्ज्महे? लब्धमेव सर्वं यल्लब्धव्यम्। किमन्यत्काङ्क्षणीयम्? देवस्य सौहार्दमित्थमेव मयि अखण्डितं वर्ततामित्येव याचे"[७] इति। भासो न हि चाटुकारस्वभावजः। तथाहि स राजानुरोधं हेलया परित्यक्तुमलम्। शतशः भीतिप्रदर्शनेनापि स स्वसिद्धान्तं त्यक्तुं नेच्छति स्म। एतेन तच्चरित्रस्य नैर्मल्यं स्फुटं काशते। भासपत्नी संगीतापि भासस्य राद्धान्तमनुमन्यते। भासो मन्यते– 'यत्किञ्चित् तेन साहित्ये कर्तुं पारितम्, तत्र उपाध्यायो ज्ञाननिधिरेव कारणम्। तेनैव शास्त्रकलानां मुक्तहस्ताभ्यां वितरणेन अहम् एवं संस्कारितः'[८]।

द्वितीये दृश्ये राजप्रासादे अनुष्ठितसभायामुविष्टा आसन् अमात्यः, उपाध्यायो ज्ञाननिधिः, आस्थानपण्डितो देवरातः, नाटककारौ वसुमित्र-सौमिल्लकौ, चान्ये। अत्रेदमवधेयं यत् नाट्योत्सवस्य द्वितीये वर्षे भासीयम् 'अविमारकमि'ति नाटकं सर्वोत्कृष्टत्वेन निर्णीतम्। तथाहि राजा पूर्वस्मिन् वत्सरे श्रेष्ठनाट्यार्थं भासाय

---

[५]तत्रैव, पृष्ठा– ४

[६]तत्रैव, पृष्ठा–९-१०

[७]तत्रैव, पृष्ठा– १४

[८]तत्रैव, पृष्ठा– १६

'उदयन-कथाकोविद' इति गौरवोपाधिं प्रदत्तवान्। अमुष्य 'कविताकामिनीहासः इति गौरवोपाधिः राज्ञा तस्मै वितीर्णः। अपि च, राजा कविराजस्य भासस्य कृते मासिकी संभावना द्विगुणीकृता, संचारार्थं च शिबिका प्रसादीकृतास्तीति समुद्घोषितवान्। किन्तु भासः 'सम्मानाद् ब्राह्मणो नियम् उद्विजेत् विषादिव' इति मनुवचनं संस्मरन् तस्य गुणोत्सकारणं ज्ञाननिधिरेव इत्युक्त्वा पारितोषादिकं हेलया नाग्रहीत् सत्कारोऽपि नाम सत्कारेण प्रतीष्टः प्रीतिमुत्पादयतीति धिया। भासः सर्वसमक्षं भणति यत् स कवियशःप्रार्थितया गौरवोपाधिविजिगीषया काव्यानि नाटकानि न लिखति, परं दुर्निवारयान्तःप्रेणया प्रचोदितः सन् लिखति।

द्वितीयाङ्कस्य चत्वारि दृश्यानि सन्ति। प्रथमे दृश्ये शून्यमनाः वसुमित्रः देवरातमदृष्ट्वैवाग्रतो गच्छति। उभौ भासस्य नाट्यशैल्या असारत्वं प्रतिपादयितुं पर्यलोचयतः। विशेषेण वसुमित्रः एतत् प्रतिपादयितुं यतते यन्नाट्यशास्त्रस्य सर्वान् विधिनिषेधान् तृणीकृत्य भासः नाटकानि विरचयति। स हि नाट्यशास्त्रपाणिनिव्याकरणेष्वनभिज्ञः। स च भासः गणं न गणयति, न पदमवेक्षते, न सन्धीन् अनुसंधत्ते, लिङ्गं नाद्रियते, विभक्तीर्न विभजति च। देवरातः कथयति– यदि भासः प्रतिस्पर्धी न स्यात्तर्हि वसुमित्रोऽस्मिन् वर्षे पारितोषिकं प्राप्तुमर्हेत्। तदा देवरातस्योपदेशोऽयं यद् भासेन सहालापं कृत्वा तन्नाट्यं पठित्वा च तत्र किमपि नवीनं वस्तु स्याच्चेत् तदनुश्रित्य नाटकं लेखनीयम्।

द्वितीये दृश्ये भासगृहे दृश्यन्ते भासपटले उपदशानि हस्तलिखितानि पुस्तकानि सुष्ठुतया स्थापितानि। अस्ति किं गृहे भास इति प्रश्नयन् सौमिल्लको नाट्यमञ्चे प्रविशति। तदा भासो नित्यं सन्ध्याह्निकं कुर्वन्नासीत्। शौमिल्लक-शारद्वतयोर्मध्ये भासकृतीनां मौलिकत्वं चारित्रिकविशेषत्वञ्च पर्यालोचितमवर्तत। तथाहि शारद्वतेनोक्तम्–

"ते ते पौराणिकपुरुषा अत्र तथा खलु आचार्येण उपस्थापिताः सन्ति, यथा नाटकपठनावसरे साक्षात्पुरतः उपतिष्ठन्तीव। स करुणैकरसः, मूर्तिरिव कर्तव्यपूर्तेः, घनश्यामो रामः, स नीतिनिपुणः, पूर्णावतार इव नारायणस्य, पुरुषोत्तमः श्रीकृष्णः, स 'येनैव मानेन समं प्रसूतम्, तेनैव मानेन दिवं' प्रयातः दुर्योधनः, स अर्जुनार्थे अङ्गीकृतयाचनालाघवः शिष्यवत्सलो द्रोणाचार्यः, तौ बालवीरौ अभिमन्यु-घटोकचौ, निजदेहनिरपेक्षः, प्राणव्ययेनापि पूरितयाचकमनोरथः वदान्यः कर्णः, सः अत्यन्तत्यक्तस्वार्थः भ्रातृदेवो भरतः, स पातिव्रतादर्शः राममयजीविता

सीता– सर्वे एते देहबद्धा इव, जीवन्त इव, अस्मत्पुरत उपतिष्ठन्ति। यदा तावत् पठनमात्रस्यायं प्रभावः तदा नाटकदर्शनेन किं भवेत्"?[९] इति। उक्तिभ्य एतेभ्यो मन्ये भासीयचरित्राणां वैशिष्ट्यं स्पष्टत्वेन प्रतिविम्बितानि। उदाहरणपुरःसरं शारद्वतेन भासीयनाटकेषु कांश्चित् प्रसङ्गान् तथा नामानि उद्धृत्य भासस्य श्रेष्ठत्वं प्रमाणयितुमिष्टम्। दिङ्मात्रमुदाहरणं तावत् पञ्चरात्रनाटके गोग्रहणप्रसङ्गः स्वयं कविकल्पितः। उभयोः कथोपकथनादेव प्रमीयते यद्भासः कुत्रचित् स्थानेषु रामयण-महाभारतयोः वृत्तान्याश्रित्य कुत्रचिद्वा स्वकपोलकल्पनयात्मनो मनसो माधुरीं मेलयित्वा नाट्यचरित्राणि ससर्ज। भासः रावणस्य पतिव्रतातेजोमाननं द्विः आवर्तते, प्रतिमायामभिषेके च।

रामकथामुपजीव्य नाट्यकृता भासेन नाटकद्वितयं विरचितं वेति पृच्छता भासेनोक्तम्—

"समानान्ते, न तु समानादी। किञ्च तयोः अवधारणं भिद्यते। विवक्षा भिद्यते। इतिवृत्तनिवेदकस्य तावत् कथानिवेदने तात्पर्यम्। न तत्र हानोपादानयोः कश्चिदवसरः। तामेव कथां नाट्यीकुर्वतः कवेस्तु विवक्षानुसारेण किञ्चित् हेयं भवति, किञ्चिदुपादेयम्। स तावच्चित्रकारसदृशः। यथा कश्चिच्चित्रकारः किञ्चिद्दृश्यं सामग्र्येण पश्यन्नपि चित्रे तावत् कञ्चिदेवांशं पुरोभागे प्राधान्येन निवेशयति, कञ्चित्पृष्ठभूमौ निक्षिपति, कञ्चिच्च वर्जयत्यपि। स एव प्रकारः नाट्यीकृतायाः कथाया अपि भवति। यथा च चित्रकारस्य दिदर्शयिषानुसारेणैकमेव दृश्यं तैस्तैरंशतो भिन्नैश्चित्रैर्दर्शयितुं शक्यते, एवमेकैव कथा विवक्षानुसारेणानेकैर्नाटकैः। अथ वा, इतः तावत्"[१०] इति।

कियत्स्वातन्त्र्यं नाट्यकृतावलम्बितव्यमिति विषये शारद्वतस्य मनसि संशयो जायते। तन्मते कल्पितानां कथानां परिवर्तने भवन्तु नाम नाट्यकाराः साधिकाराः, ऐतिहासिककथाविषये तु तेषां अव्यभिचारिणी निष्ठा भवितुमर्हति। भासो मतमिदं नानुमन्यते। वसुमित्रोऽपि शारद्वतस्य मतमङ्गीकरोतीति श्रुत्वा सौमिल्लक-सङ्गीतौ हतचकितौ भवतः। किन्तु नाट्यकारो भासः सत्यमेवोदारस्वभावज इति कृत्वा भणति न प्रतिभां चोरयिष्यति कोऽपि वसुमित्रवत्। स्वाभाविकप्रतिभायत्ता सिद्धिः, नानुकरणसाध्या भासीयप्रतिभा।

---

[९]तत्रैव, पृष्टा– २३

[१०]तत्रैव, पृष्ठा– ३०-३१

अत्रान्तरे राजकुलादागतो भटः राजदारिकायाः सन्देशमादाय। किन्तु भासः राजदारिकां पाठयितुम् असमर्थः इति सिद्धान्तं लिखित्वा पत्रं प्रदत्तवान् भटाय। राजकन्या भाससकाशान्न शिक्षामिच्छति, सा तस्य सान्निध्यं वाञ्छतीति कृत्वा राजकोपान्न भयं प्राप्य स्वनिर्णयो ज्ञापितः। तन्मते 'वरं वैभवहानिर्न तु चारित्र्यहानिः'[११]।

राजप्रासादे तृतीयदृश्यं संघटितम्। अत्र राजा राज्यस्याभियोगपत्राणि पठन्ति विचारञ्च कुर्वन्ति। सहसा राज्ञो हस्ते वसुमित्रकृतम् अभियोगपत्रं भासस्य विरुद्धेन। आरोपपत्रे लिखितमासीत्

"यथा राजकविना भासेन रामायणं महाभारतं च उपजीव्य नाटकानि प्रणीतानि सन्ति। एतेषु नाटकेषु सर्वत्र सत्यस्यापलापः, इतिहासस्य च विपर्यासः कविना कृतोऽस्ति। एतानि नाटकानि रचयता अनेन भासेन यत्सत्यं विडम्बनां नीते एते पवित्रे आर्षमहाकाव्ये। तदस्मिन् वस्तुनि अवेक्ष्य यदि अपराधः सिद्धः स्यात्तर्हि यथोचितं दण्डं धारयितुमर्हति देवः। यदि अपराधो न सिद्धेत्तर्हि यं कमपि दण्डं भोक्तुमहं सिद्धोऽस्मीति विज्ञापना रैभ्यसगोत्रस्य वसुमित्रस्य"[१२] इति। किन्तु राजसिंहः आरोपपत्रमिदं मनसा ग्रहीतुं नालम्। देवरातोऽपि वसुमित्रस्य पत्रममूलकमिति मन्यते असूयामूलकत्वात्। तदा राजानमुद्दिश्य देवरातस्य परामर्शः–

"कविराजेन लिखितानि नाटकानि अत्र आनाययितव्यानि। देवस्तावत् स्वयं प्रभुः नाटकपरीक्षणस्य। शलाकान्यायेन द्वित्राणि नाटकानि अवलोकयतु देवः। यदि पूर्वपक्षीकरणार्थमपि दोषसाधकं किञ्चित्प्रमाणं लब्धम्, अग्रतो गत्वा सर्वलोकसमक्षां परीक्षाम् आज्ञापयतु। विपर्यासे तु अस्य निरर्थककरण्डके विसर्जनम् अवस्थितमेव"[१३] इति।

चतुर्थदृश्ये भासगृहे भासः स्वयमेव–

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्॥
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम्

---

[११]तत्रैव, पृष्ठा– ३३

[१२]तत्रैव, पृष्ठा– ३६-३७

[१३]तत्रैव, पृष्ठा– ३८

वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥
भीष्मद्रोणतटां जयद्रथजलां गान्धारराजह्रदां
कर्णद्रौणिकृपोर्मिनक्रमकरां दुर्योधनस्त्रोतसम्।
तीर्णः शत्रुनदीं शरासिसिकतां येन प्लवेनार्जुनः
शत्रूणां तरणेषु वः स भगवानस्तु प्लवः केशवः[१४]॥

इति श्लोकान् उच्चारयन् मञ्चे प्रविशति। श्लोकजातम् ऊरुभङ्गनाटकस्य प्रतिलिपिरूपम्। श्लोकानामेषां मौक्तिकसरसुन्दरमक्षरं सरलं परञ्च हृदयस्पर्शि। भासपत्न्या आशयोऽयं यद् 'ऊरुभङ्गं यथा सिद्धकण्ठस्य गायकस्य कश्चिद् अनाहतो रागः'[१५]। वयं सर्वे जानीमो यद् ऊरुभङ्गं वियोगान्तं नाटकम्। गजाननो भासमुखेन नाटकस्य नाट्यमञ्चे मृत्युदृश्याप्रदर्शनस्यायौक्तिकत्वं समुपस्थापितवान्– "न जाने कुतोऽस्माकं नाट्यशास्त्रकारैस्तस्य रङ्गमञ्चे निषेधः कृतोऽस्ति। कल्पनाप्राभवं हि नाट्यमर्म"[१६]। तथाहि अग्निपुराणे उक्तम्–

अपारे काव्यसंसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते॥[१७] इति।

कवेर्नाट्यकृतो वा स्वातन्त्र्यमुद्दिश्यैव 'निरङ्कुशा वै कवय' इति भण्यते। न केवलं चेतनाचेतनयोर्धर्मपरिवर्तने एव कविः प्रभवति, अपि तु, स मानवं देवं, देवञ्च दानवं कर्तुं क्षमते। भासोऽपि न व्यतिक्रमस्तेभ्यः कविभ्यः। प्रायः सर्वे कवयः यशोलाभार्थमर्थप्राप्तये च काव्यानि कुर्वन्ति। परं भासो वैप्लविककविः। तस्य कदापि उपाधिलाभेन सन्तोषो न जायते। अत्र भासः आत्मसमीक्षां कर्तुं वाञ्छति। ('भवतु। सर्वः स्वजनदोषान्धः। तथापि दोषमपि कथय, येन प्रतिविधीयेत[१८]।) कथं दुर्योधनस्य हृदयपरिवर्तनम् इति संगीतकृतप्रश्नस्योत्तरेण भासो स्वनिरीक्षणं ब्रुते–

"मरणकाले प्रत्यासन्ने मनुष्यः स्वभावत एवान्तर्मुखो भवति। तस्य सुप्ताः सद्गुणाः तदानीमुद्बुध्यन्ति। वैरबुद्धिर्गलति। कालगुण एवायम्। अतो दुर्योधनस्य हृदयपरिवर्तने नातीव आश्चर्यं कर्तव्यम्। किञ्च, मानशरीरा राजानः

[१४]तत्रैव, पृष्ठा– ३९
[१५]तत्रैव, पृष्ठा– ४०
[१६]तत्रैव
[१७]अग्निपुराणम्
[१८]तत्रैव, पृष्ठा– ४१

इति तस्य श्रद्धा आसीत्, मानार्थमेव तेन युद्धं कृतम्, अन्ततश्च 'येनैव मानेन समं प्रसूतः, तेनैव मानेन सह स दिवं प्रयातः''[१९] इति। तदर्थमेव संगीता मन्यते भासोपज्ञं दुःखान्तनाटकमिति भरतखण्डे भासकीर्तिरजरामरा प्रस्थास्यति। किन्तु भासः आगामिन्यां स्पर्धायां भागं ग्रहीतुं नेच्छति। अस्य कारणत्वेन स युक्तिमुत्थापयति– ''सम्प्रति लाभालाभौ, ईर्ष्यामत्सरौ, स्पर्धाप्रतियोगिते– इदं सर्वं शिशुक्रीडायितुं प्रारब्धमस्ति। अन्येषु दुःखेन दन्दह्यमानेषु को नाम विजयानन्दः? अधुनान्ये तावत्पारितोषिकानन्दमनुभवन्तु''[२०] इति। अत्रान्तरे भटः समागत्य महाराजस्याज्ञापत्रं भासाय निवेदितवान्। तस्मिन् आज्ञापत्रे लिखितमस्ति–

''राजकविर्भासः अनेन लेखेनाज्ञाप्यते, यथा, रामायण–महाभारतविषयकेषु नाटकेषु भासेनैतयोर्महाकाव्ययोर्विडम्बना कृतास्तीति आरोपपत्रं राज्ञा प्राप्तमस्ति। अस्यारोपस्य सर्वजनसमक्षा परीक्षा श्वः अपराह्णे राजकुले भविता। तदानीमाक्षेपप्रतिवचनार्थं स्वपक्षसमर्थनार्थं च राजकविना तत्र उपस्थातव्यमित्याज्ञापना महाराजाधिराजस्य राजसिंहस्य''[२१] इति। एकच्छ्रुत्वा भाससंगीतौ चिन्तान्वितावावेगवशात्।

राजप्रासादे तृतीयाङ्कस्यारम्भो भवति वसुमित्रभासयोर्न्यायसभया। न्यायसभायां समुपस्थिता वर्तन्ते अमात्य-देवरात-वसुमित्र-ज्ञाननिधि-पौरजन-भास-शारद्वत-सौमिल्लकाश्चेति। वसुमित्रस्याभियोगोऽयं यत् रामायण-महाभारताद्याश्रितनाट्यलेखने यः संयमः अभिप्रेत आसीत्, तन्न भासेन कृतम्। अपि च, आर्षमहाकाव्ययोर्विटम्बनैव भासेन कृता। तन्मते भासनाटकेषु पदव्यत्यय-विकरणव्यत्यय-विशेषणविशेष्यगतलिङ्गासङ्गत्यादिप्रमादाः दरीदृश्यन्ते। किन्तु शारद्वतः अभियोगस्यास्यायाथार्थ्यं प्रमाणीकृतवान् स्वयुक्तिजालैः। ततः उदाहरणपुरःसरं नाट्यशास्त्रीयनियमा उल्लङ्घिता भासेनेति वसुमित्रस्याभियोगः। वसुमित्रेण अभियोगपञ्चकं युक्त्या प्रतिष्ठितम्। तत्र 'वालि-दशरथ-दुर्योधनानां मृत्युदृश्यं रङ्गमञ्चे प्रदर्शितं भासेन। तेन तु दुर्योधनमरणान्तरम् ऊरुभङ्गं प्रणयता पादप्रहारेण दूरोत्क्षिप्तोऽस्ति अयं परंपरापूतो नियमः'[२२]। परं ''यदि भासेन

---

[१९]तत्रैव, पृष्ठा– ४१

[२०]तत्रैव, पृष्ठा– ४३

[२१]तत्रैव, पृष्ठा– ४४

[२२]तत्रैव, पृष्ठा– ५०

नाट्यशास्त्रस्य नियमानामुल्लङ्घनं कृतं स्यात्, तर्हि रसापकृष्टा भवेदिति तस्य कृतिः। किन्तु इमं विचारं काचिद्रसिकसभा कुर्वीत, न न्यायसभा"[२३] इति। भासीयनाटकेषु महाभारतस्य खलनायकः दुर्योधनः, कर्णश्च महानायकस्य भूमिकायामवतीर्णः। भासोऽहासो नाम हासविहीनो भासः। नाटकस्य नायको भासः कश्चन निर्भीको यः अर्थलोभेन यशोलोभेन च राजरोषभयाच्चादर्शतो विच्युतो न भवति। तथाहि परश्रीकातरस्यैर्षापरायणस्य वसुमित्रस्य मिथ्याभियोगेन भासो राजदण्डाय दोषभागभूत्तन्नाटकेषु सर्वत्र सत्यस्यापलापत्वाद् इतिहासस्य विपर्यासाच्च। तथाहि 'यथोचितं दण्डं धारयितुमर्हति'। किन्तु भासः समयेऽस्मिन् दण्डान्मुक्तो भवेच्चेद्भासो राज्ञः सकाशे क्षमाप्रार्थनां कुर्यात्। किन्तु प्रत्ययी नायकः विस्फूर्यकण्ठेनोक्तम् 'किमर्थं क्षमायाचना? को वापराधः? न मया कोऽपि अपराधः कृतोऽस्ति, न च मे कापि क्षमा याचनीयास्ति"[२४] ॥ इति। तेन राजरोषभयाद्भासस्य सर्वेषां नाटकानां पाण्डुलिपिमग्निसात्कृतवन्तः। गुरुं प्रति असीमा भक्तिरासीत् शारद्वस्य। गुरोरादर्शं प्रति श्रद्धावान् स सर्वसमक्षं स्वप्नवासवदत्तमिति पाण्डुलिपिं संरक्ष्य राज्यान्निर्गतः। अपि च, नीरवप्रश्नेन मुखरिता अभवन् दर्शकाः– "को नाम राजदण्डस्यापि अधिकारः एवं कवीन् नियमयितुमिति"[२५]। अन्तिमे भरतवाक्यमुच्चार्य्यते–

शंखक्षीरवपुः पुरा कृतयुगे नाम्ना तु नारायणः।
त्रेतायां त्रिपदार्पितत्रिभुवनो विष्णुः सुवर्णप्रभः॥
दूर्वाश्यामनिभः स रावणवधे रामो युगे द्वापरे।
नित्यं योऽञ्जनसन्निभः कलियुगे वः पातु दामोदरः[२६] ॥ इति।

## भासोऽहासः इति नाटकस्य शास्त्रीयपर्यालोचनम्

प्रथमतः, भासः संस्कृतसाहित्ये वैप्लविको नाट्यकारः। व्यतिक्रमिनाट्यत्वेन भासस्य कर्णभारं तथा ऊरुभङ्गञ्च जगति ख्यातिमलभताम्। नाट्यद्वयस्य स्रष्टा भासोऽपि कालिदासात्पूर्वं तथा च परं सममेव ख्यातिमवाप। एकविंशशताब्द्यामपि

[२३]तत्रैव, पृष्ठा– ५१
[२४]तत्रैव, पृष्ठा– ६६
[२५]तत्रैव, पृष्ठा– ६९
[२६]तत्रैव, पृष्ठा– ७२

भासस्य जीवनमाश्रित्य काव्यानि नाटकानि च विरच्यन्ते कविभिः। अत्रैव भासमाहात्म्यम्। गजाननस्येह रूपके मूलचरित्रत्वेन भासश्चित्रितः। तस्य जीवनस्य मूलमुद्देश्यमेतत्– प्रतिभया सम्मानं लभ्यते चेद्वरम्, किन्तु आदर्शहीनतया स्वार्थपरत्वेन च यशोलाभे तस्य मतिर्नास्ति। तस्य छात्रस्य शारद्वतस्य गुरुं प्रति श्रद्धा भक्तिश्च सततमेवास्माभिरद्यापि अनुसरणीये। भासस्य पत्नी संगीता सदा पतिनिष्ठा चानुगता। सा सदा भासस्य सिद्धान्तान् अनुमन्यते। किन्तु गजाननेनात्र वसुमित्रस्य नञर्थकं भिन्नधर्मि स्वार्थान्वेषि चरित्रं मनोज्ञतयाङ्कितम्। चरित्रचित्रणे गजाननो वभूव कुशली नाट्यकारः। नाट्यरचनायाञ्चरित्रमेव प्रधानम्। कवेर्मुख्यमुद्देश्यं चरित्रचित्रणेन कवित्वशक्तेः प्रदर्शनम्। अस्मिन् क्षेत्रे गजानन-बालकृष्ण-पळसुलेपादः अग्रणीः।

द्वितीयतः, गजाननः नाट्येऽस्मिन् सप्रसङ्गं सदुक्तीनां यथोचितं प्रयोगञ्चकार। काश्च उक्तयस्तावत्– ‘किन्तु वरं वैभवहानिः, न तु चारित्र्यहानिः’ (द्वितीयोऽङ्कः), ‘अल्पज्ञानं भयावहम्’ (तृतीयाऽङ्कः), ‘द्विविधं खलु सत्यम्। वस्तुगतं काव्यगतञ्च’।(तृतीयोऽङ्कः), ‘अनन्यपरतन्त्रा हि कविकृतिः’, ‘पूज्यमान इव दुर्जनगौरवमपि परिहार्यम्’, ‘कामं जनः नावीन्यप्रियः, न तु क्रान्तिसिंहः’ (तृतीयोऽङ्कः)।

तृतीयतः, विश्वनाथः साहित्यदर्पणे निगदति स्म– ‘नामकरणं नाटकस्य स्याद् गर्भितार्थप्रकाशकम्’[२७] इति। अर्थात् नाटकस्य नाम्ना नाटकान्तर्गतार्थाः प्रकाशिता भवन्ति। अस्मिन् नाटके भासः राष्ट्रशक्तेर्विरुद्धेन युद्धं घोषितवान्। राष्ट्रव्यवस्थायां ज्ञाननिधिरिति श्रेष्ठसम्मानं हेलया त्यक्तवती। अत्र ‘भासोऽहासः’ इति शब्दबन्धार्थस्तावत् ‘हासविहीनो भास’ इति। भासपत्न्या संगीतयोक्तम्– ‘कविताकामिन्याः हासो भासः स्वयम् अहासः संवृत्तः’[२८] इति। विशयगतदृष्ट्या नाटकस्यास्य नामकरणं यथार्थमिति मामकी मतिः।

चतुर्थतः, नाट्यशास्त्रगतान् विविधान् राद्धान्तान् प्रसङ्गक्रमेणात्र पर्यालोचितवान् नाट्यकारो गजाननः। एतेन प्रमीयते यद्यपि स व्याकरण-वेदादिशास्त्रेषु निष्णातः, परं नाट्यतत्त्वेष्वपि तस्य समानं दाक्ष्यं वर्तते। अर्वाचीननाट्यकृद्भिरुपेक्षितानि भरतप्रवर्तितानि नान्दी-प्रस्तावना-पताका-

[२७]साहित्यदर्पणः (षष्ठः परिच्छेदः)

[२८]भासोऽहासः, पृष्ठा– ६९

प्रवेशक-विष्कम्भकादीनि नाट्यतत्त्वानि। अस्मिन् रूपके यद्यप्यस्माभिर्दृश्यते भरतवाक्यं किन्तु "तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये" इति दर्पणकृतोक्तानुसारं नान्द्यवश्यकर्तव्यतयालंकारिकैरभ्युपगताप्यत्र नान्दी न विलसति। नाट्यस्यास्यापरमेकं वैशिष्ट्यं यत् प्रत्यङ्कम् कैश्चिद्दृश्यैर्विभक्तम्। परं प्रस्तावना-प्रवेशक-विष्कम्भक-पताकादीनां पृथक्तयोल्लेखो न कृतः नाट्यकृद्भिर्गजाननैः। किञ्च, विश्वनाथेन नाटकस्य नायकस्वरूपविषये भणितम्–

प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।
दिव्योऽथ दिव्यादिव्यो वा गुणवान् नायको मतः[२९]। इति।

किन्तु धीरोदात्त-धीरललितनायकानां स्थले सामान्यनिम्नवर्गीयचरित्राणि नायकत्वेन स्थानं लभन्तेऽर्वाचीनसंस्कृतनाटकेषु। अस्मिन् रूपके संस्कृतसाहित्यस्य भासाख्यः ख्यातिभाक् कविः नायकपदमलञ्चकार। नाट्यमिदं सूक्ष्मेक्षिकया पर्यालोच्यते चेन्निश्चप्रचं प्रमाणितं भवति यन्नाट्यकृतो गजाननस्य महाभारतीयचरित्रसन्दर्भे किंविधासीच्चिन्तनशैली।

पञ्चमतः, भासीयभाषा प्रसादगुणोपेता सहजबोध्या चानवद्या। वैदर्भी रीतिः सर्वत्र राजते रूपकेऽस्मिन्। प्रसादगुणोऽपि परिलक्ष्यते। कविवरेण सरल-सावलील-ललित-पदगुम्फितेन भाषायाः सारल्येन च नाटकमिदं परमप्रमोदायोपस्थाप्यते। पळसुले इत्यस्य वाणी व्यञ्जनागर्भा चानिन्द्यसुन्दरीति। तस्य शब्दचयनं राजशेखरभाषया रसोचितं शब्दार्थसूक्तिनिबन्धनम्। नाट्यकृता विषयेन समं सायुज्यं विधाय शब्दप्रयोगोऽकारि। भाषा-भावयोरपूर्वसमन्वयेन रूपकमिदमसामान्यमभवत्। नाट्यकृतः काव्यसम्पादने सूक्ष्मेक्षिका प्रतिभा कलात्मिका तूलिका च नीरसे सरसतां दुर्बोध्येऽपि सुबोधतां प्रकाशयति। किञ्च, गजाननस्य शब्दपाको राजशेखरोक्तो नालिकेरपाकसंकाशः। वैदर्भीरीत्या विरचितमङ्कत्रितयात्मकं रूपकमिदं सहृदयानां सुधियाञ्च हृदयाह्लादकत्वेनामृतभाण्डमिवाभाति।

## उपसंहृतिः

परिशेषे वक्तव्यं यद्वैनायकमिति महाकाव्यग्रथने गजानन-बालकृष्ण-पळसुले यथा दक्षस्तथैव नाट्यविरचने तस्यापृथग्यत्ननिर्वर्त्यतां सावलीलताञ्चेति

[२९]साहित्यदर्पणः(हरिदाससिद्धान्तवागीशसम्पादितः), पृष्ठा - २८९

प्रेक्षं प्रेक्षं सहृदयपाठकास्तेषां मनोदर्पणे तस्मै स्थायि आसनं प्राददुः इति। भासस्यातिप्रसिद्धकिंवदन्तीमुपजीव्य नाटकस्याङ्कत्रितयात्मकस्य परिशीलनात् परमादावेव मनसि ध्वनिकारस्योक्तिः समायाति–

दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात्।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमः[३०]॥ इत्यलंविस्तरेण।

-★-

[३०] ध्वन्यालोकः

# रसगङ्गाधरीयमङ्गलपद्यविमर्शः

सुजितदासः*

जगत्यस्मिन् सर्वेषु कार्येषु विघ्नस्योपस्थितिरस्ति तर्हि का कथा ग्रन्थारम्भस्य? यथा कार्यारम्भे तथैव ग्रन्थारम्भेऽपि विघ्नोपस्थितिः संलक्ष्यते। तथाहि प्रायेण सर्वैरेव ग्रन्थकारैः तस्य विघ्नस्य निवारणार्थं ग्रन्थादौ मङ्गलमाचरितम्। सांख्यसूत्रकारमहात्मना कपिलेनापि स्वकीये सांख्यसूत्राख्ये ग्रन्थे मङ्गलस्य शास्त्रारम्भेऽवश्यकर्त्तव्यता सूत्रिता–

"मङ्गलाचरणं शिष्टाचारात्फलदर्शनाच्छ्रुतितश्चेति।"[1] इति।

पेरुभट्टात्मजः तैलङ्गप्रदेशीयपण्डितराजजगन्नाथभट्टोऽपि पूर्वाचार्याननुसृत्य चिकीर्षितस्य साहित्यपदार्थनिरूपणात्मकरसगङ्गाधराख्यशास्त्रग्रन्थस्यान्वीक्षिकी-प्रथितपथेन यथायथं सूक्ष्मसमीक्षया प्रतिबन्धकान्तरायसन्ततिदुरितनिर्विघ्न-परिसमाप्त्यर्थं परीक्षकप्रेक्षावताञ्च प्रसादार्थं समुचितेष्टदेवतानमस्कारात्मकं वस्तुनिर्देशात्मकञ्च मङ्गलमाचरन् शिष्यान् विशिष्य शिक्षयितुं प्रबन्धीकरोति–

स्मृतापि तरुणातपं करुणया हरन्ती नृणा-
मभङ्गुरतनुत्विषां वलयिता शतैर्विद्युताम्।
कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी
मदीयमतिचुम्बिनी भवतु कापि कादम्बिनी॥[2] इति।

आदौ अत्रायं प्रश्नो भवितुमर्हति यद् ग्रन्थस्यास्य शास्त्रत्वे किं मानम्? तदुत्तरेण वक्तुं शक्यते–

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्॥[3]

इति मीमांसकवेदान्तिनोः। अतोऽस्य ग्रन्थस्यापि पूर्वोक्तपञ्चाङ्गवत्त्वाच्छास्त्रत्वं बोध्यम्। ननु निर्विघ्नपरिसमाप्त्यर्थमित्यत्र निर्विघ्नपदस्य कोऽर्थ इति चेदुच्यते

---

*सहायकाचार्यः, संस्कृतविभागे, नवग्रामहीरालालपालमहाविद्यालये

[1]सांख्यसूत्रम्– ५।१।

[2]सगङ्गाधरीयप्रथममाननस्य मङ्गलपद्यम्। पृष्ठाङ्कः– १

[3]शब्दकल्पद्रुमस्य पञ्चमभागे। पृष्ठाङ्कः– ६८।

विघ्नो नाम "कार्योत्पादप्रयोजकीभूतधर्मविघटकः"[४] इति सर्वलक्षणसंग्रहकाराः। स च विघ्नः प्रतिबन्धकदुरितसद्भावो निर्वर्तकसुकृतविरहः चेति द्विधा मतः। न विद्यते विघ्नो यत्रेति निर्विघ्नं, यथा स्यात्तथा परिसमाप्तिरिति निर्विघ्न-परिसमाप्तिः, अर्थः प्रयोजनम्वा यस्य तन्निर्विघ्नपरिसमाप्त्यर्थम्। अनेन समाप्तित्वावच्छिन्नं प्रति मङ्गलत्वावच्छिन्नं कारणमिति कार्यकारणभावो दर्शितः। एवं समाप्तिं प्रति विघ्नध्वंसः कारणम्। विघ्नध्वंसं प्रति पुनः मङ्गलं कारणम्। मङ्गलजन्यो विघ्नध्वंसस्तज्जन्या च समाप्तिरिति। अत्र व्यापारो द्वारम्। द्वारत्वञ्च तज्जन्यत्वे सति तज्जन्यजनकत्वरूपम्। अत्र पुनरयं प्रश्नो भवितुमर्हति यत्का नाम समाप्तिः? तत्रेदम्वक्तुं शक्यते यत्समाप्तिर्नाम चरमवर्णध्वंसः। स चात्मनि स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसम्बन्धेन वर्तते। अत्र पुनश्चायम्प्रश्नो भवितुमर्हति यत्किं तावन्मङ्गलम्? तदुत्तरे वक्तुं शक्यते यन्मङ्गलं नाम नमस्कृतिः। सा च स्वापकर्षबोधानुकूलव्यापारः स्वावधिकोत्कर्षवत्तायाः ज्ञापनम्वा। सा च स्वानुकूलकृतिमत्त्व-सम्बन्धेनात्मनि वर्तते। एवं स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसम्बन्धेनात्मवृत्तिं समाप्तिं प्रति स्वानुकूलकृतिमत्त्वसम्बन्धेनात्मवृत्तिमङ्गलं विशेषणतासम्बन्धेन आत्मवृत्तिविघ्न-ध्वंसद्वारेण कारणम्।

अत्र पुनश्चायम्प्रश्नः समुदेति यन्मङ्गलमेतन्नित्यकर्म नैमित्तिककर्म निषिद्धकर्म प्रायश्चित्तकर्म उपासनाकर्म उत काम्यकर्म?

तत्र नाद्यम्। कथमिति चेदुच्यते– 'यावज्जीवमग्निहोत्रं जुहोति', 'मा हिंस्यात्सर्वा भुतानि',[५] 'वेदमधीत्य स्नायात्',[६] 'स्वाध्यायोऽध्येतव्यः'[७] इत्यादिवदस्य नित्यत्वसाधकविधिप्रमाणाभावात्। यद्यपि यन्निमित्तफलसम्बन्धम् अन्तरेण विहितं कर्म तन्नित्यं, मङ्गले च तदभावात्तथात्वमिति चेदस्तु। तथापि यथा नित्यस्याग्निहोत्रादेर्ग्रन्थारम्भे नावश्यकर्त्तव्यता तद्वदत्रापि बोध्यम्।

न च द्वितीयम्। कथमिति चेदुच्यते– 'उपरागे स्नायाद्', 'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते', इत्यादिवद्वेदे शास्त्रारम्भे मङ्गलं

---

[४]सर्वलक्षणसंग्रहः। पृष्ठाङ्कः– ११६।

[५]अर्थसंग्रहस्य परिशिष्टरूपाङ्गत्वादिपरिष्कृत्यान्तर्गतविधिवाक्यसूच्याम्। पृष्ठाङ्कः– १९९।

[६]तत्रैव। पृष्ठाङ्कः– १९८।

[७]तत्रैव। समानपृष्ठाङ्कः।

कुर्य्यादित्यादिनिमित्तविधेरसंकीर्तनात्। ननु आचाराच्च स्मृतिं बुध्वा स्मृतेश्च श्रुतिकल्पनमिति सिद्धान्तात्सदाचारानुमितस्मृत्या तादृशी श्रुतिः कल्प्यते इति चेन्न दृष्टान्ताभावात्। यदि कोऽपि जनोऽत्र एवम्वक्तुमिच्छति यदन्यस्य निमित्तस्यानुपलब्धादत्र ग्रन्थारम्भस्यैव निमित्तत्वम्बोध्यं तर्हि तदपि न युक्तम्। कारणं हि तत्र ग्रन्थारम्भस्यैव निमित्तत्वे स्वीकृते सति निमित्तादनन्तरं नैमित्तिकमिति नियमान्मङ्गलस्य शास्त्रारम्भोत्तरकालिकत्वमेव स्यान्न तु पूर्वकालिकत्वम्। अतः मङ्गलस्य नैमित्तिकत्वं नोपयुज्यते एव।

न च तृतीयम्। कथमिति चेदुच्यते– व्यवहारविरोधात् 'ब्राह्मणो न हन्तव्यः'[८] इति विधिवदत्र 'मङ्गलं न कर्त्तव्यम्' इत्याकारकनिषिद्धकर्मप्रतिपादकविध्यभावाच्च।

न च चतुर्थम्। कथमिति चेदुच्यते– पापायाविहितत्वात् 'परस्त्रीकामः प्रायश्चित्तं कुर्याद्' इत्यादिवदत्र प्रायश्चित्तविधायकविध्यभावाच्च।

न च पञ्चमम्। कथमिति प्रश्निते उच्यते– एकाग्रतासाधकाभावात् 'सर्वं खल्विदं ब्रह्म',[९] 'स आत्मानमुपासीत मनोमयं प्राणशरीरम्'[१०] चेत्यादिवन्मङ्गलस्य उपासनातासाधकविध्यभावाच्च।

अपि तु षष्ठमेवेदं मङ्गलाकलनम्। कथमिति चेदुच्यते फलाभिसम्बन्धाद् 'ज्योतिष्टोमेण स्वर्गकामो यजेत', 'कारीर्या वृष्टिकामो यजेत'[११] इत्यादिवदत्र 'समाप्तिकामो मङ्गलमाचरेद्' इति शिष्टाचारानुमितश्रुतिप्रमाणवशाच्च। यदि कोऽपि जनोऽत्र एवम्वक्तुमिच्छति यदनुमितस्यास्य वाक्यस्य श्रुतित्वे किं मानमिति? कारणं हि तत्र नास्तिकानां ग्रन्थे मङ्गलाचरणव्यतिरेकेणैव समाप्तिः परिलक्ष्यते। अस्तु परन्तु नास्तिकाः न शिष्टाः। पुनः नास्तिकानां शिष्टत्वे स्वीकृते सति तत्र जन्मान्तरीयमङ्गलं कल्प्यते। अथवा यत्र प्रबन्धे मङ्गलाकलनं न परिलक्ष्यते तत्र समाप्तिरूपकार्यावसेयतया न कृतमिति न किन्तु न लिखितमित्येव चिन्तनीयं लेखनस्यातन्त्रत्वात्। पुनः यदि कोऽपि जनोऽत्रैवं वक्तुमिच्छति यत्केषाञ्चनास्तिकानां ग्रन्थे मङ्गलाचरणात्परमपि असमाप्तिर्परिलक्ष्यते। यथा कादम्बरीकिरणावल्यादौ।

---

[८]अर्थसंग्रहस्य परिशिष्टरूपाङ्गत्वादिपरिष्कृत्यान्तर्गतविधिवाक्यसूच्याम्। पृष्ठाङ्कः– १९८।

[९]छान्दग्योपनिषदि– ३/१४/१। पृष्ठाङ्कः– ३५४।

[१०]शतपथब्राह्मणे– १०/६/३/२।

[११]अर्थसंग्रहस्य परिशिष्टरूपाङ्गत्वादिपरिष्कृत्यान्तर्गतविधिवाक्यसूच्याम्। पृष्ठाङ्कः– १९२।

यदि 'समाप्तिकामो मङ्गलमाचरेद्' इत्येषा शिष्टाचारानुमिता श्रुतिः तर्हि कथं श्रुतिविहिते कार्ये क्रियमानेऽपि फलव्यत्ययः? वस्तुत एषा शङ्का न युक्ता। कथमिति चेदुच्यते यत्र मङ्गले सत्यपि समाप्तिर्न परिलक्ष्यते तत्र विजातीयविघ्नविशेषोऽस्तीत्येव चिन्तनीयम्। एवम्विजातीयविघ्नविशेषस्य कृते विजातीयविघ्नविशेषविघातकं विशेषमङ्गलाकलनमेव करणीयम्। यथा– विनायकस्तवादयः। तत्र सामान्यमङ्गलाकलनेन किमपि न भविष्यति। अतः पूर्वोक्तानां सामान्यमङ्गलाकलनसहकृतास्तिकग्रन्थानामपि तादृशी अवस्था इत्येव चिन्तनीयम्। पुनश्च यदि कोऽपि जनोऽत्र एवम्प्रष्टुमिच्छति यद्योगसूत्राद्यास्तिकग्रन्थे मङ्गलाकलनव्यतिरेकेणापि समाप्तिः परिलक्ष्यते तर्हि कथं मङ्गलस्य शिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यता? परन्तु पुनरेषा शङ्का न युक्ता। कथमिति चेदुच्यते ग्रन्थान्तर्गतग्रन्थबहिर्भूतभेदेन मङ्गलाकलनं द्विधा मतम्। तत्र 'अथ योगानुशासनम्',[१२] 'अथ शब्दानुशासनम्'[१३] इत्याकारकं यन्मङ्गलाकलं परिलक्ष्यते तद् ग्रन्थान्तर्गतं मतम्। पुनश्च 'निधाय हृदि विश्वेशम्विधाय...।'[१४] इत्यादौ यच्छोलोकाकारमङ्गलाकलनं परिलक्ष्यते तद् ग्रन्थबहिर्भूतं मतम्। अतः योगसूत्रीयमङ्गलाकलनस्थस्याथशब्दस्य केवलमधिकारार्थे ग्रहणं कदापि न कर्त्तव्यमपि तु तत्रत्यस्याथ-शब्दस्याधिकारार्थसहकृतमङ्गलार्थे ग्रहणमेव युक्तम्। पुनश्च यदि कोऽपि जनोऽत्रैवम्वक्तुमिच्छति 'न कुर्यान्निष्फलं कर्म' इति श्रुतेः 'न कुर्वीत वृथा चेष्टाम्' इति स्मृतेश्च निष्फलं कर्म कदापि न कर्त्तव्यम्। अस्तु किं चातः? परन्तु ग्रन्थसमापनार्थं प्रतिबन्धकाभावविशिष्टजनस्य मङ्गलाकलनं निष्फलमेव स्यात्। अत एवं प्रतिबन्धकाभावविशिष्टस्थले मङ्गलस्य निष्फलत्वे सिद्धे मङ्गलस्य श्रुतिविहितत्वं न परिलक्ष्यतेऽपि तु श्रुतिविरोधिता परिलक्ष्यते एव। वस्तुत एवं कथनं नोचितम्। कारणं हि तत्र जगत्यस्मिन् प्रतिबन्धकाभावविशिष्टजनो दुर्लभ एव। उपलभ्यते चेत्तत्रेदम्वक्तुं शक्यते– दृश्यते हि लोके चौरव्याघ्रादिसन्देहे केवलं सम्भवनयैव तन्निवारकोपायप्रवृत्तिः, तद्वदत्रापि केवलं प्रतिबन्धकसन्देहे केवलं सम्भवनया एव तन्निराकरणार्थं मङ्गलाकलनप्रवृत्तिः। तथा चोदीरितमुदयनाचार्येण तदीयायां किरणावल्याम्– "यतस्तत्सन्देहेऽपि तदुपादानस्य न्याय्यत्वात्। अन्यथा

---

[१२]योगसूत्रे प्रथमपादे प्रथमं सूत्रम्। पृष्ठाङ्कः– १।

[१३]महाभाष्ये पश्पशाह्निके। पृष्ठाङ्कः– १।

[१४]तर्कसंग्रहे। पृष्ठाङ्कः– १।

अनुपस्थितपरिपन्थिभिर्पार्थिवैर्द्विरदयूथपतयो नाद्रियेरन्निति"[१५] इति। अतः– 'समाप्तिकामो मङ्गलमाचरेद्' इत्यनुमितवाक्यस्य श्रुतत्वकल्पने न कापि हानिः।

अत्रायं प्रश्नो भवितुमर्हति यद्भगवतः कृष्णस्य समुचितेष्टदेवत्वे किं मानमिति? कारणञ्च तत्र–

आरोग्यं भास्करादच्छेद्धनमिच्छेद्धूताशनात्।
ज्ञानञ्च शङ्करादिच्छेन्मुक्तिमिच्छेज्जनार्द्दनात्॥[१६]

इति कर्मलोचनकारोक्तं वचनम्। अतः पूर्वोक्तस्मृतेः ग्रन्थस्यास्य काव्यशास्त्रनिष्ठज्ञानप्रदायकत्वाच्छङ्कर एवात्र उपासनीयो ज्ञानप्रपञ्चाधिपतित्वात्। तर्हि कथं ग्रन्थकारेण शङ्करोऽत्र न नमस्कृतः? तदुत्तरेण वक्तुं शक्यते यच्छ्रीकृष्णस्य श्रृङ्गाराधिष्ठातृदेवतात्वेनोल्लेखो ग्रन्थान्तरे परिलक्ष्यते एव। ग्रन्थस्यास्य निरूपनीयविषयेषु रस एव प्रधानः। रसेष्वपि पुनः श्रृङ्गारस्यैव प्राधान्यम्। श्रृङ्गारस्याधिष्ठातृदेवतया श्रीकृष्णस्य श्यामवर्णवत्त्वाच्छृङ्गारस्यापि तद्वत्त्वं बोध्यम्। यदि कोऽपि जनोऽत्र यद्यपि रसानां देवतावर्णादिर्न वर्णितः तर्हि कथमेवमुक्तमित्येवम्प्रष्टुमिच्छति तर्हि तन्न युक्तम्। कथमिति चेदुच्यते यद्यपि रसानां देवतावर्णादिर्न वर्णितोऽत्र तथाप्यप्रतिषद्धमनुमतमिति न्यायं समाश्रित्य तथोच्यते। अत्र पुनश्चायं प्रश्नो भवितुमर्हति यद्रसगङ्गाधरकारस्वीकृते श्रृङ्गाररसप्राधान्यत्वे किं मानम्? कारणं हि तत्र रसैकत्ववादिनां मुख्यतया पञ्च एव पक्षाः सन्ति।

एतेषु पञ्चषु पक्षेषु आद्यन्तावद्भवभूतेर्मतम्। तेन करुणरसस्यैव प्राधान्यं स्वीकृतम्। तस्याविर्भावकाल ईशवीयाष्टमशतकमित्यनुमीयते। तन्नये यथा तरङ्गावर्त्तबुद्बुदायो जलस्यैव निमित्तभेदाश्रयिविकारमात्रं तथैव श्रृङ्गरादयो रसा अपि मूलभूतस्य करुणरसस्य निमित्ताश्रयिविकारभूतम्। तथाहि रचितं तेन–

एको रसः करुण एव निमित्तभेदाद्भिन्नः पृथक् पृथगिवाश्रयते विवर्तान्।
आवर्त्तबुद्बुदतरङ्गमयान्विकारानम्भो यथा सलिलमेव तु तत्समग्रम्॥[१७] इति।

द्वितीयं तावत् आचार्यभरतस्य तदनुसारिणोऽभिनवगुप्तपादाचार्यस्य च मतम्। यद्यपि नाट्याचार्यभरतस्याविर्भावकालनिर्णयविषये पण्डितेषु वैमत्यं

---

[१५]किरणावली। पृष्ठाङ्कः– ३८।

[१६]शब्दकल्पद्रुमस्य द्वितीयभागः। पृष्ठाङ्कः– ५०७।

[१७]उत्तररामचरिते तृतीये सर्गे श्लोकः– ४७। पृष्ठाङ्कः– ९९।

परिलक्ष्यते, परन्तु भट्टाभिनवस्याविर्भावकाल ईशवीयमेकादशशतकमित्यनुमीयते। तैः शान्तरसस्यैव प्रकृतित्वं स्वीकृतम्। तेषान्नये रत्यादयः सर्वे तस्याः एव प्रकृत्याः निमित्ताश्रयिविकारस्वरूपाः। तथाहि प्राचार्यैर्भाषितन्नाट्याचार्येण चानुवंशश्लोकाकारेणोद्धृतम्–

भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः।
विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते॥
स्वं स्वं निमित्तमास्वाद्य शान्ताद्भावः प्रवर्तते।
पुनर्निमित्तापाये च शान्त एवोपलीयते॥[१८] इति।

अत्र भट्टाभिनवेनाप्यनुरूपकथनद्वारेण समर्थितम्– "तेनात्मैव ज्ञानानन्दादि-विशुद्धधर्मयोगी परिकल्पित-विषयोपरागरहितोऽत्र स्थायी। ...तत्त्वज्ञानं तु सकलभावान्तरभित्तिस्थानीयं सर्वस्थायिभ्यः स्थायितमं सर्वा रत्यादिकाः स्थायिचित्तवृत्तिर्व्यभिचारीभावयत् निसर्गत एव सिद्धस्थायिभावमिति। ...तत्त्वज्ञानलक्षणस्य च स्थायिनः समस्तोऽयं लौकिकालौकिकचित्तवृत्तिकलापो व्यभिचारितमभ्येति।"[१९] इति।

तृतीयन्तावदग्निपुराणकारोक्तवचनानुसारिभोजराजस्य मतम्। भोजराजस्य आविर्भावकाल ईशवीयचतुर्दशशतकमित्यनुमीयते। अग्निपुराणकारेणादौ रसस्वरूपमुल्लिख्य तदनु रसेषु शृङ्गारस्य श्रेष्ठत्वं स्वीकृतम्। तथाहि रपितं तेन–

अक्षरं परमं ब्रह्म सनातनमजं विभुम्।
वेदान्तेषु वदन्त्येकं चैतन्यं ज्योतिरीश्वरम्॥
आनन्दसहजस्तस्य व्यज्यते स कदाचन।
व्यक्तिः सा तस्य चैतन्यचमत्काररसाह्वयः॥
आद्यस्तस्य विकारो यः स महानिति तु स्मृतः।
ततोऽभिमानस्तत्रेदं समाप्तं भुवनत्रयम्॥
अभिमानाद्रतिः सा च परिपोषमुपेयुषी।
व्यभिचार्यादिसामान्याच्छृङ्गार इति गीयते॥
तद्भेदाः काममितरे हास्याद्या अप्यनेकशः।[२०] इति।

---

[१८]नाट्यशास्त्रे षष्ठाध्याये श्लोकौ– ८६-८७। पृष्ठाङ्कौ– ३३४-३३५। (बरोदासंस्करणम्)

[१९]तत्रैव षष्ठाध्यायेऽभिनवभारत्याम्। पृष्ठाङ्काः– २१६-२१९। (सम्पूर्णानन्दसंस्करणम्)

[२०]अग्निपुराणस्य काव्यालंकारभागे, श्लोकाः– १-५। पृष्ठाङ्काः– ७०-७५।

भोजराजेनापि तदीये शृङ्गारप्रकाशे प्रायेणानुरूपमेव ग्रथितम्–

"शृङ्गारवीरकरुणाद्भुतरौद्रहास्यवीभत्सवत्सलभयानकशान्तनाम्नः।
आम्नासिषुर्दशरसान्सुधियो वयं तु शृङ्गारमेव रसनाद्रसमामनामः॥
वीराद्भुतादिषु च येह रसप्रसिद्धिः सिद्धा कुतोऽपि वटयक्षवदाविभाति।
लोके गतानुगतिकत्ववशादुपेतामेतां निवर्तयितुमेष परिश्रमो नः॥
अप्रातिकूलिकतया मनसो मुदादेर्यस्संविदोऽनुभवहेतुरिहाभिमानः।
ज्ञेयो रसः स रसनीयतयात्मशक्तेर्रत्यादिभूमनि पुनर्वितथा रसोक्तिः॥
रत्यादयोऽर्धशतमेकविवर्जिता हि भावाः पृथग्विधविभावभुवो भवन्ति।
शृङ्गारतत्त्वमभितः परिवारयन्तः सप्तार्चिषं द्युतिचयेव वर्धयन्ति॥

...अतः स्थितमेतत् रत्यादयः शृङ्गारप्रभवाः एकोनपञ्चाशद्भेदाः, वीरादयो मिथ्यारसप्रवादाः, शृङ्गार एवैकश्चतुर्वर्गैककारणं रस इति।"[२१] इति।

पुनः तेनैव तदीये ग्रन्थे रसवियोगप्रकाशनप्रकाशाख्ये एकादशप्रकाशेऽपि भणितम्– "...यच्चोक्तं विभावानुभावव्यभिचारिसंयोगात्स्थायिनो रसत्वमिति तदपि न। हर्षादिष्वपि विभावानुभावव्यभिचारिसंयोगस्य विद्यमानत्वात्। तस्माद्रत्यादयः सर्वे एवैते भावाः, शृङ्गार एवैको रस इति। ...तं त्वात्मनोऽहंकारगुणविशेषं ब्रूमः। स शृङ्गारः, सोऽभिमानः, स रसः। "[२२] इति।

यद्यपि शृङ्गारप्रकाशकाराग्निपुराणकारयोर्मतयोर्मध्ये सूक्ष्मभेदो वर्तते। उभयेनैवात्मनोऽहंकारविशेषगुणयोगित्वं स्वीकृतम्। अग्निपुराणकारनयेऽहंकार एवाभिमानद्वारेण रतिस्वरूपं विगृह्य व्यभिचार्यादिभिः पुष्टीभूय शृङ्गारत्वमाप्नोति। परन्तु अयमेवाहंकारोऽभिमानत्वेन शृङ्गारत्वेन वोच्यते इति राजाधिराजाः।

चतुर्थञ्च साहित्यदर्पणकारविश्वनाथस्य वृद्धप्रपितामहनारायणपण्डितस्य मतम्। तेन विस्मयमूलकाद्भुतरसस्यैव प्रकृतित्वमङ्गीकृतम्। तदन्तेवासिना धर्मदत्तेन स्वकीये ग्रन्थे स्वगुरोर्मतोल्लेखः कृत इति साहित्यदर्पणकारः। तथोक्तं विश्वनाथेन तदीये ग्रन्थे– "चमत्कारश्चित्तविस्ताररूपो विस्मयापरपर्यायः। तत्प्राणत्वञ्चास्मद्वृद्धप्रपितामहसहृदयगोष्ठीगरिष्ठकविपण्डितमुख्यश्रीमन्नारायण-पादैरुक्तम्। तदाह धर्मदत्तः स्वग्रन्थे–

[२१]शृङ्गारप्रकाशस्य प्रथमप्रकाशे, श्लोकाः– ६-९। पृष्ठाङ्काः– २-९।

[२२]तत्रैव एकादशप्रकाशे। पृष्ठाङ्कौ– ४३०-४३१।

रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते।
तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः।
तस्मादद्भुतमेवाह कृती नारायणो रसम्॥

इति"[२३] इति। पञ्चमन्तावद्भक्तिरसायणकारमधुसूदनसरस्वतीमहाभागस्य तदनुसारिणाञ्च मतम्। मधुसूदनसरस्वतीमहोदयेन भक्तिरसं व्यतिरिच्य रसान्तराणां रसत्वं न स्वीकृतम्। तथाहि व्याहृतं तेन–

परिपूर्णरसा क्षुद्ररसेभ्यो भगवद्रतिः।
खद्योतेभ्य इवादित्यप्रभेव बलवत्तरा॥[२४] इति।

इदानीं रसैकत्ववादिमतपञ्चकस्यास्याबलबलानुसारेणारोहपद्धत्या खण्डनं मण्डनञ्च क्रियेते। तत्रादावयमेव वक्तुं पार्यते यद्भक्तिरसैकत्ववादिनां मतं न युक्तम्। कथमिति चेदुच्यते– भक्तिरसस्य रसत्वमेव न युक्तं भावध्वनौ तस्य निगरणात्।

पुनः नारायणमतमपि न युक्तम्। कथमिति चेदुच्यते तदुक्तचमत्कारशब्दस्य विस्मयमूलकत्वान्निर्विघ्नसंविदर्थकचमत्कारशब्दस्य आह्लाद-मूलकत्वाच्च।

पुनश्च पदवाक्यप्रमाणज्ञभवभूतिमहोदयस्य मतमपि न युक्तम्। कथमिति चेदुच्यते– नाटकीयपरिस्थितिविशेषस्यैव काव्यमयोद्गारमात्रत्वात्। यद्यपि तलस्पर्शिनीकारवीरराघवेन प्राचुर्याद्रागिविरागिसाधारण्याच्चेति हेतुद्वयोपस्थापनेन भवभूतिरत्र समर्थितः। तथाहि तेन तदीयायां टीकायामित्थं टीकितम्– "इदमत्र कवेर्मतम्– ...प्राचुर्याद्रागिविरागिसाधारण्यात्करुण एव रसः। अन्ये तु तद्विकृतयः।"[२५] इति। पुनः तलस्पर्शिनीकृत्कृतसमर्थनमपि न युक्तं विनिगमनाऽभावात्। कारणञ्चात्र यथा केषाञ्चन जनानां जीवने शोकाधिक्यं परिलक्ष्यते तथा केषाञ्चन जनानां जीवने उत्साहाधिक्यमपि परिलक्ष्यते। पुनश्च शमादावपि रागिविरागिसाधारण्यं परिलक्ष्यते। पुनः रागिविरागिनोः स्वरूपमपि व्याकर्तुं न शक्यते। कारणञ्च तत्र एक एव वस्तुविशेषः यथा कस्यचन सकाशे रागकारणं भवति तथाऽपरस्य कस्यचन सकाशे विरागकारणमपि भवति। दृश्यते हि लोके यथा संसारिजनानां

[२३]साहित्यदर्पणे तृतीयपरिच्छेदे। पृष्ठाङ्कः– २३।

[२४]भक्तिरसायणे द्वितीयोल्लासे श्लोकः– ७८। पृष्ठाङ्कः– १६४।

[२५]उत्तररामचरितस्य तृतीयाङ्कस्य सप्तचत्वारिंशत्तमश्लोकस्य तलस्पर्शिनीटीकायाम्। पृष्ठाङ्कः– ९९।

संसारे रागः सन्न्यासे च विरागः तथैव सन्न्यासिजनानां संसारे विरागः सन्न्यासे च रागः। मन्मते तु शोकस्थायिककरुणरसस्य प्रकृतित्वस्वीकारे भवभूतिमहाभागस्यापि रुचिः नासीत्। अन्यथा कथं तेन स्वकृतोत्तररामचरितं विप्रलम्भश्रृङ्गाररसाङ्गित्वेन रचितम्। प्रसङ्गेऽस्मिन्नुल्लेखार्हं यत्केचन जनाः करुणरसस्य विप्रलम्भश्रृङ्गारेऽन्तर्भावं स्वीकुर्वन्ति। परन्तु तन्न युक्तं विप्रलम्भस्य सापेक्षत्वात्करुणस्य च निरपेक्षत्वात्। पुनः विप्रलम्भश्रृङ्गारकरुणयोर्मध्ये कोऽपि भेदो नास्तीत्येकिनः। परन्तु तेऽपि न युक्ताः मानाभावात्। तथापि यदि कोऽपि जनः करुणरसस्य प्रकृतित्वं स्वीकर्तुमिच्छति तर्हि तत्र शोकस्थायिककरुणस्य न अपि तु करुणास्थायिककरुणस्यैव प्रकृतित्वं स्वीकर्तव्यम्। करुणात्वञ्च सहृदयतेत्यपरपर्यायः सामान्येन हृदयद्रुतिरूपमूलधर्मविशिष्टसहृदयहृदयानुसारि-संवेदनाविशेषनिष्ठानुभवसाक्षिकजातिविशेषः। ननु शास्त्रीयदृष्ट्या अत्रायमनुयोगो भवितुमर्हति यत्करुणायाः हृदयद्रुतिरूपमूलधर्मविशिष्टत्वे किं मानम्? कारणञ्च तत्र क्रोधोत्साहयोर्कृते चित्तस्य स्फीतीभवनमेव परिलक्ष्यते न तु द्रवीभवनम्। परन्तु अत्र एवं प्रकारकोऽनुयोगो न युक्तः। कथमिति चेदुच्यते– क्रोधोत्साहनिष्ठचित्तस्फीतीभवनस्यापि संवेदनामूलकत्वाद्। परन्तु करुणास्थायिकत्वे स्वीकृते सति करुणरसस्य स्वरूपहानिरेव स्यात्। अतः पक्षोऽयं न युक्तः। अत्र पुनश्चायमप्रश्नो भवितुमर्हति यत्करुणायाः सहृदयताऽर्थकत्वे किं मानम्? तदुत्तरेण वक्तुं पार्यते यदभिनवगुप्तपादाचार्योद्धृतशङ्कुकीयवचनमेवात्र प्रमाणम्। तथाहि उद्धृतमभिनवगुप्तेन– “सहृदयता हि करुणेति लोके प्रसिद्धा। सा लिङ्गैरनुकर्तरि शोकं प्रतियतां सामाजिकानामिति तत्र करुणव्यपदेश इति श्रीशङ्कुकः।”[२६] इति।

रसस्य प्राधान्येन आनन्दमूलकत्वाद् अभिनवगुप्तपादाचार्यीयमतमेव अस्माभिरनुसरणीयम्। तन्नये आनन्दघनचिदेवास्माभिरास्वाद्यते। तथाहि भाषितं तेन– “अस्मन्मते संवेदनमेवानन्दघनमास्वाद्यते। ...केवलं तस्यैव चित्रताकरणे रतिशोकादिवासनाव्यापारः। तदुद्बोधने चाभिनयादिव्यापारः।”[२७] इति। भोजराजेनापि श्रृङ्गारस्वरूपकथनप्रसङ्गेऽनुरूपमेवोक्तम्। वस्तुतो

[२६]नाट्यशास्त्रस्य षष्ठाध्यायेऽभिनवभारत्याम्। पृष्ठाङ्कः– १७१। (सम्पूर्णानन्दसंस्करणम्)

[२७]तत्रैव। पृष्ठाङ्कः– १०१। (सम्पूर्णानन्दसंस्करणम्)

राजाधिराजप्रोक्त-शृङ्गारभट्टपादप्रोक्तशान्तयोर्मध्ये स्वरूपगतः कोऽपि भेदो नास्ति अपि तु स्वरूपसामान्यमस्ति। उत्तरवर्त्यालंकारिकालंकारकौस्तुभकारेणापि आनन्दधर्मपुरस्कारतया रसस्यैकविधत्वं स्वीकृतम्। तन्नये भिन्नता तत्रोपाधिभेदाल्लभ्या। तथाहि निगदितं तेन–

रसस्यानन्दधर्मत्वादेकध्वं भाव एव हि।
उपाधिभेदान्नानात्वं रत्यादय उपाधयः॥ [अलंकारकौस्तुभः– ७१]

अतः शृङ्गारस्य प्रकृतित्वस्वीकारे न कापि हानिः। अत्र पुनश्चायम्प्रश्नो भवितुमर्हति यद्रासानामेकविधत्वं किं भरतसम्मतम्? अन्यथा कथं तेन बहुसंख्यकाः रसा उद्धृताः। तदुत्तरेण वक्तुं शक्यते आम्। अन्यथा कथं तेन स्वग्रन्थे रसभेदकथनात्परं पूर्वाचार्यैरुक्तरसैकत्वविधायकश्लोका आनुवंशश्लोकाकारेणोद्धृताः। एतदुद्धरणमेवात्र प्रमाणं यत्पक्षेऽस्मिन्नाट्याचार्यस्यापि रुचिरस्ति।

स्मृतापि स्मरणमात्रेणैव न पुनः दृष्टैव स्पृष्टैव वा नृणामनुरक्ताणां सर्वेषामेव मनुष्याणां न तु कस्यचिदेकस्यैव, तरुणं तीव्रं प्रचण्डं पौढं वा, आतपं दिवाकरद्योतमन्तस्तापं तत्त्वेन अध्यवसितम् आधिभौतिकादितापत्रयं वा, करुणया नैसर्गिकजीवानुकम्पावशान्निस्स्वार्थभावेन, हरन्ती हरणं कुर्वन्ती न तु जहार हरिष्यति वा, अभङ्गुरतनुत्विषां शाश्वत्प्रभायुक्तानां विद्युतां चपलानां तत्त्वेनाध्यवसितानामाभीरवामभ्रुवां, शतैर्शतसंख्याभाग्भिरनेकैः वलयिता परिमण्डलवती परिवेष्टिता वेष्टिता वा सा, कलिन्दगिरिनन्दिन्याः कलिन्दपर्वतात्सुजातया समुद्भूतायाः यमुनायाः तटे तीरे वृन्दावने विद्यमानान् सुरद्रुमान् कदम्बपादपान् यद्वा तट एव सुरद्रुमः सकलाभिलाषपूरकत्वात् सविलासाधिष्ठानतया तमेव सुरद्रुममालम्बनशीला कापि विलक्षणा कादम्बिनी वर्षोन्मुखमेघमाला तत्त्वेनाध्यवसिता शृङ्गाराधिष्ठातृदेवता कृष्णमूर्तिः, मदीयमतेर्मामकीनबुद्धेः ज्ञानस्य वा चुम्बिनी विषयिणी भवतु। अत्रत्येन णिनिप्रत्ययेण ताच्छिल्यं बोध्यम्। अर्थान्मम ज्ञानविषयिणी भवतु। अर्थान्मम ज्ञानस्यान्यविषयापहरणद्वारा विषयतां भजतु। तेन तैलधारावन्निरवच्छिन्न-चित्सन्ततिर्भक्तिः प्रार्थिता। अथवा मतिरिच्छा, तयाऽन्यविषयविराग-पूर्वकश्रीकृष्णरागस्य प्रार्थना। 'भवतु' इत्यत्र प्रार्थनायां लोट्लकार इति मङ्गलपद्यस्य सामान्यार्थः।

अत्र मुख्यतया व्यतिरेकपोषकं प्रकारषट्कमस्ति। तत्राद्यं स्मृतापीति। अत्र 'स्मृतापि' इत्यनेन प्रसिद्धकादम्बिनीतो व्यतिरेकः प्रदर्शितः। लौकिकी कादम्बिनी तु शिरस ऊर्ध्वं नभसि स्थित्वा वर्षणद्वारा वा बाह्यतापहारिणी भवति, न खलु स्मृता न वा साक्षात्कृता प्रदेशान्तरे तद्दर्शनेऽपि तापाशमनात्। परन्तु अलौकिकी अपूर्वेयं कादम्बिनी तु स्मरणमात्रेणैव न केवलं बाह्यतापमपि तु अन्तस्तापमपि हरति। पुनः लौकिकी तु प्रदेशमात्रवृत्तिस्वभावा। परन्त्वलौकिकीयन्तु सर्वगा।

द्वितीयं तावत् करुणया हरन्तीति। लौकिकी तु बलात् प्रवर्तिता अचेतनस्वभाववत्त्वात्। परन्तु अलौकिकीयं त्वनुग्रहवशात्। एतेनास्या अलौकिक्याः कादम्बिन्याः चेतनवत्त्वा ज्ञापिता। कारणं हि तत्र प्रसिद्धायां तु जडत्वात्करुणागन्धोऽपि नास्ति। लौकिक्याः तु ऋतुविशेषे कार्यकारितावशात् पुनरातपोदयस्य सम्भावना। परन्तु अलौकिकी तु शश्वर्थवर्तमानत्वोपलक्षितत्या सर्वदैव हरणक्रियाविशिष्टेति भावः। येन पुनर्नातपोदयसम्भावना।

तृतीयन्तावदभङ्गुरतनुत्विषां विद्युतां शतैर्बलयितेति। प्रसिद्धा मेघमाला तु जन्मस्थित्यादिषड्भावविकारसहितया एकसंख्यकया द्विसंख्यकया त्रिसंख्यकया वा विद्युता मण्डिता। परन्तु विलक्षणेयन्तु षड्भावविकाररहिताभिः शतसंख्याभाग्भिः अनेकचपलात्वेन अध्यवसिताभिः गोपनितम्बिनीभिः वलयाकारेण शोभिता। अत्र 'वलयिता' इत्यनेन प्रकारेण राशलीलाकाले गोपबधुटीभिर्वलयाकारेण क्रियमाणा नृत्यशोभाऽञ्चिता।

चतुर्थञ्च तावत् कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनीति। प्रसिद्धा तु दूरस्था वियदालम्बनात्मिका। परन्तु विलक्षणेयं तु कलिन्दगिरिनन्दिनी-तटस्थसुरद्रुमालम्बिनी। अथवा सविलासाधिष्ठानपूर्वकसकलाभिलाषपूरकत्वात् तट एव सुरद्रुमः, तमेव सुरद्रुममालम्बनशीला कादम्बिनी। यदि कोऽपि जनोऽत्र एवम्वक्तुमिच्छति यत्तटस्य सुरद्रुमत्वेन कल्पनं न युक्तम्। कथमिति चेदुच्यते– प्रसिद्धायाः कादम्बिन्या अपि पर्वतस्य सानुदेशालम्बनशीलत्वं परिलक्ष्यते एव। यतः पर्वतस्य सानुदेशे या पार्थिवताऽस्ति सा पार्थिवता यमुनातटेऽपि अस्ति एव। अतः प्रकारोऽयम्व्यतिरेकपोषको भवितुं नार्हति। अस्तु तर्ह्यत्र कदम्बपादपपक्ष एव समाश्रयणीयः। पुनः तदपि न युक्तम्। कारणं हि तत्र विलक्षणायाः कादम्बिन्याः पादपाश्रयत्वे स्वीकृते सति संसर्गेण तटाश्रयत्वमपि स्वीकर्तव्यम्। अतः संसर्गेण

पुनः विलक्षणायाः कादम्बिन्याः तटाश्रयत्वे लब्धे पूर्वोक्तरीत्याऽत्रापि पूर्वोक्तदोषः समापतेत्। अत उभयत्रैव दोषदर्शनात्प्रकारस्यास्य व्यतिरेकपोषकत्वेन कथनं न युक्तम्। तत्रेदं वक्तुं शक्यते यदन्तिमा युक्तिः न युक्ता। कथमिति चेदुच्यते– साक्षात्सम्बन्धे लब्धे सम्बन्धान्तरकल्पने मानाभावात्। पुनः प्रागुक्ता युक्तिरपि न युक्ताऽपि तु भ्रान्ता। कारणं हि तत्र ये खलु जनाः प्रसिद्धायाः कादम्बिन्याः पर्वतसानुदेशालम्बनशीलत्वं स्वीकुर्वन्ति ते तु तस्याः स्वरूपमेव न जानन्ति। वस्तुतः प्रसिद्धा कादम्बिनी पर्वतसानुदेशस्पर्शिनी भवति न त्वालम्बिनी। अतः प्रकारस्यास्य व्यतिरेकपोषकत्वेन कथनमुचितं युक्तियुक्तञ्च।

पञ्चमं तावन्मदीयमतिचुम्बिनीति। प्रसिद्धा खलु वियच्चुम्बिनी पर्वतमध्यदेश-चुम्बिनी वा। अत्रत्यस्य चुम्बिनीत्यस्य स्पर्शिनीत्यर्थो न त्वालम्बिनी। अपूर्वेयं तु मतिस्पर्शिनी मतिविषयिणी वा भवति।

षष्ठन्तावत्कापीति। कापि नाम विलक्षणा। पुनः कीदृशं तद्वैलक्षण्यमिति पृच्छायामुच्यते– तच्च स्वसमभिव्याहृतपदार्थताऽवच्छेदकधर्मावच्छिन्नावधिकं वैलक्षण्यम्। स्वंकिंशब्दोत्तरवर्ती अपिशब्दः, तत्समभिव्याहृतः तत्समीपोच्चारितः, पदार्थो विलक्षणकादम्बिनी। तस्य पदार्थस्यावच्छेदकधर्मो विलक्षणकादम्बिनीत्वं, तदवच्छिन्ना विलक्षणकादम्बिनी, तदवधिकं वैलक्षण्यं प्रसिद्धकादम्बिन्यपेक्षया स्वस्मिन् व्यतिरेकः। अत्र किंशब्दोत्तरवर्त्यपिशब्देन स्वजातिमध्ये उत्कर्षत्वमनिर्वचनीयत्वमद्भुतत्वञ्च प्रकाशितमिति मङ्गलपद्यस्य विशेषार्थः।

यदि कोऽपि जनोऽत्रैवम्वक्तुमिच्छति यत् 'स्मृतापि' इत्यत्र भूतकालिक-क्तप्रत्ययेन कादम्बिनीकर्तृकातपहरणस्य स्मरणोत्तरकालिकत्वमेव स्यात्। परन्तु तन्न युक्तमनुत्कर्षधायकत्वात्। अपि त्वत्र "आदि कर्मणि निष्ठा वाच्या"[२८] इत्यनेन वार्तिकबलेन क्रियाया आदिक्षणे क्तप्रत्ययः। पुनः " मदीयेत्यत्र तद्धितप्रत्ययः निरर्थकः, अतः मदन्तरवचुम्बिनीति समीचीनः पाठः प्रतिभाति।"[२९] इति मधुसूदनीकाराः। परन्तु तन्न युक्तम्। कथमिति चेदुच्यते– 'मदीय' इति पाठे मम ग्रन्थकर्तुः मदीयानां चेत्येवमुभयार्थलाभे संगतिः स्यात्। 'नृणाम्' इत्यत्र जन्मिनामित्येव सम्यक्पाठः। एतेन गजगृध्रादीनां ग्रहणाद्भगवत्पक्षे नाव्याप्तिः।

[२८]निष्ठा शिङ् स्विदि मिदि क्ष्विदि धृषः (१/२/१९) इति पाणिनीयसूत्रस्य व्याख्यानावसरे सिद्धान्तकौमुद्याम्। वार्तिकाङ्कः– २०५१। पृष्ठाङ्कः– ४१०।

[२९]रसगङ्गाधरस्य मधुसूदनीटीकायाम्। पृष्ठाङ्कः– ४।

पुनः 'कलिन्दगिरिनन्दिनी' इत्यत्र गिरिस्थाने नगेति सानुप्रासः पाठः इति मङ्गलपद्यस्य पाठसंशोधनम्।

अत्र आतपत्वेन विद्युत्त्वेन कादम्बिनीत्वेन च यथाक्रमेण तापत्रयाणां गोपबधूनां कृष्णमूर्तेश्च निगरणाद्भेदाभेदप्रधाना अध्यावसायात्मिकातिशयोक्तिः। तट एव सुरद्रुम इति पक्षे तु रूपकम्। स्मृतापीत्यत्रेणापिशब्देन दर्शनार्थापादानादर्थापत्तिरलङ्कार इत्येकिनः। परन्तु तन्न युक्तं मानाभावात् उत्कर्षविघाताच्च। अत्र पादचतुष्टयोपात्तप्रकारषट्केन लौकिककादम्बिनीतः अलौकिककादम्बिन्या उत्कर्षद्योतनाद् व्यतिरेकालंकारः। पुनश्च नन्दिनीलम्बिनीचुम्बिनीकादम्बिनीभेदेन चतुर्षु स्थलेषु णिन्युपादानादत्र पदान्तानुप्रासः। वस्तुतोऽत्र व्यतिरेकालंकारो मुख्यः। तेनैव व्यतिरेकेण सह अतिशयोक्तिरूपकादयः सङ्कीर्णाः। व्यतिरेकाणां पुनः व्यतिरेकेण सह अङ्गाङ्गिभावात्सङ्करः। अर्थालंकाराणां शब्दालंकारेण सह एकस्मिन्नेव श्लोकवाक्ये तिलतण्डुलवदवस्थानात् शब्दार्थालंकारयोर्संसृष्टिः। पुनश्चार्थालंकारगतसङ्करेण सह शब्दार्थालंकारगतसंसृष्टेः तिलतण्डुलवदवस्थानात् संसृष्टिः। श्लोकेऽस्मिन् पृथ्वी छन्दः प्रसादो गुणः पाञ्चाली च रीतिरिति इति मङ्गलपद्यस्य छन्दोऽलंकारगुणरीतिनिरूपणम्।

-★-

# रघुवंशमहाकाव्ये इन्द्रादिदेवकृतविष्णुस्तुतौ अद्वैतचिन्तनम्


## सुजितपरामानिकः*


### उपोद्घातः

संस्कृतसाहित्यप्रपञ्चे पञ्चानां काव्यानां महाकाव्यत्वेन परिगणनमस्ति। तेषु पञ्चसु महाकाव्येषु द्वे काव्ये स्तः कविकुलगुरुशिरोमणिकालिदासस्य। स स्वप्रतिभया काव्यद्वयमिदं विरच्य संस्कृतसाहित्यस्य माहात्म्यम् इतोऽपि अवर्धयत। येन कारणेन इदानीमपि संस्कृतसाहित्यस्य उज्ज्वलप्रदीप्तशिखा जाज्वल्यमाना दृश्यते। कविस्तु क्रान्तदर्शी, तस्य कर्म काव्यमित्युच्यते। संस्कृतसाहित्ये तु बहूनि काव्यानि सन्ति, किन्तु सर्वेषां काव्यानां महाकाव्याभिधेयत्वं नास्ति। महाकाव्यमिति अभिधानं श्रुत्वैव तत् काव्यं कियत् उत्कृष्टं, रमणीयम् आनन्ददायकमस्ति, किञ्च रसस्वादकमस्ति तद् ज्ञायते। कालिदासस्य द्वयोः महाकाव्ययोः मध्ये एकं भवति "रघुवंशम्" अपरञ्च "कुमारसम्भवम्" इति। महाकाव्यद्वयमिदं कालिदासस्य विशिष्टप्रतिभायाः परिचायकम्। रघुवंशं महाकाव्यं तस्य अनवद्यकीर्तिः। यत्र सूर्यवंशीयानां राज्ञां कीर्तिः, किञ्च मर्यादापुरुषोत्तमस्य श्रीरामचन्द्रस्य उज्ज्वलजीवनचरित्रं, शौर्यं, वीर्यं, त्यागः, प्रशासनदक्षता इत्येतत् सर्वम् अत्र प्रामुख्येन वर्णितमस्ति। यस्य पठनेन पुरुषस्य मनसि नवीनचिन्तनं किञ्च प्रशान्तिश्चाविर्भवति। ग्रन्थोऽयं कविकुलगुरुणा रामायणम् आश्रित्य विरचितः। अतः स्वाभाविकतया ग्रन्थेऽस्मिन् भगवतो रामचन्द्रस्य जीवनगाथा तु भवेदेव। पुलस्त्यगोत्रात् उत्पन्नो राक्षसनृपो रावणः पितामहस्य ब्रह्मणो वरेण अपराजेयः सन् सर्वान् प्रति अत्याचारं कुर्वन्नासीत्। स इन्द्रादिदेवान्नपि तस्य बलेन युद्धे पराजितवान्। पराजये प्राप्ते सति स्वर्गराज्यात् च्युताः विताडिता देवा रावणस्य विनाशाय वैकुण्ठलोकं विष्णुलोकं जग्मुः। ग्रीष्मकाले अतिसूर्यतापेन सन्तप्ता जनाः यथा शीतलछायासंयुक्तबृक्षच्छायां ऋषन्ति। तद्वत् देवा अपि रावणस्यात्याचारेण ततः पराजयं प्राप्य तेषां दुःखं प्रशमयितुं वैकुण्ठलोकं क्षीरसमुद्रं जग्मुः।

तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम्।

---


*सहायकाचार्यः, संस्कृतविभागे, आरामबागस्थिते नेताजिमहाविद्यालये

अभिजग्मुर्निदाघार्ताश्छायावृक्षमिवाध्वगाः॥ [रघुवंशम् १०/०५]

तत्र ते दिवौकसः भोगिभोगासनासीनं तत्फणामण्डलोदर्चिर्मणिद्योतितं, लक्ष्मीपादसेवमानं, प्रबुद्धपुण्डरीकाक्षं, बालातपनिभां शुकं, प्रारम्भसुखदर्शनं शारदं दिवसमिव विष्णुं ददृशुः। किञ्च देवाः करुणासागरं सर्वविघ्नोपशान्तकं श्रीपतिं माधवं दृष्ट्वा दीनभावेन सर्वभावेन प्रणिपत्य यथाशास्त्रम् अर्थ्याभिः वाग्भिः तं तुष्टुवुः। तैः इन्द्रादिदेवैः सर्वभावेन, पूर्णशरणगत्या अद्वैतभावनया भगवतः श्रीधरस्य परापरब्रह्मभावेन याः स्तुतयः कृताः तदिदानीं व्याख्यातुं प्रयते।

## सृष्टिस्थितिप्रलयकारणत्वेन स्तुतिः

भगवान् विष्णुः जगतः सृष्टिस्थितिप्रलयरूपाणां कारणम्। यतो हि तत एव जगत उत्पत्तिः, तस्मिन्नेव स्थितिः किञ्च तत्रैव प्रलयः "यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व" [तैत्तिरीयोपनिषत् ३/१/३]। एतेषां सर्वेषां स एव परमकारणः। परब्रह्मरूपेण यद्यपि स निर्गुणो निर्विकारस्वरूपस्तथापि सत्त्वादिगुणसंस्पर्शेन स गुणमयः सविकारश्च भवति। गुणसंस्पर्शेन स जायते इव, स्थीयते इव, लीयते इव च। अज्ञानावस्थायां गुणत्त्वात् तस्यापि जन्ममरणञ्च भवति किन्तु यथार्थस्वरूपेण वस्तुतः स अजो नित्यः सत्यस्वरूपो भवति, नास्ति तस्य जननमरणं नास्ति बन्धनं न च मोक्षः। यथाह भगवान् श्रीकृष्णः–

बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः।
गुणस्य मायामूलत्वात् न मे मोक्षो न बन्धनम॥[1] इति।

प्रकृतिं मायामाश्रित्य स परमेश्वरः त्रिगुणेन सर्वं साधयति। तथाह गीतायाम्–

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया॥ [श्रीमद्भगवद्गीता ४/६]

इदं दृश्यमानं जगत् त्रिगुणात्मकं भवति। त्रिगुणात्वात् एव जगतो वैचित्र्यमस्ति। यथा आकाशात् पतितं तोयं भिन्ने भिन्ने स्थाने पतित्वा भिन्नां भिन्नां स्थितिं प्राप्नोति। तद्वत् भगवान् जगत्कारणरूपो विष्णुः स्वरूपतः एकमयो भवति तथापि गुणत्रयसंस्पर्शे भिन्नं भिन्नं रूपं धरति। तदेवाह कविकुलगुरुः महाकाव्यकारः–

रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते।

[1]श्रीमद्भागवतम्– ११/११/१

देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः॥ [रघुवंशम् १०/१७]

यदा स ब्रह्म रजोगुणप्रधानो भवति तदा स चतुर्मुखब्रह्मा इत्याख्यायते। एषो ब्रह्मा त्रिगुणमयमिदं जगत् सृजति। सर्वेषां प्राणिनां स्थावरजङ्गमानां स एव स्रष्टा, सर्वेषाम् आदिपिता, प्रजापतिः, पितामह इत्यप्युच्यते। तत चतुर्मुखादेव विश्वब्रह्माण्डस्य सृष्टिः यदा स सत्त्वगुणप्रधानो भवति तदा स स्थितिस्वरूपो विष्णु इत्याख्यायते। स एव सत्त्वगुणप्रधानो जगतः पालककर्ता। परमेश्वरस्य ब्रह्मणो विष्णुस्वरूपे जगतोऽस्य विश्वब्रह्माण्डस्य स्थितिर्भवति। तत्रैव जगदिदं स्थीयते। किञ्च तमोगुणप्राधान्येन स एव महेश्वरो भवति, यः प्रलयस्वरूपो विनाशस्वरूपः रुद्र इत्याख्यायते। स सृष्टेः विनाशं साधयति। यदा जीवानां कर्मफलाभावात् सृष्टेः आवश्यकता न भवति तदा स परमपुरुषः रुद्रात्मना नामरूपात्मकां एतां सृष्टिं नाशयति। एवं देवाः विष्णुं त्रेधा सृष्टिस्थितिसंहारकर्तृत्वेन स्थित आत्मा स्वरूपं यस्य तस्मै ब्रह्मविष्णुहरस्वरूपं प्रणमन्ति। तदेव ऊचुः देवाः–

नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधा स्थितात्मने॥ [रघुवंशम् १०/१७]

## परस्परविरुद्धधर्मत्वेन स्तुतिः

देवाः स्तवेन भगवतो विष्णोः अमोघस्वरूपस्य माहात्म्यं वर्णयन्ति। यद्यपि कीर्तनेन तस्य माहात्म्यम् अन्तं न याति। भगवान् अनन्तस्वरूपः अतस्तस्य माहात्म्यमपि अनन्तं भवति। ते देवाः विष्णुं स्तुवन्ति यत् हे प्रभो भवान् अमेयस्वरूपः। लोकैरियत्तया भवान् न परिच्छिद्यते, परिच्छन्नो न भवति। किञ्च स अमितो भवति कयापि परिधिना तस्य परिच्छेदो न भवति। स सर्वव्यापी, सर्वमावृत्य तिष्ठति विभुश्च भवति "नारायण एवेदगं सर्वम्। यद्भूतं यच्च भव्यम्" [नारायणोपनिषत्– ३]। षडैश्वर्येण स पूर्णस्वरूपोऽस्ति किञ्च विभूतिनापि पूर्णोऽस्ति। तस्य सकाशे यत् प्रार्थ्यते तत् सर्वं प्राप्यते अतः स प्रार्थनावह इत्युच्यते। पुरुषैः सर्वं जेतुं शक्यते किन्तु जयशीलो विष्णुः केनापि जेतुं न शक्यते। अतः स्तुत्या देवाः कथयन्ति यत् भवान् अजितो जयशीलः। स परब्रह्म यदा सृष्टेः प्राग्वस्थायां बीजरूपेण केवलं कारणात्मना तिष्ठति, एवञ्च नामरूपाभ्यां न व्याकरोति तदा स अव्यक्त इत्युच्यते। यदा पुरुषाणां कर्मफलं पक्वावस्थां प्राप्नोति तदा तस्य सृष्टेः काम उद्भासते, तस्मिन् समये स स्वाव्यक्तात्मानं व्याकरोति। तदा सर्वं व्यक्तरूपेण प्रतिभासते। स यथा अव्यक्तस्वरूपस्तथा व्यक्तस्वरूपोऽपि।

तस्मिन् काले तस्य सर्वम् अव्यक्तस्वरूपं नामरूपाभ्यां व्याकृतं वाग्मनसोः गोचरं भवति। एवं तस्य परमेश्वरस्य व्यक्ताव्यक्तस्वरूपमुभयमपि वेदादिशास्त्रे दृश्यते। तदेव स्तुवन्ति देवाः–

अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः।
अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम्॥ [रघुवंशम् १०/१७]

एष ईशनशीलो विष्णुः सर्वेषां अन्तरे किञ्च बहिरपि तिष्ठति "अन्तर्वहिश्च तत्सर्वं व्याप्यो नारायणः स्थितः" [महानारायणोपनिषत् १०३]। स विष्णुः अन्तरमनुप्रविश्य सर्वं नियमयति, सर्वस्य संयमनं करोति स अन्तर्यामीत्यर्थः। स एषो व्याप्यात्मा विष्णुः हृद्देशे तिष्ठति चेदपि मूढेन, मोहग्रस्थेन तन्न ज्ञायते अविद्यया मलिनग्रस्थत्वात् तेषाम् अपरोक्षगम्यं न भवति जन्मशतकोटैरपि।अतस्तेषाम् अविद्याग्रस्थानां मूढानां सकाशे स दूरस्थो भवति। किन्तु विदुषां विवेकिनां धीरानां सकाशे स अन्तस्थो भवति "सूक्ष्मत्वादविज्ञेयं दूरस्थं चान्तिके च तत्" [श्रीमद्भगवद्गीता १३/१५]। अपि च देवा ब्रुवन्ति यत् हे श्रीपते भवान् कामनारहितोऽकाम आत्मस्थ आत्मरतिश्च भवति आप्तकामत्वात पूर्णत्वात्। आत्मनैव तस्य आत्मा पूर्णोऽस्ति। पूर्णस्वरूपात्मनः पूर्णं स्वीक्रियते चेत् पूर्णमेव स्थीयते। कारणं हि सर्वत्र तु आत्मैवास्ति। परमात्मनो विष्णोः आप्तकामत्वात्स्वात्मना आत्मपूर्णत्वात्कस्मिन्नपि कार्ये तस्य प्रयोजनं न नास्ति। तथाहि–

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्यैव च सन्तुष्टस्तस्य कार्यं न विद्यते॥

अविद्यामलिनग्रस्थपुरुषो यथा कामनाभावात् सकामो भवति स तु तथा न भवति। यस्तु अपूर्णः मन्यते, सकामस्तस्यैव कामनादिनिमित्तं अविद्याग्रस्थजन्ममरणसंसारभोगो, वारं वारं योनिषु परिभ्रमणमिति। यद्यपि भगवतः कर्तव्यतया किमपि कार्यं न विद्यते तथापि स लोकसंग्रहाय लोककल्याणाय दुःखपरिहाराय च कार्यं करोतीव च दृश्यते। अतो दयालुः, करुणास्वरूपः, करुणासिन्धु इत्युच्यते। यो निष्कामः स कथं तपः कुरुते इति विरोधः। परिहारस्तु ऋषिरूपेण दुस्तरं तपस्तप्यते। पुरुषः कश्चित् दुःखग्रस्थं पुरुषं दृष्ट्वा दुःखेन तं प्रति दयालुः भवति। किन्तु अयन्तु यद्यपि दयालुस्तथापि दुःखस्पर्शेन रहितोऽस्ति, अनघस्पृष्टोऽस्ति नित्यानन्दस्वरूपत्वात्। किञ्च स नारायण

आदिपुरुषः, पुराणोऽस्ति तथापि अजरो निर्विकारत्वात् अक्षरत्वात्। स सदा वार्धक्यरहितः सन् अजरो नवीनपुरुष इव प्रतिभाति। यद्वस्तु विकारग्रस्थं भवति तस्यैव अस्तीत्यादिषड्भावविकाराः परिलक्ष्यन्ते अस्य तु निर्विकारत्वात् अस्मिन् षड्भावविकाराः प्रतिषिध्यन्ते। एवं परस्परविरुद्धगुणस्वरूपेण इन्द्रादिदेवैः विष्णोः स्तुतिः कृता। तदेव महाकविः कविकुलगुरुः विलिखति यत्–

हृदयस्थमनासन्नमकामं त्वां तपस्विनम्।
दयालुमनघस्पृष्टं पुराणमजरं विदुः॥ [रघुवंशम् १०/१७]

यद्यपि स त्रिकालातीतस्तथापि तस्य सर्वमधिगम्यमस्ति, त्रिकाले यद्यद्भवति तत् सर्वं तेन विज्ञायते किञ्चिदपि तस्य अविज्ञातं नास्ति स सर्वज्ञस्त्रिकालदर्शी। श्रुतौ अपि तत् समाम्नायते– "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः" [मुण्डकोपनिषत् १/१/९] इति। किन्तु स तु अविज्ञातो, केनचित् न ज्ञायते इत्यर्थः। किन्तु यः पूर्णशरणगत्या सर्वात्मानं तस्मै समर्पयति तेन तु स विज्ञातो भवति– "यमेवैष वृणुते तेन लभ्यः तस्मैष आत्मा विवृणुते तनूं स्वाम्" [कठोपनिषत् १/२/२३]। स योनिः कारणरूपः, तस्मादेव सर्वस्य प्रभवः सृष्टिः विजायते "अहं हि सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते" [श्रीमद्भगवद्गीता १०/८]। किन्तु तस्य किञ्चिदपि कारणं नास्ति। स तु आत्मन एव भवति अतः स आत्मभूः स्वयम्भू इत्याख्यायते। स्वयमेव भवतीति स्वयम्भूः "येषामुपरि भवति यश्चोपरि भवति स सर्वः स्वयमेव भवतीति स्वयम्भूः"[२]। सर्वस्य कारणत्वात् स सर्वेषां ईशिता, ईशनशीलः, ईश्वरः प्रभुरित्यर्थः। परन्तु स केनापि ईशितो न भवति अतोऽनीश इत्याख्यायते। स तु सर्वात्मना सर्वत्र वर्तते तद्विना किमपि नास्ति किमपि कल्पयितुं न शक्यते। स स्वयमेव वक्ति–

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा॥ [श्रीमद्भगवद्गीता ७/७]

अपि च श्रुतौ अपि– "ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्" [ ईशोपनिषत् १]। तदेव देवाः अपि स्तुवन्ति यत्–

सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक्॥ [रघुवंशम् १०/२०]

---

[२]शाङ्करभाष्यम् ईशोपनिषत् ८ पृष्टम् २८।

यद्यपि भगवान् निःस्पृहो निश्चेष्टः तथापि लोककल्याणाय दुष्कृतजनान् हन्ति स चेष्टते इत्यर्थः। कालेन बद्धजनानां निद्रा जागृतिश्च भवति न तु कालातीतस्य। भगवान् विष्णुस्तु कालातीतः। अतस्तस्य जागृतिः निद्रा न भवेत्। किन्तु देवाः स्तुवन्ति यत् हे भगवन् भवान् नित्यप्रबुद्धोऽपि प्रलयकाले योगनिद्रां गच्छति। एतादृशस्य विरुद्धस्वभावयुक्तस्य भगवतो यथार्थवास्तिविकता वस्तुस्वरूपं केन ज्ञातुं शक्यते। भगवतो विष्णोः बहवोऽवताराः सञ्जाताः। तेषाम् अवताराणाम् उद्देश्यमपि भिन्नं भिन्नमासीत्। तेषाम् अवताराणां वैशिष्ट्यमत्र देवाः स्तुत्या कथयन्ति यद्भवान् कृष्णादिरूपेण शब्दादिविषयान् भुक्तवान्। किञ्च नरनारायणादिरूपेण दुश्चरं तपः आचरितम्। प्रजासंरक्षणाय दैत्यं मर्दितवान्। औदासीन्येन ताटस्थेन वर्तितुं च पर्याप्तः समर्थोऽस्ति भगवान्नेव। तथा भोगतपसोः पालनौदासीन्ययोश्च परस्परविरुद्धयोः आचरणे सोऽन्यः कः समर्थोऽस्ति। परमात्मनः परस्परविरुद्धसंयुक्तस्तुतिः केवलं स्वकल्पनया कालिदासेन न विरचिता। तस्य प्रमाणं श्रुतौ स्मृतौ चाप्युपलभ्यते। तद्यथा- "अणोरणीयान्महतो महिमान्" [कठोपनिषत् १/२/२०], "अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्" [कठोपनिषत् १/२/२२]। तथा च स्मृतौ अपि–

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च॥ [श्रीमद्भगवद्गीता १३/१४]

कविकुलगुरुः तथा विरचयति–

शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः।
पर्याप्तोऽसि प्रजा पातुमौदासीन्येन वर्तितुम्॥ [रघुवंशम् १०/२५]

## विभूतिस्वरूपेण स्तुतिः

इदानीं देवाः भगवन्तं पद्मनाभं विभूतिस्वरूपत्वेन स्तुवन्ति। कारणं जगति यत् दृश्यते तत् सर्वं तस्य विभूतिस्वरूपं तस्य तेजोंऽशभूतम्–

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोऽशंसम्भवम्॥ [श्रीमद्भगवद्गीता १०/४१]

स एव वेदानां सामवेदोऽस्ति, सप्त सामवेदस्वरूपाः रथन्तरबृहद्रथन्तर-वामदेववैरूप्यपावमान्यवैराजचान्द्रमसाः इति सप्तविधाः साममन्त्राः प्रसिद्धाः सन्ति। एतैः सप्तभिः साममन्त्रैः तस्यैव भगवतः स्तुतिः क्रियते। समुद्राः सप्त भवन्ति। सप्तानामर्णवानां जलं सप्तार्णवजलम्। तत्र शेते यः स

सप्तार्णवजलेशयो विष्णुरित्यर्थः। सप्तसु समुद्रेषु भगवान् नारायणः शेते, "लवणक्षीरदध्याज्यसुरेक्षुस्वादुवास्य" [अभिधानचिन्तामणिः ४/१४१] सप्त समुद्रा इति। किञ्च अग्नेरपि सप्त वक्त्राणि प्रसिद्धानि सन्ति यथा–

कराली धूमिनी श्वेता लोहिता नीललोहिता।
सुवर्णा पद्मरागा च सप्त जिह्वा विभावसोः॥ [वाचस्पत्याभिधानम्]

देवाः श्रीपतिं ब्रुवन्ति यत् भवान्नेव वह्नेः सप्त मुखस्वरूपाः। सप्तार्चिः सप्त मुखास्तस्यैव भवन्ति अग्निमुखा वै देवाः इति श्रुतेः। किञ्च भूर्भुवःस्वरादीनां सप्तानां लोकानाम् आश्रयः आधारः स एव भवति। स सर्वमावृत्य तिष्ठति। अतः सुराः विष्णुः स्तुवन्ति–

सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम्।
सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम्॥ [रघुवंशम् १०/२१]

इदानीं देवाः सप्तनामनन्तरं समष्टिचतुर्णां कारणत्वे तं नारायण स्तुवन्ति। शास्त्रे चत्वारः पुरुषार्थाः प्रसिद्धाः सन्ति तद्यथा धर्मार्थकाममोक्षाः। एते पुरुषार्थास्तस्मादेव आदिपुरुषात् नारायणात् सम्भूताः। चतुर्युगाः कृतत्रेताद्वापरकलय इति चत्वारि युगानि शास्त्रे उल्लेखितानि। एतानि चत्वारि युगानि तस्मादेव नारायणात् सम्भूतानि। एते कालपरिमापकाः एतैः चतुर्भिः युगैः कालस्य परिमापो भवति। अविद्यावस्थायां तु कालस्य परिमापो भवति न तु विद्यायाम्। देवाः कथयन्ति यत् हे प्रभो भवान् कालस्वरूपः किञ्च कालस्याधिष्ठाता "कालः कलयतामहं" [श्रीमद्भगवद्गीता १०/३०] इत्यादिस्मृतेः। स तु कालेन बद्धो न भवति। कालः तस्य वशेऽस्ति। कालेन सर्वमिदं जगत् तिष्ठति, तत्रैव लीयते। ब्राह्मणादिः चत्वारो वर्णाः तत एव सम्भूताः "चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः" [श्रीमद्भगवद्गीता ४/१३]। ब्राह्मणादिवर्णा भगवतः विराड्पुरुषात् सम्भूताः इति वेदेऽपि तत् समाम्नायते–

ब्राह्मणोऽस्य मुखमासीद्बाहु राजन्यः कृतः।
ऊरु तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥ [पुरुषसूक्तम् १२]

देवाः ब्रुवन्ति यत् हे माधव भवान्नेव चतुर्मुख ब्रह्मा "नारायणाद् ब्रह्मा जायते" [नारायणोपनिषत् २]। भगवतः नारायणस्य एव सत्स्वरूपसत्ता सर्वत्र विराजते। तस्मात् एव चतुर्मुखात् सर्वेषां सृष्टिः प्रादुर्भूताः। विश्वब्रह्माण्डे सर्वेषां सृष्टित्वेन स एव परमकारणस्वरूपः। तस्यैव विभूतिः सर्वत्र सर्वस्वरूपेण दृश्यते। स यथा

अनन्तस्वरूपः तस्य तथा विभूतिरप्यनन्ता तत्तु स्वयमेव कथयति–

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया॥ [श्रीमद्भगवद्गीता १०/४१]

योगिनां साधनत्वेन मनः सहायकं भवति। आधिक्येन कुकर्मवशेन मनः स्वभावतया चञ्चलं भवति। भगवान् कल्याणमयः, प्रकाशस्वरूपो वासुदेवः सर्वेषां हृदिः तिष्ठति "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति" [श्रीमद्भगवद्गीता १८/६१]। हृदि स्थितस्य परमात्मनो ध्यानेन चञ्चलं मनः एकाग्रं भवति। तस्यैव भगवतः पुनः पुनो नामजपेन मनः शान्तं किञ्च ऐकाग्र्यं भवति। एवं शान्तग्रस्तेन मनसा क्रमागतसाधनेन पुरुषो मोक्षस्य सन्निकटं गच्छति। यतो हि मनो भगवतो वासुदेवस्य विभूतिस्वरूपं भवति "इन्द्रियाणां मनश्चास्मि"[श्रीमद्भगवद्गीता १०/२२] "चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत" [पुरुषसूक्तम् १३]। एवं क्रमागतः वासुदेवस्य मननाभ्यासेन किञ्च वैराग्येन मनः निगृहीतं भवति "अभ्यासवैराग्याभ्यां तन्निरोधः" [योगसूत्रम् १/१२]। अतोऽभ्यासनिगृहीतेन मनसा योगिनः हृदयाश्रितं ज्योतिर्मयम् अद्वैतमयं, नारायणं सततं विचिन्वन्ति। तेन मनसो वृत्तय उद्गच्छन्ति। मनसा शनैः शनैः अद्वैतस्वरूपस्य एकमेवाद्वितीयस्य चिन्तनेन पुरुषोऽद्वैतभावं परमशान्तिञ्च प्राप्नोति। तदेव स्तुवन्ति सुराः–

अभ्यासनिगृहीतेन मनसा हृदयाश्रयम्।
ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये॥ [रघुवंशम् १०/२३]

## अनन्तमाहात्म्यत्वेन स्तुतिः

इदानीं देवा परमाराध्यास्य भगवतो वासुदेवस्य माहात्म्यस्य अन्तं नास्ति तद् ऋचा कथयन्ति यत् हे पद्मनाभ भवतो माहात्म्यं, कृपा, जीवनं, दिव्यचरित्र्यम् इत्येतत् सर्वं स्तुतिभ्योऽपि व्यतिरिच्यते। उदधेः रत्नानीव, विवस्ततः तेजांसि इव दूरं सीमारहितम् अमितं भवति भगवतो जीवनचरित्र्यं किञ्च माहात्म्यमिति। दूराण्यवाङ्मनसोः गोचराणि भगवतः चरितानि स्तुतिमपि अतिक्रम्य गच्छन्ति। स्वाभाविकतया भगवतो माहात्म्यं, जीवनचरित्र्यं, वैभवमित्येतत् सर्वम् अनतिक्रमं तदमितं तस्येयत्ता नास्ति। अतः तद्वाचा स्तोतुं प्रकाशयितुं वा न शक्यते इत्यर्थः। भगवान् यथा अनन्तस्वरूपस्तस्य जीवनचरित्रं, वैभवं सर्वमपि अनन्तम्। तदेव देवाः ऊचुः–

उदधेरिव रत्नानि तेजांसीव विवस्वतः।

स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते॥ [रघुवंशम् १०/३०]

देवा विष्णोः स्तुत्यादिना महिमानं कीर्तयन्ति, कारणं हि कीर्तिमान् पुरुषः स एव भवति। अतः कीर्तमतः पुरुषस्य कीर्तनेन शुभं शिवञ्च भवतीति नास्ति तत्र सन्देहस्यावकाशः। भगवतः विष्णोः स्मरणमात्रमेव बाह्याभ्यन्तरतया पुरुषः पावनत्वं लभते "यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः" इति। विष्णोः पादात् प्रसूता गङ्गा एतावती यदि पावनमयी भवति तर्हि तस्य नामग्रहणेन कीर्तनेन च पुरुषः पवित्रो भवतीति तत्र किमु वक्तव्यम्। किञ्च पुरुषः विष्णोः स्मरणेन यदि पवित्रो भवति तर्हि तस्य दर्शनस्पर्शनवन्दनपादसेवनैः पुरुषस्य कियत् फलं भवति तदवधारयितुं न शक्यते। पुरुषस्तस्य प्रसादेन तामेव अच्युतं परमसाध्यमोक्षत्वेन प्राप्नोतीति निःसंशयेन वक्तुं शक्यते। कारणं स एव परमब्रह्म सच्चिदानन्दः परमात्मा। तदेव स्तुवन्ति देवाः–

केवलं स्मरणेनैव पुनासि पुरुषं यतः।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि॥ [रघुवंशम् १०/२९]

विष्लृ व्याप्तौ इति धातोः यद्व्याप्ततया सर्वदा अस्ति स एव विष्णुः इति विष्णुशब्दस्य वाच्यार्थः। द्यावापृथिव्यौ, अन्तरिक्षं, सर्वा दिशः तेनैव परिव्याप्ताः सन्ति "द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः" [श्रीमद्भगवद्गीता ११/२०]। विश्वब्रह्माण्डे यत्किञ्चित्किमपि नास्ति यत् तेन प्राप्तं नास्ति। तस्य तु आप्तकामस्य सर्वम् आत्मनैव आत्मा पूर्णोऽस्ति। अविद्याग्रस्थस्य पुरुषस्य अभावत्वं सिध्यति न तु विद्याग्रस्थस्य पुरुषस्य। स तु नित्यो नारायण आदिविराड्पुरुषः "पुरुषाकारत्वात् पूर्णं वानेन प्राणबुद्ध्यात्मना जगत्समस्तमिति पुरुषः"[३]। तस्य तु जन्ममरणं किञ्च किमपि कर्तव्यं कर्म इत्येषां लेशकारणमात्रमपि न विद्यते "न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन" [श्रीमद्भगवद्गीता ०३/२२]। तथापि लोककल्याणाय, लोकानुग्रहाय च तस्य जन्मकर्म भवति। अज्ञानदृष्ट्या कर्तृकारकादिबोधतया यद्यपि तस्य जन्म कर्म चास्ति तथापि पारमार्थिकदृष्ट्या तस्य किमपि कर्तव्यं नास्ति। स तु सर्वदा निर्विकारः, क्रियाकारकादिरहितः पुरुषः। तस्य महिमा आजीवनं कीर्त्यते चेत् तस्य पारं न याति "यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह" [तैत्तिरीयोपनिषत् २/४/१] वाक् तस्य माहात्म्यकीर्तनेन अशक्त्या श्रमेण च निरुद्धा भवति न तु तस्य गुणानामियत्तया। कारणं हि तस्य

[३]ईशोपनिषदः शाङ्करभाष्यम् १६ पृष्टम् ४१।

गुणोऽनन्तोऽस्ति। गुणानाम् आनन्त्यात् तस्य कीर्तनेनापि तदन्तं न गच्छति। तथा लिखति पुष्पदन्ताचार्यः–

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति"॥ [शिवमहिम्नस्तोत्रम् ३२]

तदेव स्तुवन्ति सुराः अपि–

महिमानं यदुकीर्त्य तव संह्रियते वचः।
श्रमेण तदशक्त्या वा न गुणानामियत्तया॥ [रघुवंशम् १०/३१]

## परमसाध्यत्वेन स्तुतिः

शास्त्रम् अनन्तम् किञ्च अनन्तञ्चास्ति मतम्। किन्तु अनन्तशास्त्राणाम्, अनन्तमतानां मूलसारभाग एकमेवाद्वितीयः परब्रह्मरूपो विष्णुरेव गम्योऽस्ति। आगमादिशास्त्रं, वेदादिशास्त्रं नाना गत्या रीत्या च पुरुषार्थं प्रतिपादयति चेदपि पुरुषार्थसिद्धेः भिन्ना भिन्नाः साधनमार्गाः अन्ततो गत्या परमात्मनि विष्णौ एव पर्यवस्यति, स्थितिञ्च प्राप्नुवन्ति। कारणं हि आत्मैवास्ति तद्विहाय किमपि नास्ति, ब्रह्मैवास्ति, आत्मैवास्ति इत्यादिश्रुतेः।स आत्मस्वरूपो विष्णुरेव भवति। अतो नाना गत्या रीत्या चात्मा आत्मन्येव पर्यावतिष्ठते। यथा हिमालयात् प्रवाहमाना गङ्गा भिन्ना भिन्ना नदी च नाना गत्या भिन्नया भिन्नया रीत्या प्रवहन्ति चेदपि अन्ततो गत्या ता सर्वाः नद्यः समुद्रं प्रविशन्ति। एवमेव साधवो, मुनयो, विद्वांसो, मुमुक्षवः भिन्नेन भिन्नेन मार्गेन गच्छन्ति चेदपि तेषां सर्वेषां लक्ष्यस्थलं भवति परब्रह्म एकमेवाद्वितीयो भगवान् नारायणः। ते सर्वे विष्णवाख्यं परमात्मानं वासुदेवं प्राप्नुवन्ति। यथा च आम्नायते–

यथा नद्यः स्यन्दमानाः समुद्रेऽ
स्तं गच्छति नामरूपे विहाय।
तथा विद्वान् नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैति दिव्यम्"॥ [मुण्डकोपनिषत् ३/२/८]
येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्॥ [श्रीमद्भगवद्गीता १३/१४]

देवाः स्तुवन्ति एतेषां सर्वेषां परमं कारणं परमसिद्धिहेतुश्च भवति भगवान्

विष्णुः। तदेव कालिदासोऽपि विलिखति–

बहुधाऽप्यागमैर्भिन्ना पन्थानः सिद्धिहेतवः।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे॥ [रघुवंशम् १०/२६]

सर्वेषां परमगतिः भवति भगवान् विष्णुः। येषां चित्तं पूर्णरूपेण सततं भगवति निविष्टमस्ति। येषां पुरुषाणां परमाध्यदेवो भगवान् वासुदेवो, येषां चित्तं सर्वदा अनन्यतया भगवन्तमेव स्मरति भजति च किञ्च सर्वकर्म भगवति समर्पयति तेषां वीतरागाणां मोक्षाय अभूयः सन्निवृत्तयेऽपुनरावृत्तये भगवान् विष्णुरेव परमगतिः, परमसाधनस्वरूपः। विष्णुं प्राप्यं जीवाः सर्वानर्थमूलकां महामायाग्रस्थाविद्यां च्छिन्वन्ति, जन्ममरणचक्रे पुनो नावर्तन्ते "त्वमेव विदित्वातिमृत्युमेति। नान्यः पन्था विद्यतेऽयनाय" [श्वेताश्वतरोपनिषत् ३/८] इति श्रुतेः। "यद्गत्वा न निवर्तन्ते तद्धाम परमं मम" [श्रीमद्भगवद्गीता १५/०६] इत्यादिस्मृतेश्च। अपि च देवाः प्रशंसन्ति यत् भगवतो विष्णोः महिमाद्यैश्वर्यं सीमारहितमस्ति, अपरिच्छेद्यमस्ति ऐश्वर्येण स सदा पूर्णरूपेण विद्यमानोऽस्ति। एवञ्च स परमपुरुषः आप्तवाग्वेदः "यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुतेः। अनुमानं क्षित्यादिकं सकर्तृकं कार्यत्वाद्घटवदित्यादिकं ताभ्यां साध्यं गम्यं भवन्तं प्रति का कथा प्रत्यक्षमपि भवत्कृतं जगतपरिच्छेद्यम्। तत्कारणमप्रत्यक्षस्त्वमपरिच्छेद्य इति किमु वक्तव्यमित्यर्थः। तथा हि–

प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव।
आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा॥ [रघुवंशम् १०/२८]

देवा विष्णोः स्तुत्यादिना महिमानं कीर्तयन्ति, कारणं हि कीर्तिमान् पुरुषः स एव भवति। अतः कीर्तमतः पुरुषस्य कीर्तनेन शुभं शिवञ्च भवतीति नास्ति तत्र सन्देहस्यावकाशः। भगवतः विष्णोः स्मरणमात्रमेव बाह्याभ्यन्तरतया पुरुषः पावनत्वं लभते "यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः" इति। विष्णोः पादात् प्रसूता गङ्गा एतावती यदि पावनमयी भवति तर्हि तस्य नामग्रहणेन कीर्तनेन च पुरुषः पवित्रो भवतीति तत्र किमु वक्तव्यम्। किञ्च पुरुषः विष्णोः स्मरणेन यदि पवित्रो भवति तर्हि तस्य दर्शनस्पर्शनवन्दनपादसेवनैः पुरुषस्य कियत् फलं भवति तदवधारयितुं न शक्यते। पुरुषस्तस्य प्रसादेन तामेव अच्युतं परमसाध्यमोक्षत्वेन प्राप्नोतीति निःसंशयेन वक्तुं शक्यते। कारणं स एव परमब्रह्म सच्चिदानन्दः परमात्मा। तदेव स्तुवन्ति देवाः–

केवलं स्मरणेनैव पुनासि पुरुषं यतः।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि॥ [रघुवंशम् १०/२९]

एवं परमपुरुषस्य पुरुषोत्तमस्य विष्णोः नाना माहात्म्यकीर्तनेन तस्य दिव्यजीवनचरित्रकीर्तनेन देवाः तं प्रसादयामासुः। स्तुत्या सर्वे प्रसीदन्ति। देवानां विष्णुं प्रति ताः स्तुतयो मन्त्राः केवलं स्तुतिपरका नासन्। अपि च देवानां सर्वाः ऋचः परमपुरुषोत्तमस्य भगवतो विष्णोः सत्यार्थस्य कथनमासीत्। सत्यार्थस्य कथने पुरुषस्य साधनं सिध्यति न तु अनृतभाषणेन। अतः सत्यभूतेन स्तवेन देवाः विष्णुं प्रसादयामासुः। स तु सत्यस्वरूपः, सर्वदा सत्यतत्त्वे प्रतिष्ठितः। तदेवोच्यते श्रीमद्भागवतकारेण–

सत्यव्रतं सत्यपरं त्रिसत्यं
सत्यस्य योनिं निहितञ्च सत्ये।
सत्यस्य सत्यमृतसत्यनेत्रं
सत्यात्मकं त्वां शरणं प्रपन्नाः॥ इति। [श्रीमद्भागवतम् १०/२/२६]

## उपसंहृतिः

यद्यपि जगति बहु किमप्यस्ति किन्तु सर्वे श्रेष्ठाः वरिष्ठाः न भवन्ति। तस्मात् सर्वेषां स्तुतिरपि न क्रियते। यः श्रेष्ठो वरिष्ठः सर्वोत्तमस्तस्यैव स्तुतिः क्रियते तदेव यथोपयुक्तम्। अस्मिन् रघुवंशकाव्ये दृश्यते यत् इन्द्रादिदेवाः दुराचारिरावणस्यात्याचारेण पीडिताः सन्तः वैकुण्ठलोके, विष्णुलोके भगवतो विष्णोः सकाशं जग्मुः। कारणं भगवान् विष्णुः सर्वश्रेष्ठो वरिष्ठः, पुरुषोत्तमः, कल्याणकर्ता, सर्वस्याः समस्यायाः समाधानकर्ता। अतो देवास्तत्र गत्वा सर्वभावेन तं शरणं गतवन्तः। पिडीताः देवाः प्रथमं तत्र गत्वा भगवन्तं विष्णुं प्रणम्य अर्थ्याभिः वाग्भिः तं स्तुतवन्तः। कारणं हि स एव स्तव्यः स्तवप्रियः "स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः" [विष्णुसहस्रनामस्तोत्रम् ८६]। देवाः सर्वभावेन तस्य अमोघोज्ज्वलजीवनचरित्रं माहात्म्यञ्च अतिभक्तिभावेन कीर्तितवन्तो यदासीत् सत्यभूतम्। देवैः विष्णोः या स्तुतिः कृता तत् सर्वं सम्यक्तया परिशील्यते चेत् तासु स्तुतिषु अद्वैतभावः स्फुटतया अवगम्यते। एकमेवाद्वितीयस्य पुरुषस्य स्तुतिः तु अद्वैतपरकी एव भवतीति नास्ति तत्र संशयस्यावकाशः। अत्र यथा भगवतो वासुदेवस्य परब्रह्मत्वेन स्तुतिः समुपलभ्यते तद्वत् अपरब्रह्मत्वेनापि। यथा नदीनां बहवो अम्बुवेगाः समुद्रमेवाभिद्रवन्ति। तथैव सर्वासां भावानां मन्त्राणां

स्तुतीनां तात्पर्यम् अद्वैतमयं भवति। यद्यपि स परमपुरुषोत्तमोऽज्ञानभावनायां सातिशयः, साकारो भवति तथापि तदेव तस्य यथार्थस्वरूपं न भवति। तत्तु अनृतं, मिथ्याभूतं कल्पितरूपम्। यथार्थस्वरूपत्वेन स तु निरतिशयो, निराकारो, निरञ्जनः, अनन्तो, नित्यो, बुद्धो, निर्विकल्पकः, शान्तः, शिवः एकमेवाद्वितीयः, परमानन्दस्वरूपः "निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः। न द्वितीयोऽस्ति कश्चित्" [नारायणोपनिषत् ३]।

-★-

# अलङ्कारसर्जनवैचित्र्ये न्यायवैशेषिकसम्मतस्य कार्यकारणभावस्य उपयोगः

सोनालीमुखोपाध्याया*

## नैयायिकवैशेषिकाणां कार्यकारणभावः

कार्यकारणभावस्य महान् प्रभावो विद्यते जगति। कार्यकारणमयं जगत्। अत्र कारणं विना कार्यं नोत्पद्यते। कार्ये स्थिते कारणमवश्यमेव किञ्चिद् विद्यते। जगति साफल्यलाभाय कार्यकारणभावस्य विवेचनमवश्यमेव करणीयम्। अन्यथा कार्यसिद्धिः न भविष्यति। साफल्यं सर्वे इच्छन्ति। साफल्यलाभाय च यथोचितकारणस्यानुष्ठानम् अवश्यकम्। अतो दार्शनिकाः कार्यकारणभावस्य आलोचनं कृतवन्तः। एतेषां दार्शनिकानां मध्ये नैयायिक-वैशेषिका अन्यतमाः। न्यायवैशेषिकसम्मते तर्कसंग्रहग्रन्थे भाषापरिच्छेदग्रन्थे च कार्यकारणभावस्यास्य आलोचनमेवं कृतम्।

तर्कसंग्रहकारोऽन्नंभट्टः कारणलक्षणप्रसङ्गे कथयति– "कार्यनियतपूर्ववृत्ति कारणम्।"[१] इति। यद् वस्तु नियमितभावेन कार्योत्पत्तेः प्राक् विद्यते तत् कारणपदवाच्यम्। लक्षणेऽस्मिन् प्रयुक्तानं पदानामुपयोगः व्याख्यातः अन्नंभट्टेन तर्कदीपिकायाम्। लक्षणे 'नियत'पदस्याभावे रासभादौ घटादिकार्यकारणलक्षणस्य अतिव्याप्तिः स्यात्। कार्ये कारणलक्षणस्य अतिव्याप्तिनिवारणार्थं पूर्ववृत्ति इति विशेषणं प्रयुक्तम्। वस्तुतो हि कार्यस्यास्तित्वं तत् पूर्ववर्तिकारणनिर्भरम्। कारणं पूर्वक्षणवृत्ति, कार्यञ्च परक्षणभावि। कारणलक्षणे अन्यथासिद्धिशून्यत्वमपि अभिप्रेतम्। तेन लक्षणे अनन्यथासिद्धशून्यत्वे सति इति पदद्वयं प्रदेयम्। तदुक्तं तर्कदीपिकायाम्– एवं "चान्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वम्।"[२] इति।

कारणमिदं त्रिविधम्। अन्नं भट्टेननोक्तम्– "कारणं त्रिविधम्– समवाय्यसमवायिनिमित्त भेदात्।"[३] इति।

---

*सहायकाचार्या, संस्कृतविभागे, झाडग्रामराजमहाविद्यालये

[१]तर्कसंग्रहः पृ. २९३

[२]तत्रैव

[३]तत्रैव, पृ. ३०२

कारणलक्षणविषये भाषापरिच्छेदकारस्य विश्वनाथस्य वक्तव्यमप्यनुरूपमेव। विश्वनाथकृतं कारणस्य लक्षणं यथा–

अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता।
कारणत्वं भवेत् तस्य त्रैविध्यं परिकीर्तितम्॥ [भाषापरिच्छेदः– १६]

अतोऽवगम्यते, यद्वस्तु अन्यथासिद्धिशून्यं कार्यस्य नियतपूर्ववर्ति, तदेव कारणम्। अतः कार्यलक्षणमाह अन्नंभट्टः– "कार्यं प्रागभावप्रतियोगि।"[४] इति।

प्रागभावस्य प्रतियोगि कार्यम् यस्य पदार्थस्याभावः सूच्यते तत्पदार्थः अभावस्य प्रतियोगीत्युच्यते। यस्य उत्पत्त्या प्रागभावोऽपसृतः स्यात् तद्वस्तु प्रागभावस्य प्रतियोगि कार्यं वा। अतः कार्यकारणभावविषये अन्नंभट्टविश्वनाथयोर्मतयोः सादृश्यं वर्तते।

## कार्यकारणभावानुप्राणिता अलङ्काराः

नैयायिक-वैशेषिकाणां इममेव कार्यकारणभावमवलम्ब्य आलङ्कारिकैः अलङ्काराः विनिर्मिताः। अलङ्कारप्रकारोऽनन्तः भामह-दण्डि-वामन-मम्मट-विश्वनाथ-जगन्नाथादिभिरालङ्कारिकैः बहवोऽलङ्कारा निरूपिताः। तेषामलङ्काराणां केचिदौपम्यमूलाः केचिद्वा वास्तवमूलाः केचिद्वा कार्यकारणभावानुप्राणिताः। एतेषां प्रकाराणां मध्ये अन्तिमप्रकारा यथा– विभावना, विशेषोक्तिः, अर्थान्तरन्यासः, काव्यलिङ्गम्, समुच्चयः, अनुमानम्, कारणमाला, अन्योन्यम्, असङ्गतिः, समाधिः, विषमः, विशेषः, अतिशयोक्तिः (पञ्चमविभागः), अप्रस्तुतप्रशंसा (तृतीय-चतुर्थविभागौ), उत्प्रेक्षा (हेतूत्प्रेक्षा) इत्यादयः।

एतेनावगम्यते यत् न स्वल्पसंख्यका, अपि तु बहवोऽलङ्काराः सार्विकभावेन आंशिकभावेन वा कार्यकारणभावानुप्राणिताः।

## अलङ्कारनिरूपणे कार्यकारणभावस्य महत्त्वम्

अधुना प्रश्नः समुदेति यत् किमर्थं कथं वा अनेन न्याय-वैशेषिकदर्शन-प्रतिपादितेन कार्यकारणभावेनालङ्कारशास्त्रकाराः काव्यप्रबन्धकर्त्तारश्च प्रभाविता अभवन्? तत्र विभावनायां कारणं विना कार्योत्पत्तिः, विशेषोक्तौ सति कारणे कार्याभावः, अर्थान्तरन्यासे कारणेन कार्यस्य कार्येण वा कारणस्य समर्थनं, काव्यलिङ्गं तावत् काव्याभिमतं लिङ्गं कारणं वा, समुच्चये कार्यस्य

[४] तर्कसंग्रहः पृ. २९३

एकस्मिन् कारणे सत्यपि कारणान्तराणि वर्तन्ते, अनुमाने साध्यसाधनभावः, कारणमालायां पूर्वपूर्वपदार्थस्य हेतुता, अन्योऽन्यस्मिन् परस्परजनकत्वम्, कार्यकारणयोभिन्नदेशतायामसङ्गतिः, समाधौ हेत्वन्तरयोगेन कार्यं सुकरम्, विषमे कार्यकारणभूतयोर्गुणयोर्विरोधः, विशेषे एककार्यप्रचेष्टायामितरकार्यस्य दैवात् सम्पादनमेवमन्यत्रापि।

अत्रेदं सम्प्रधार्य्यम्। प्रश्नस्यास्य समाधानाय अलङ्कारशास्त्रस्याग्रगतेः क्रमविवर्त्तनं लक्षणीयम्। किञ्च अलङ्कारशास्त्रकाराणामुपरि दार्शनिकानां दर्शनग्रन्थानां वा प्रभावोऽप्यनुसरणीयमस्माभिः। शास्त्रपरिसरे दृश्यते इदं यत् शास्त्राणामेकमपरेण प्रभावितम्। शास्त्राणामीदृशः पारस्पारिकप्रभाव आलङ्कारिकैः स्वीकृतः। तदुक्तं भरतेन–

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
न स योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते॥[५] इति।

एतस्माद् ज्ञायते यत् शिल्पं शास्त्रं वा विज्ञानं कला वा सर्वमेव काव्ये आलोचितं भवितुमर्हति। तस्मादेव काव्ये शास्त्रप्रभावः। भामेनाप्युक्तम्–

न स शब्दो न तद्वाच्यं न स न्यायो न सा कला।
जायते यन्न काव्याङ्गमहो भारो महान् कवेः॥ [काव्यालङ्कारः ५/४]

भामहेनात्र व्याकरण-न्यायकलादीनां काव्याङ्गभूतत्वेनैव सार्थकत्वमुक्तम्। उक्तञ्च तेनैव काव्याङ्गभूतं काव्यमिश्रितं वा शास्त्रमतिकठिनमपि पाठकाः सादरं गृह्णन्ति मधुमिश्रितकटुभेषजवत्। तथा हि–

स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुञ्जते।
प्रथमालीढमधवः पिवन्ति कटु भेषजम्॥ [काव्यालङ्कारः ५/३]

रुद्रटोऽप्येवमाह–

न भवति यत् काव्याङ्गं सर्वज्ञत्वं ततोऽन्यैषा।[६] इति।

भारतीयानां प्रथमं साहित्यं हि वैदिकसाहित्यम्। वैदिकसाहित्ये अलङ्काराणां प्रयोगे सत्यपि समयेऽस्मिन् किञ्चिदलङ्कारशास्त्रं न लभ्यते। खृष्टीयतृतीयशताब्दीस्थितं भरतविरचितं नाट्यशास्त्रमेव प्रथमं पुस्तकमलङ्कार-शास्त्ररूपम्। नाट्यशास्त्रेऽस्मिन् चत्वार एवालङ्काराः स्वीकृताः–

---

[५]नाट्यशास्त्रम् १/११६

[६]रुद्रटकाव्यालङ्कारः १/१९

उपमा रूपकञ्चैव दीपकं यमकं तथा।
काव्यस्यैते ह्यलङ्काराश्चत्वारः परिकीर्तिताः॥ [नाट्यशास्त्रम् १६/४१]

अतो नाट्यशास्त्रे कार्यकारणभावानुप्राणितानाम् अलङ्काराणामुल्लेखो न दृश्यते। भामहविरचिते काव्यालङ्कारे एव कार्यकारमभावमूलकानाम् अलङ्काराणां हेतुविशेषोक्तिविभावनादीनामुल्लेखो दृश्यते। भामहस्य कालः खृष्टीयषष्ठशतकं सप्तमशतकं वा। अस्मादेव समयादारभ्य भारतवर्षस्य शिक्षाक्षेत्रे दर्शनग्रन्थानां विरचनमालोचनं वा प्रभूतरूपेण जातम्। अस्मादेव कालादारभ्य कतिपयशतकं व्याप्य गौडपादः, कुमारिलः, प्रभाकरः, मण्डनमिश्रः, शङ्कराचार्य्यः, भर्त्तृहरिः, जयन्तभट्टः, वाचस्पतिमिश्रः इत्येतेषां दार्शनिकप्रवराणाम् आविर्भावः सञ्जातः। तेषां ग्रन्थानामपि प्रभावः शिक्षाक्षेत्रे समाज्जीवने च प्रतिफलितोऽभवत्।

आलङ्कारिका अपि तेषां ग्रन्थेषु दर्शनप्रतिपादितानां तत्त्वानामन्तर्भावं कृतवन्तः। दार्शनिका अपि काव्यतत्त्वविषये तेषां मतं प्रकाशितवन्तः। यथा– नैयायिकप्रवरेण जयन्तभट्टेन आनन्दवर्धनप्रतिपादितस्य ध्वनितत्त्वस्य विषये मतं प्रकाशितम्। एवं पारस्पारिकप्रभावादुभयमपि शास्त्रं समृद्धं जातम्। अतोऽलङ्कारशास्त्रे न्यायवैशेषिकसम्मतस्य कार्यकारणभावस्य प्रभावः परिलक्ष्यते। तत्प्रभावादलङ्कारा अपि निरूपिताः।

पुनरिदं सम्प्रधार्यम्। न केवलम् अलङ्कारशास्त्रे काव्येऽपि दर्शनस्य प्रभावोऽस्मादेव समयादारभ्याधिकपरिमाणेन जातः। तथा च कालिदासोत्तर-कालिकं महाकाव्यमधिकपरिमाणेन शास्त्रप्रभावितम्। भारवि-भट्टि-कुमारदास-माघ-श्रीहर्षाः कालिदासोत्तरकालिका महाकवयः।[७] तैः विरचितेषु महाकाव्येषु व्याकरण-न्याय-वोशेषिक-सांख्य-मीमांसा-वेदान्तादीनां शास्त्राणां विषयानां समावेशो दृश्यते। केषाञ्चिन्मते ईदृशानां काव्यानां काव्यशास्त्राणां विषयानां समावेशो दृश्यते। केषाञ्चिन्मते ईदृशानां काव्यानां काव्यशास्त्रमित्याख्या। तदुक्तं क्षेमेन्द्रविरचिते सुवृत्ततिलके–

भट्टिभौमककाव्यादि काव्यशास्त्रं प्रचक्ष्यते।[८] इति।

एतानि महाकाव्यानि क्वचित् क्वचित् व्याख्यागम्यान्यपि सञ्जातानि। ईदृशं

---

[७]भारविः– ६३४ खृष्टाब्दः, भट्टिः– षष्ठशतकशेषार्द्धः, कुमारदासः– अष्टमशतकशेषार्द्धः, माघः– सप्तम-अष्टमशतकम्, श्रीहर्षः– द्वादशशतकम्

[८]सुवृत्तितिलकम् ३/४

व्याख्यागम्यत्वं तेषामभिप्रेतमेव। तदुक्तं भामहेन–

काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत्।
उत्सवः सुधियामेव हन्त दुर्मेधसो हताः॥ [काव्यालङ्कारः २/२०]

भट्टिनाप्युक्तम्–

व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम्।
हता दुर्मेधसश्चास्मिन् विद्वत्प्रियतया मया॥ [भाट्टिकाव्यम्– २२/३४]

श्रीहर्षेणाप्यनुरूपं मतं प्रकाशितम्।

यथा वा भवतु व्याकरणन्यायादिदर्शनप्रतिपादितानां तत्त्वानां समावेशो महाकवीनामभीप्सित एव। सहृदयमनःप्रीतये तैरेवम् आचरितमिति।

अलङ्कारशास्त्रसमृद्धये अलङ्कारशास्त्रकारैरपि विविधशास्त्रसमावेशः कृतः। अस्य समर्थनमपि तेषां ग्रन्थादुपलभ्यते. काव्यनिर्माणस्य हेतुरूपेणालङ्कारिकैः प्रतिभा– व्युत्पत्तिरभ्यासा स्वीकृताः। तेषु व्युत्पत्तिस्तावत् शास्त्रज्ञानम्। यद्यपि भामहेन प्रतिभाया एव काव्यकारणत्वं स्वीकृतम्– काव्यं तु जायते जातु कस्यचित् प्रतिभावतः इत्युक्तेः, तथापि काव्यरचनायां प्रवृत्तानां विविधशास्त्रानुशीलनं तेनोपदिष्टम्–

शब्दश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः।
लोको युक्तिः कलाश्चेति मनव्या काव्यवैखरी॥ [काव्यालङ्कारः १/९]

दण्डिनापि व्युत्पत्तेः श्रुतस्य वा काव्यकारणत्वमङ्गीकृतम्। तदुक्तं तेन–

नैसर्गिकी च प्रतिभा श्रुतञ्च बहुनिर्मलम्।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः॥ [काव्यादर्शः १/१०३]

रुद्रटेन शक्त्यादित्रितयमेव कारणरूपेण स्वीकृतम्। तदुक्तं तेन–

त्रितयमिदं व्याप्रियते शक्तिव्युत्पत्तिरभ्यासः।[१] इति।

तत्र व्युत्पत्तिविषये तेनोक्तम्–

छन्दोव्याकरणकलालोकस्थितिपदार्थविज्ञानात्।
युक्तायुक्तविवेको व्युत्पत्तिरियं समासेन॥ [रुद्रटकाव्यालङ्कारः १/१८]

वामनेन त्रीणि काव्याङ्गानि स्वीकृतानि। तानि च लोको विद्या प्रकीर्णञ्च। तेषां विद्यैव कविव्युत्पत्तिमूला। वामनेन विद्यापरिगणनं कृतम्–

---

[१]रुद्रटकाव्यालङ्कारः १/१४

शब्दस्मृत्यभिधानकोशच्छन्दोविचितिकलाकामशास्त्रदण्डनीतिपूर्वा विद्याः।[१०] इति।

मम्मटेनापि काव्यकरणे व्युत्पत्तेरुपयोगः स्वीकृतः। तस्माद् दृश्यते यदालङ्कारिकैः काव्ये शास्त्रनिवेशोऽङ्गीकृतः। एतदर्थमेव काव्ये काव्यशास्त्रे वा व्याकरण-न्याय-वेदान्तादिदर्शनानामुपस्थापनं दृश्यते। आलङ्कारिका अपि व्याकरण-न्यायादि दर्शनविषयमूलान् अलङ्कारान् निरूपितवन्तः। अतो भामहादारभ्य जगन्नाथपर्यन्तानामालङ्कारिकाणां ग्रन्थेषु हेतु-विशेषोक्ति-विभावादीनां कार्यकारण-भावमूलानाम् अलङ्काराणां पर्यालोचनं समुपलभ्यते, अलङ्कारनिरूपणे च कार्यकारणभावस्योपयोगः सम्यक् दृश्यते।

[१०]काव्यालङ्कारसूत्रवृत्तिः १/३/३

# षट्सु संस्कृतरूपकेषु आत्मत्यागस्य विमर्शनम्

## पालोपाद्दा शम्पा*

'अतति सर्वं प्राप्नोति व्याप्नोति' वेति विग्रहाद् अततेः मनिन्प्रत्यये निष्पन्नोऽयमात्मशब्दः। यौगिकार्थत्वेन लभ्यमिदं सर्वगतत्वं सर्वव्यापित्वं वा मूलमात्मतत्त्वम्। अयञ्चात्मा नित्य-शुद्ध-बुद्ध-मुक्तस्वभावकः। शरीरव्यतिरिक्ता कापि सत्ता विद्यते, या पुरुषशब्देनाभिहिता। सांख्यदर्शने आत्मा हि पुरुषः। अयञ्च पुरुषः चैतन्यस्वरूपः कूटस्थो नित्यो निर्लेपश्चेति। निरुक्ते पुरुषस्य व्युत्पत्तिः निगदिता– 'पुरिषयो भवति, परिषादो भवति वेति'। त्यागशब्दस्यार्थो नाशः। अर्थाद् आत्मनाशः। ननु आत्मनो नित्यत्वात्कथं नाशो भवेदिति चेदुच्यते प्रत्येकं पदार्थस्य अहंबोधस्यैव त्यागो ह्यात्मत्यागः। अर्थाद् अहमित्याकारेण बुद्धेर्नाशो हि आत्मत्यागः। अहमिति शब्दस्यार्थः स्वार्थत्वमिति। अत्रात्मत्यागो नाम स्वार्थत्यागः। अर्थात्परहिताय स्वस्वार्थस्य त्यागः। परार्थे आत्मनिवेदनमपि आत्मत्यागः। परमत्र आत्मस्वार्थं परित्यज्य 'बहुजनहिताय बहुजनसुखाय' च जीवनमुत्सृज्यत इत्यर्थो बोध्यः। आत्मत्यागस्त्रिविधः—

क) शारीरिकात्मत्यागः
ख) आध्यात्मिकः
ग) रूपकधर्मी चेति।

शारीरिकस्यात्मत्यागस्योदाहरणं तावत् रामायणे जटायोः रावणहस्ताज्जनकनन्दिन्याः सीतायाः रक्षायै स्वजीवनस्योत्सर्जनम्। आध्यात्मिकस्तावद् आत्मत्यागः खलु परमपुरुषप्राप्तये एषणात्रयस्य त्यागः। रूपकधर्मी आत्मत्यागो हि देवतायै द्रव्यनिवेदनमेव। यज्ञे त्याग एव मूलम्।

न केवलं रामायण-महाभारत-पुराणादिसाहित्ये, चापि लौकिकसंस्कृकरूपकेषु आत्मत्यागस्य बहूनि उदाहरणानि विलसन्ति। सुविशालं रूपकसाहित्यं निर्मथ्य 'बिन्दौ सिन्धुदर्शनमिव' स्थालीपुलाकन्यायेन भासस्य 'स्वप्नवासवदत्तम्', 'मध्यमव्यायोगः', 'कर्णभारमि'ति च रूपकत्रितये, कालिदासस्य 'विक्रमोर्वशीयम्', 'मालविकाग्निमित्रमि'ति रूपकद्वितये तथा च श्रीहर्षस्य

---

*शोधविद्यार्थिनी, संस्कृतविभागे, पश्चिमवङ्गराज्यविश्वविद्यालयीया

नागानन्दमित्यत्र आत्मत्यागस्य दृष्टान्तान् विश्लिष्येह शोधबन्धे समीक्षणं विहितं मया।

## भासीये मध्यमव्यायोगे मध्यमपुत्रयोरात्मत्यागः

संस्कृतसाहित्यस्य बहुप्रशंसितो नाट्यकृद्धि महाकविर्भासः। तेन त्रयोदश नाटकेषु विरचितेषु महाभारतस्य पात्रादिकमवलम्ब्य मध्यमव्यायोगोऽन्यतमः। नाटकीयकथावस्तु सम्पूर्णतया नाट्यकारस्य कल्पितम्। अस्मिन् रूपके मातृ-पितृ-भ्रातृणां तथा च ब्राह्मणस्य मध्यमपुत्रस्य रक्षायै यथाक्रमं ब्राह्मणपुत्रभीमयोरात्मसमर्पणम् उपवर्णितम्।

मध्यमव्यायोगस्य मुख्यं चरित्रं तावद्भीमः। पञ्चपाण्डवेषु मध्यमो हि सः। स मध्यमपाण्डवत्वेन जगति प्रसिद्धः। यः शरणागताय स्वेच्छया जीवनमुत्सर्गीकरोति, तस्य तुलना नास्ति। विपदापन्नो ब्राह्मणः केशवदासो यदा श्रुतवान् अकुस्थलं निकषा पाण्डवानामाश्रमे भ्रातृचतुष्टयस्यानुपस्थितौ आश्रमरक्षायै भीमो नियुक्त आसीत्, तदा स किञ्चिदाशान्वितो जातः।

उपवासिन्या मातुः हिडिम्बाया उपवासनिसर्गार्थं वनप्रदेशे कश्चिन्मनुष्योऽपेक्षितो वर्तते। तथाहि घटोत्कचेनोक्तम्–

अस्ति मे तत्रभवती जननी। तयाहमाज्ञप्तः। पुत्र ममोपवासनिसर्गार्थम् अस्मिन् वनप्रदेशे कश्चिन्मानुष्यः प्रतिहृत्यानेतव्यः। ततो मयासादितो भवान्।

पत्न्या चारित्रशालिन्या द्विपुत्रो मोक्षमिच्छसि।
बलाबलं परिज्ञाय पुत्रमेकं विसर्जय॥ इति।

त्रिषु पुत्रेषु ज्येष्ठः पितुः प्रियतम इति कृत्वा तथा च कनिष्ठो मातुः प्रियतम इति पितरौ पुत्रद्वयं न परित्यक्तुम् इष्टवन्तौ। तदा मध्यमपुत्रो दुःखेनात्मानं हिडिम्बायाः आहारार्थम् उत्सर्गीकृत्याह–

धन्योऽस्मि यत् गुरुप्राणाः स्वैः प्राणैः परिरक्षिताः।
बन्धुस्नेहाद्धि महतः कायस्नेहस्तु दुर्लभः॥ इति।

तावता घटोत्कचस्य गम्भीरकण्ठस्वरं श्रुत्वा मध्यमपुत्रो भीमस्तत्र समागतः। ब्राह्मणमुखात् सर्वं वृत्तजातं निशाम्य घटोत्कचं निग्राहयितुं समुद्यतोऽभवद् भीमः। तथा च घटोत्कचायादिष्टवान् स ब्राह्मणपुत्रस्य निर्मोचनाय। कथाप्रसङ्गेन भीमोऽयं हि तस्यैव पुत्र इति ज्ञात्वा तृप्तोऽपि ब्राह्मणं प्रति अन्याय्यमाचरणं दृष्ट्वा दुःखमपि प्राप्तवान्। बहुधानुरोधात्परं तस्य मातृभक्तिं दृष्ट्वा भीमः ब्राह्मणस्य मध्यमपुत्रं

परिवर्त्यात्मानं समर्पितवान् घटोत्कचाय। तस्यायमात्मत्यागः अतुलनीयः। शरणागतरक्षणं हि क्षत्रियकुलधर्मः। तथाहि भीमेनोक्तम्, "आर्य! मा मैवम्। क्षत्रियकुलोत्पन्नोऽहम्। पूज्यतमाः खलु ब्राह्मणाः। तस्माच्छरीरेण ब्राह्मणशरीरं विनिमातुमिच्छामि।"

अत्र भीमसेनस्य आत्मत्यागः कीदृश इति विचारिते अयं शारीरिको रूपकधर्मी च त्याग इति कथयितुं युज्यते। स्वशरीरस्य त्यागेनायं शारीरिकः त्यागः सन्नपि वर्णाश्रमधर्मरक्षार्थं कृतः आत्मत्यागः यज्ञे कृतेन त्यागेन तुल्यताम् आवहति इति न काचित् संशीतिः।

मध्यमस्य पुत्रस्य त्यागः तु आध्यात्मिक एव त्यागः। स्वस्य विषये पित्रोः भ्रात्रोः च गूढम् अनादरं विलोक्य जगतः अनित्यताम् अभ्युपगतवान् अयम्। प्रसवकर्त्री माता, जन्मदाता च पिता अपि स्वशरीररक्षायै प्रियपुत्रयो रक्षायै च तम् एव बलिम् अकुरुताम् इति जानता तेन आत्मनस्तु कामाय सर्वं प्रियं भवति इति औपनिषद्या वाचः सारं समनुगृह्णन् नश्वरं शरीरं तन्निबन्धनं सम्बन्धजातं च तितिक्षुः राक्षसोदरपूरणाय स्वम् उत्ससर्ज इति आध्यात्मिक एवायं त्यागः।

## कर्णभारमिति रूपके कर्णस्यात्मत्यागः

महाभारतस्य पूर्वापरवृत्तजातम् एकसूत्रेण संयोज्य भासेन नाट्यमिदं विरचितम्। नाट्यस्यास्य नायकः अवश्यमेव कर्णः। दानशीलतायां सोऽप्रतिद्वन्द्वी।

स्वभावदीप्त्या कर्णो भास्वरः। स हि महावीरः। शौर्येण सोऽग्रगण्यः, समरेऽपि दुर्जयः। आदर्शो नृपो हि सः। 'प्रजापालनमात्रवुध्या हतेषु देहेषु गुणा धरन्ते' इति वाक्यांशमात्रे तस्य राजादर्शः समुद्भासितः। ब्राह्मणं प्रति तस्याकुण्ठश्रद्धा दृश्यते नाट्येऽस्मिन्।

आदर्शदानवीरो हि सः। अङ्गराजस्य सिंहासनमलङ्कृत्य ब्राह्मणरूपिणे इन्द्राय धीरधारावर्षि पवित्रञ्च गोसहस्रं, वाजिनां बहुसहस्रं, वारणानामनेकवृन्दं, पृथिवीम्, अग्निष्टोमफलं, स्वमस्तकञ्च सपदि दातुमैच्छत्। यदा स ब्राह्मणेन किमपि पार्थिवं वस्तु नेतुम् ऐच्छत्तदा कर्णः सहजातकवचकुण्डलं प्रददौ–

अङ्गैः सहैव जनितं मम देहरक्षा
देवासुरैरपि न भेद्यमिदं सहास्त्रैः।
देयं तथापि कवचं सह कुण्डलाभ्यां
प्रीत्या मया भगवते रुचितं यदि स्यात्॥ इति।

प्रार्थिनः प्रार्थनां पूरयितुं स सदा प्रस्तुतः आत्मत्यागे। ब्राह्मणस्य कवचकुण्डलप्रार्थनं कृष्णाभिप्रायमिति जानन्नपि शैलेन भूयो भूयो वारितोऽपि च युद्धयात्रायाः मूलं सर्वापेक्षया प्रयोजनीयं कवचकुण्डलं ब्राह्मणवेशिने इन्द्राय समर्पितवान् कर्णः। तन्मते 'हुतं च दत्तञ्च तथैव तिष्ठति' इति। दानस्य मर्यादारक्षायै निर्द्विधं कवचकुण्डलं प्रदाय कर्णः परोक्षतया स्वजीवनम् एवोत्सर्गीकृतवान्।

अयं च त्यागः शारीरिकः एव। स्वशरीरांशभूतं कवचकुण्डलं शरीरस्य रक्षाकवचभूतं ददत् स स्वशरीरम् एव वस्तुतः तुच्छीकृतवान्। महाभारते तु वर्णनम् इत्थं लभ्यते यत्, कवचकुण्डलदानेन स्वशरीरस्य अविकारम्, अमोघम् एकघ्नम् अस्त्रं च प्राप्स्यति इति इन्द्रेण प्रतिज्ञाप्य एव कर्णः कवचकुण्डलं प्रदत्तवान्। अतः तद्दृष्ट्या तद् दानपदवाच्यतां गच्छेद् उत विनिमय एव स भवति इति विचारणीयं विद्वद्भिः। कर्णभारनाटके तु अमुम् अंशम् अनादृत्य भासेन केवलं कर्णस्य दानम् एव प्रमुखतया प्रदर्शितम् इति अत्र अयं त्याग एव।

## स्वप्नवासवदत्तमिति रूपके वासवदत्ताया आत्मत्यागः

भासो हि चरित्रचित्रणे कुशलः शिल्पी। तेन स्वप्नवासवदत्तमिति नाटके यथा नायिकात्वेन वासवदत्ताचरित्रम् आलिखितं, तथैव वासवदत्तायाः सपत्नी पद्मावत्यपि अनुरूपगुणसम्पन्नप्रतिनायिकारूपेण चित्रिता। भासस्य पद्मावती वासवदत्ता चेति नायिकाद्वितयं स्वस्ववैशिष्ट्येन प्रोज्ज्वलमपि वासवदत्ता स्वार्थराहित्यादीनां गुणानां माहात्म्येन पद्मावतीम् अप्यतिशेते।

पद्मावतीव वासवदत्तापि अभिजाता सुन्दरी गुणशालिनी चासीत्। तत्र वासवदत्ता उज्जयिन्याः राज्ञः प्रद्योतस्य कन्या तथा च वत्सराजस्योदयनस्य प्रियतमा पत्नी। अपरतः पद्मावती मगधराजस्य दर्शकस्य भगिनी तथा च भविष्यद्वक्तुर्गणनानुसारं सा उदयनस्य द्वितीया पत्नी भवेत्। परं वासवादत्तायाः स्वामिप्रेमातुलनीयम्।

वासवदत्ता हि नाटकस्यास्य प्रधाना नायिका, नाट्यकारस्य मानसप्रतिमा करुणतायाः मूर्तविग्रहरूपा चेति। सा च सर्वत्यागिनी। प्रथमयौवने उदयनार्थं पितरं मातरञ्च त्यक्तवती सा। उदयनस्य हिताय वासवदत्तया य आत्मत्यागो विहितः तेनैव तस्या उदयनप्रीत्याः परा काष्ठा प्रमाणिता। परमुदयनस्य हृदयराज्यस्यैकच्छत्राधिष्ठात्री अभवदिति सत्यं किन्तु यौगन्धरायणस्य परिकल्पनां सफलीकर्तुं स्वामिनः मङ्गलाकङ्क्षायै सा तमेव कियत्कालाय परित्यज्याज्ञातवासं

गतवती। राजसुखं परित्यज्य सा साधारणं जीवनं यापयन्ती सा महान्तं क्लेशं सेहे। उदयनस्तस्याः प्राणानाम् अपेक्षया प्रियतरः। वासवदत्तायाः वितथमृत्युवार्तां श्रुत्वा उदयनस्य शोकातुरामवस्थां विज्ञाय तस्या मनः दुःखेन सम्भिन्नं जातम्।

वासवदत्ता स्वभावेन संयता। स्वामिनस्त्यागस्तत्कृते कष्टाय कल्पतेऽपि स्वामिनो भविष्यन्मङ्गलाय सा संयमेन धैर्येण सर्वाणि कष्टानि सहते स्म। स्वार्थत्यागस्य महिम्नि, धैर्यस्य दृढतायाञ्च तस्य चरित्रं देवीत्वपर्यायमुत्तीर्यापि नाट्यकृता तस्या मानवीयरूपमत्र रोचिष्णुतया चित्रितम्। उदयनेन सह पद्मावत्याः विवाहसंवादं श्रुत्वा सास्थिराभवत्– 'अहो अत्याहितम्। आर्यपुत्रोऽपि नाम परकीयः संवृत्तः' इति। मगधराजस्यानुरोधादेव उदयनः पद्मावतीमुद्वहतीति ज्ञात्वा सा किञ्चिच्चिन्तामुक्ताभूत्। परं कथमपि सात्महननचिन्तां कुर्वती नासीत्। यतः "न खल्वहं प्राणान् परित्यजामि। आर्यपुत्रं पश्यामीति एतेन मनोरथेन जीवामि मन्दभागा" इति। पतिहिताय स्वहस्तेन पत्युर्दारान्तरपरिग्रहं व्यवस्थाप्य ललनासंसदि विरलम् आत्मत्यागदृष्टान्तम् उपस्थाप्य सा खलु पातिव्रत्यस्य चरमायां परीक्षायामुत्तीर्णा। असाधारणधैर्येण दुःखानि बहिर्न प्रकाश्य पद्मावत्याः विवाहार्थं कौतुकमालिकां गुम्फति स्म वासवदत्ता। परं सा सकृदेव विधातुरनुयोगं कृत्वा स्वदुःखं व्यक्तीकरोति, 'अहो अकरुणा खल्वीश्वराः' इति।

यथा रात्रिसद्भावे एव दिनस्य महिमावगम्यते, तद्वत् स्वसमानेन तुलितो भवति चेत् कोऽपि तस्य चरितमाहात्म्यं भवति अधिकभास्वरतया स्फुटम्। स्वप्नवासवदत्तमिति रूपके वासवदत्तायाः गाम्भीर्यं, धैर्यं स्वार्थत्यागिनी मूर्तिः भासेनासाधारणनैपुण्येन चित्रिता। स्वार्थं पतिञ्च निःस्वार्थतया पद्मावत्याः हस्ते समर्प्य राजनीत्या यूपकाष्ठे वासवदत्ता आत्मानं बलिरूपेण उत्सृष्टवती।

मनुष्यचरित्रस्य विविधानि मुखानि भवन्ति। वासवदत्ता राजकन्यका, राज्ञः पट्टमहिषी च। सा वैयक्तिकजीवने पत्युः प्राणप्रिया पत्नी सती अपि सामाजिकजीवने राज्यस्य राज्ञी। राज्यस्य सर्वासां प्रजानां सा जननीस्वरूपा। यदि उदयनः विरहकातरः राज्ये विमुखः स्यात् तर्हि दारुणा अराजकता सर्वाः प्रजाः क्लेशयेत् इति विचिन्त्य उदयनस्य राज्ये मतिप्रतिवर्तनाय यौगन्धरायणेन या योजना कृता तस्याः योजनायाः लक्ष्यम् आसीत् समष्टिकल्याणम्। समष्टिकल्याणाय व्यष्टेः वलिदानं महत्तरस्य जीवनस्य परिचायकम्। वासवदत्ता तादृशं महत्तरं चरित्रं धत्ते। उदयनः नायकः सन्नपि सहृदयानां निन्दाभाक् एव भवति। पद्मावती प्रियम् उदयनं

प्राप्यापि कृपापात्रमेव जायते समेषाम्। वासवदत्ता क्षणिकं दुःखं सहमानापि जगति चिरभास्वरा पूज्यतां गता। लोककल्याणाय सीतारामाभ्यां कृतेन त्यागेन तुल्योऽयं वासवदत्तायास्त्यागः चिराय प्रेरयतितमां प्रपञ्चे मनुजान्। त्यागोऽयमाध्यात्मिकः। त्यागस्यास्य लोककल्याणसाधनेन आचन्द्रसूर्यं यशः एव सुमहत्फलम्।

## विक्रमोर्वशीयमिति रूपके औशीनर्य्या आत्मत्यागः

नाट्यप्रयोजनसिद्धये कालिदासेन स्वकल्पनामाहात्म्येन उर्वश्यास्तथा च औशीनर्य्याश्चरित्रं समुपस्थापितम्। तत्र औशीनरी हि निवृत्तेः कल्याणमयी मूर्तिः। परम् उवर्शी प्रवृत्तेः प्रतिमूर्तिः भोगसर्वस्वा च। औशीनरी काशीराजकन्या तथा च राज्ञः पुरुरवसः प्रेमास्पदं महादेवी। रूपगुणौदार्यादिभिः सत्यमेव सा राजमहिषी। उर्वशीं प्रति पुरुरवसः अनुरागं विदित्वा सा मानसिकव्यथया जर्जरितापि मौनम् आश्रितवती प्राथम्येन। राज्ञः प्रणयवृत्तान्तस्य याथार्थ्यं विचारयितुं सख्या निपुणिकया समं सा प्रमोदोद्यानं गत्वा लतागृहं निकषा उपतस्थौ। तत्र राजानमुद्दिश्य रचितम् उर्वश्या प्रेमपत्रं तद्धस्तगतमभूत्। विदूषकस्य माणवकस्यासतर्कतावशाद् अपहृतं प्रेमपत्रमिदं यदि राजमहिषी प्राप्नुयादिति विभाव्य यदा राजा शङ्कितोऽतिष्ठत्, तदा सहसा औशीनरी स्वयमेव प्रेमपत्रम् इदम् आदाय पुरुरवसे प्रदत्तवती। सा पुनः राजानमाह, 'आर्यपुत्र अलमावेगेन। तत्तद्भूर्जपत्रम्' इति। रहस्यभेदभयात् पुरुरवा तस्याः प्रसन्नतां सम्पादयितुं चेष्टितवान् बहुधा। परं राज्ञः सर्वम् अनुनयम् उपेक्ष्य सदर्पं सक्रोधं च सा उक्तवती, 'नास्ति भवतोऽपराधः। अत्राहमेवापराद्धा या प्रतिकूलदर्शना भूत्वा अग्रतस्ते तिष्ठामि।' तस्या व्यवहारोऽयन्तु नायौक्तिकः। तदा राजा विदूषकमुद्दिश्य प्राह, "वयस्य, नेदमुपपन्नम्। पश्य–

> प्रियवचनशतोऽपि योषितां दयितजनानुनयो रसादृते।
> प्रविशति हृदयं न तद्विदां मणिरिव कृत्रिमरागयोजितः॥ इति।

प्रियतमस्य प्रेम्णः अन्तःसारशून्यत्वं प्रकाशितमभूत् औशीनर्य्याः सकाशे। पुरुरवसः प्रेम्नोऽभिनयमिमं सोढुं नालं सा। तथाहि कापि पतिव्रता रमणी कथमपि तस्याः पतिप्रेम अपरस्यै नार्य्यै उपहारत्वेन प्रदातुं नेच्छति। तथाह्युच्यते, 'कष्टा हि स्त्रीणामन्या सहिष्णुता।' औशीनर्य्या जीवितस्वरूपा पुरुवरा अन्यां नायिकां प्रति आकृष्टेति ज्ञात्वा सात्मनः चित्तस्थैर्यं रक्षितुं नार्हति।

परन्तु तस्याः क्रोधो न दीर्घस्थायी अभूत्। इयं पतिगतप्राणा महीयसी नारी पत्युः सुखेनात्मनः सुखम्, तद्दुःखेन च स्वस्याः दुःखमिति विभावयति। उर्वशीं प्रति आसक्तस्य पुरुरवसो बाधादानेन फलं विपरीतं स्यात्। वस्तुतः औशीनरी सम्यक्तया जानाति यत् स्मामिनः मनः कथमपि न प्राप्तुमर्हति, अपि च पुरुरवा स्वयमेवान्तर्व्यथया कष्टमनुभवति स्म। एतन्न काम्यमौशीनर्य्याः। सा स्वाचरणेनानुतप्ता सती प्रियप्रसादनव्रतानुष्ठानेन स्वामिनः स्वातन्त्र्यं स्वीकृतवती। प्रियतमं यथाविधि पूजयित्वा सा उवाच, "एषाहं देवतामिथुनं रोहिणीमृगलाञ्छनं साक्षीकृत्य आर्यपुत्रमनुप्रसादयामि। अद्य प्रभृति यां स्त्रियमार्यपुत्रः प्रार्थयते या आर्यपुत्रस्य समागमप्रणयिनी तया मया प्रीतिबन्धेन वर्तितव्यमिति"॥

प्रियतमस्य सुखाय चिरतरं स्वसुखं गौणीकृत्य आत्मत्यागस्यायमेव दृष्टान्तो जगति सुदुर्लभः। धन्येयं राजनन्दिनी। सा त्यागमेव प्रेम्णः प्रकृष्टनिदर्शनत्वेन मनुते। सा च प्रवृत्तेः दासत्वं परिवर्त्य निवृत्तेः कल्याणधर्ममाश्रयति। औशीनरी स्पष्टत एवोक्तवती, "मूढ, अहं खल्वात्मनः सुखावसानेन आर्यपुत्रं निर्वृतशरीरं कर्तुमिच्छामि। एतावता चिन्तय तावत् प्रियो वा न वेति"॥

प्रेमस्रोतस्विन्याः औशीनर्य्याः अतलस्पर्शिप्रेम्णो मूलान्वेषणं कथमपि अस्माकं साधारणानां कृतेऽसम्भवम्। महाकविना सूक्ष्मतया औशीनर्य्याः त्यागस्य माधुर्यस्यानाद्यन्तप्रवहमानत्वं रोचिष्णुतया समुपस्थाप्य प्रमाणयितुम् इष्यते यत् मर्त्यमानवी अपि औशीनरी त्यागमाधुर्येण स्वर्गपदम् अलभत।

संस्कृतरुपकेषु एतादृशश्चरित्रं नहि केवलं दुर्लभं परञ्चाद्वितीयमिति। मन्ये प्रवृत्तिपरायणया उर्वश्या सह औशीनर्य्याश्चरित्रं तुलनात्मकदृष्ट्या समङ्कितमिति कृत्वा निवृत्त्याः मूर्तरूपा औशीनरी चिरं भास्वरत्वेन विराजते। प्रियतमस्य प्रीतये आनन्दविधानाय च स्वार्थत्यागः कश्चन आध्यात्मिकत्यागः। साधारणनार्याः कृते आत्मत्यागस्य पराकाष्ठाप्रदर्शनमेतद् असम्भवपरम्। वर्तमानकाले औशीनर्य्या इव आत्मत्यागो न लक्ष्यते। अन्यस्मिन् साहित्ये औशीनर्या इव चरित्रं नोपलभ्यते।

## मालविकाग्निमित्रमिति रूपके धारिण्या आत्मत्यागः

कालिदासस्य प्रारम्भिकनाट्यकृतिः सम्भवतो मालविकाग्निमित्रमस्ति। अस्मिन् पञ्चाङ्कात्मके नाटके मालविकाग्निमित्रयोः प्रणयकथा वर्णिता। किन्तु अग्निमित्रस्य राजमहिषी धारिणी स्वीयमाहात्म्येनोज्ज्वलतया भास्वरेह नाटके।

सा हि आत्मत्यागस्य परां काष्ठामतिशेते। तथाहि मालविकाग्निमित्रे राजमहिष्याः धारिण्याः पतिभक्तिः सत्यमेव प्रशंसार्हेत्यस्मिन् विषये न संशयः। राज्ञी यदावगतवती यत्तस्याः स्वामी राजाग्निमित्रो रूपवत्यां मालविकायां स्निह्यति स्म हृदयेन तदा सन्मनसि प्रतिहिंसाया भावो नोदितः। स्वामिनः सुखार्थं स्वयमेव सा उद्योगिनी भूत्वा मालविकया समं तस्याग्निमित्रस्य विवाहं कारितवती। पृथिव्याः यस्य कस्यापि देशस्य साहित्ये धारिणीव नारी न परिलक्ष्यते। पतिस्वार्थाय सा यत्किमपि असाध्यं सम्पादयितुमर्हति। एतदपि स्वीकार्यं यत् सा हि पतिव्रता विवेकशालिनी चासीत्।

धारिण्याश्चरित्रचित्रणे कविना कालिदासेन विकासस्य रेखा नियोजिता। परिस्थितिवशाद्विनीता सती सा स्वयमेव राज्ञे मालविकां समर्पयति। नवनवनायिकासु भर्तुः मधुकरवृत्तिः वर्तते इति धारिणी सम्यक् परिज्ञातवती। प्रसङ्गतः उल्लेखार्हं यत् इरावत्यपि कदाचन तस्याः सपत्नीपदे स्थापितासीत्। सापि सम्यक् चक्षुष्मती जाता। किन्तु धारिण्याश्चरित्रमतुलनीयम्।

## नागानन्दमित्यत्र जीमूतवाहनस्यात्मत्यागः

राजसभाया उपयोगिन्याः ललितप्रेमविषयिण्याः नाटिकाया रचनायां दक्षः कविः श्रीहर्षः कस्यचन पुण्यात्मनः जीमूतवाहनस्यात्मदानवृत्तमुपजीव्य पञ्चाङ्कपूरणीयं रूपकमेकं विनिर्मितवान्। एकादशशतके सोमदेवरचिते कथासरित्सागरे तथा च क्षेमेन्द्रस्य बृहत्कथामञ्जर्य्यां जीमूतवाहनस्यात्मत्यागस्य वृत्तमुपलब्धमासीत्। जीमूतवाहनः निश्चितवान् राज्यसुखैश्वर्यं परित्यज्य तपोवने पितृमात्रादीनां सेवायां जीवनमुत्सर्गीकर्तुम्। तथाहि तेनोक्तम्, 'यौवनं भक्त्या याति यदीत्थमेव पितरौ शुश्रूषमाणस्य मे' इति। गरुडेन ग्रासकवलितसरसमांसचूडामणिर्यथा पितुर्जीमूतकेतोः पदयोः पतितः। एतेन मन्ये पितरं प्रति पुत्रस्य प्रणतिर्ज्ञाप्यते। तस्य त्यागः, शङ्खचूडस्य जीवनरक्षायै स्वप्राणोत्सर्गो न हि अहङ्कारेण प्रदीप्तः परं विनयेन। जीमूतवाहनः करुणया परेषां कृते जीवनमुत्स्रष्टुं सदा प्रस्तुतः। तथाहि मित्रावसुनोक्तं, 'यश्चासूनपि सन्त्यजेत् करुणया सत्त्वार्थमभ्युद्यतः।' (२.१०) अपि च, विपन्नान् परित्यक्तान् आर्तान् यदि स्वजीवनेन न रक्षेत्तर्हि नास्ति प्रयोजनमनेन शरीरेण जीवनेन वा, 'आर्तं कण्ठगतप्राणं परित्यक्तं स्वबान्धवैः त्रायेतैनं यदि ततः कः शरीरेण मे गुणः' (४.११) इत्युक्तं जीमूतवाहनेन स्वयमेव।

तथाहि जीमूतवाहनः स्वजीवनं तृणीकृत्य शङ्खचूडस्य जीवनं रक्षितुं प्रतिज्ञाबद्धोऽभूत्। आत्मगतेनातो जीमूतवाहनेनोक्तम्, 'अपि नाम शक्नोम्यहं स्वशरीर-दानाद् एकस्यापि फणभृतः प्राणरक्षां कर्तुम्?' शङ्खचूडस्य मातुर्भाविपुत्रवियोगदुःखं विलोक्य जीमूतवाहनः करुणया परमदुःखितोऽभवत्। शङ्खचूडोऽपि निष्कलुषवंशस्य मर्यादां रक्षितुं, जीमूतवाहनवन्महतो जीवनमूल्यं कियदिति परिष्कर्तुं तथा च स्वस्यात्मदानयाथार्थ्यं प्रतिष्ठापितुं स प्राह, 'प्राणांस्तानेष साधुस्तृणमिव कृपया यः परार्थं जहाति' (४.१५)।

त्यागोऽयं शारीरिकात्मत्यागः इति कथयितुं शक्यते।

## उपसंहारः

'संस्कृतरूपकेषु आत्मत्यागविमर्शः' इति विषयकेनालोचनेन कोऽपि प्रचोदितः सन् स्वार्थत्यागं कृत्वा शुद्धचित्तो भवेच्चेत्तस्मिन् शुद्धचित्ते एव मुक्तिः सम्भवति। अपि च, एतादृशो जनः समाजे कथमपि कदापि कस्याप्यपकारं साधयितुं नार्हति, परमुपकारं कृत्वान्येषां कृते स्वार्थं हेलया त्यजति। अतो न केवलं पारलौकिकं फलं, लौकिकं फलमपि प्राप्तुं शक्यते अनेनात्मत्यागविमर्शेन इति शम्।

-★-

# विश्वसभ्यतायां स्वामिनो विवेकानन्दस्य योगदानम्


## तन्मयकुमारभट्टाचार्यः*


यदा नरेन्द्रनाथदत्तो भगवतो रामकृष्णपरमहंसदेवस्य शिक्षामन्दिरं प्राविशत् तदा सः पाश्चत्त्यस्य नवजागृतिभावनातरङ्गैरान्दोलितान्तःकरणस्तथा पाश्चात्त्यमनसो नवचिन्तनविकिरणेन विस्मयविमुग्धो वङ्गीयस्तरुण आसीत्। किन्तु यदा स ज्ञानमन्दिरादस्मात् निर्गच्छति स्म तदा स जागतिकानां वस्तूनां बहिःस्वरूपस्फुटीकरणक्षमायाः बौद्धिकचर्चायाः जागतिकाखिलरहस्यग्रन्थिमोचनक्षमाया आध्यात्मिकजिज्ञासायाः बोधविभवे एव कृतनिर्भरः, आध्यात्मिकतया जागरूको विवेकानन्दः समभवत्। स्वामिनो विवेकानन्दस्य सामग्रिकं परिवर्तनमिदं व्यक्तित्वस्य, आसीत् काचन विस्मयविमुग्धा अधिज्ञता या खलु कलिकातानगरोपान्तवर्तिनि दक्षिणेश्वरमन्दिरे संघटिताभवद् यच्च वृत्तं जगतः पुरतः पुनरपि प्रादर्शयद् यत् शिक्षकात् छात्रेषु निष्प्राणानां तथ्यानां परिवेषणस्य काचन प्रक्रिया न हि शिक्षानाम्ना अभिधेया अपि तु इयं काचन प्राणशक्तिपूर्णा प्रक्रिया यस्य च ग्रहणेन मानवस्य व्यक्तित्वं सर्वथा परिवर्तितं भवति व्यक्तिसत्ता च विकाशिता भवति विशिष्टे व्यक्तित्वे।

अस्मिन्नेव समयसीमनि साधारणव्यक्तित्वस्य तथा प्रवृद्धगुणवैशिष्ट्य-समन्वितस्य व्यक्तित्वस्य पार्थक्यनिरूपणम् आवश्यकम्। व्यक्तित्वं हि काचित् सङ्कीर्णा धारणा या खलु जनस्य अहन्तां क्षुद्रे परिसरे अवरुद्धां करोति, प्रवृद्धगुणवैशिष्ट्यसमन्वितं तु व्यक्तित्वं काचित् महती धारणा या खलु कस्मिंश्चित् जने समुन्मीलिता सती जगता सह तस्य सम्बन्धं प्रतिष्ठापयति। स्वामिना विवेकानन्देन गुरोः श्रीरामकृष्णदेवाद् गृहीता विद्या एतादृशी विद्या आसीद्– अन्तः प्रविष्टा या पराविद्या प्रतिष्ठिता सती शिष्यं बाह्यविषयविलग्नानां सर्वेषां विषयाणां ज्ञानस्य समुपार्जनाय समर्थं करोति। पराविद्या हि नान्यत् किञ्चित् मानवीयसम्भावनाभ्यः, अथवा शब्दान्तरेण सा विद्या या मानवस्य गभीरताम् अध्येति। अतएव नैतद् युक्तियोगं विना यद् उपनिषदो नियतं पराविद्यायां

---


*सहायकाचार्यः, प्राच्यविद्याविभागे, संस्कृतकलेजविश्वविद्यालये, कलिकातास्थिते

वैशारद्यस्य आवश्यकतां विघोषयन्ति।

स्वामी विवेकानन्दः तस्य स्वदेशं प्रति प्रीतिं पुष्णाति स्म तदनुगुणतया आसीत् तस्य भारतस्य अतीतेतिहासविषये संस्कृतिविषये च गभीरं ज्ञानम् एतत् तस्मै जगति भारतीयसंस्कृतेः प्रचाराय शक्तिं साहसं च सम्प्रयच्छति स्म। समग्रेण जगता सह भारतस्य पुनःसम्बन्धस्थापनविषये च तं गभीरश्रद्धासमन्वितं सम्पादयति स्म। स्वामी विवेकानन्दः तस्य गुरोः श्रीरामकृष्णदेवस्य व्यक्तित्वे पुस्तकप्रदर्शितस्य तथा इतिहासप्राप्तस्य भारतमहिम्नः अखण्डनीयाया यथार्थतायाः समुज्ज्वलं बोधयोग्यं च सम्प्रदर्शनं परिलक्षितवान्। भारतस्य अतीतम् आनन्दपुलकम् आशां च जनयति स्म विवेकानन्दस्य। एतद् आसीत् तस्य भारतस्य प्राथमिकम् आविष्करणम्। द्वितीयं च आविष्करणं हताशां जनयति स्म।

यतो भारतस्य समकालीना पश्चात्पदता, अनीहा दुर्बलता च पञ्चवार्षिक्यां तस्य एकाकिन्यां सम्पूर्णजगत्परिक्रमायां प्रतिपदं तम् अभ्यर्थयन्ति स्म। व्यापके निविडे तस्मिन् पर्यटने स आहतं चूर्णितं च मानवम् अपश्यत्। एतदासीत् तस्य द्वितीयम् आविष्करणम् एतस्य समवेदनाप्रवणे तस्य मनसि यथार्थम् आघातस्वरूपम् आसीत्। तस्य तृतीयम् आविष्करणम् आसीद् भारतस्य पुनर्नवीकरणं यच्च साधारणजनानां जागरणस्य उपरि, तथा अध्यात्मवादे प्रतिष्ठितस्य मानवतादर्शनप्रसारस्य उपरि कृतिनिर्भरम् आसीत्। एतदर्थमेव स तस्य छात्रेभ्यो व्यवहारिकवेदान्तस्य वाणीं प्राचारयद् गुरुत्वं च समधिकतया समारोपम् इच्छाशक्तिसमुद्बोधनसाधितेन आत्मसंयमेन व्यक्तिगतचरित्रशक्तेः संवृद्धिसाधनस्य प्रयोजनविषये उपायविषये च। समानुपातं स शक्तिशालिन्यां वैदेशिकनीतौ जातीयशक्तेः विनियोजनं समर्थयति स्म या वैदेशिकनीतिः क्रमवर्द्धितायां जागरूकतायाम् आधुनिकं जगद् योजयितुम् आन्तर्जातिकीं सहयोगितां शान्तिं च समानेतुं परिकल्पिता।

स्वामी विवेकानन्द उपनिषदां विशिष्टान् शब्दान् अनुधावति स्म ते च तेन निर्दिष्टाः उत्तिष्ठत जाग्रत इत्येवम् विच्छिन्नाया अहन्ताया आवरणाद् बहिरागच्छ इति च। स्वामी विवेकानन्दः समन्वभवद् यन् मनसि सहजातरूपेण समवस्थिताया शक्तेर्विषये भारतीयं मनो नावहितं, या शक्तिः समुद्बोधिता सती सर्वविधं परिवर्तनं साधयितुं समर्था भवति। अतो नैतद् युक्तिविहीनं यद् जातिम् अनुभवाय स उपदिशति स्म यन् मानवो न तथा क्षुद्रो यथा स दृष्टिगोचरो भवति, सीमितस्य तु

मानवस्य पश्चाद्भागे विद्यते असीमतां स्वात्मनि स्वभावतया समवस्थितां विजानाति तदा आविर्भवन्त्याः शताब्देः समराह्वानस्य सम्मुखीभवनं सम्भवं भवेत् तेन, सर्वजगद्वित्रासकानां समस्यानां च समाधानं सम्भवेत्।

इयं सा शोचनीया दशा समग्रस्य जगतः प्राच्यदेशे वैज्ञानिकस्य ज्ञानस्य अभावः पाश्चात्त्ये च जगति आध्यात्मिकतायाः स्रोतसः अभावो यत् तं कष्टयति स्म। अतः स आध्यात्मिकता-विज्ञानयोः सुखदस्य सम्मिश्रणस्य समुन्नमनम् आवश्यकतया सञ्चिन्तयति स्म। प्राचीनभारतीयं मनो विज्ञानस्य मूलतत्त्वविषये सर्वथा अज्ञम् आसीद् इत्येतन्न। ते वैज्ञानिकशिक्षाया आवश्यकताविषये अतीव अवहिता आसन्। अतएव ते नन्दनतत्त्वे, गणिते, पदार्थविज्ञाने, औषधे, कृषिशास्त्रे, समरशास्त्रे च प्रभूतभावेन साहायकम् अयच्छन्। दुर्भाग्यवशात् सुचिरं संस्कृतेरनुशीलनस्य अभावाद् भारतीयस्य मनसः वैज्ञानिकी अन्तर्दृष्टिः विनष्टा जाता, केवलं धर्मस्य तथा भ्रान्तस्य अध्यात्मवादस्य उपरि तत् केन्द्रीभूतं जातं भारतीयं मनः। तत्सर्वं भारतीयं जनं नहि ज्ञानालोकं प्रति अग्रेसरमकरोदपितु बन्धनं प्रति सततं तं नयति स्म।

महानसौ स्वामी महाभागः अन्वभवद् यत् पाश्चात्त्यजनानां सान्त्वनासाधनाय तेभ्यः आध्यात्मिकतारूपस्य औषधस्य प्रदानम् आवश्यकम् येन समग्रपाश्चात्त्यदेशस्थाः ते आध्यात्मिक्याः अचलावस्थायाः क्षतिग्रस्ता न भवेयुः तदनुसारं च यथा वैचित्र्यहीनतायाः क्लान्तिदायिनी स्थितिर्न तेषामुपरि आपतेत, अनुरूपेणैव प्रकारेण सः अन्वभवद् यत् प्राच्यजनानां मनसि वैज्ञानिकं ज्ञानं प्रदेयं, येन पराविद्यायाम् अपराविद्यायां च दक्षताम् अर्जयन् मानवः सम्पूर्णमनःसम्पन्नतया आविर्भवेत्, वैज्ञानिक्या अन्तर्दृष्ट्या स समुज्ज्वलो भवेत्, समकालमेव स आध्यात्मिकेषु मूल्यबोधेषु दृढप्रत्ययवान् भवेत्, अतो भारतीयभावेन आध्यात्मिकताविज्ञानयोः पराविद्यापराविद्ययोः मिलितविग्रह इति वर्ण्यते।

महान् स्वामिमहोदयः एतद् दृष्ट्वा आहतोऽभवद् यत् प्राचीने काले यत्र मानवः अमृतस्य पुत्ररूपेण वर्णितोऽभवत् तद् भारतं मध्ययुगे तथा महता परिमाणेन अवनमितम् अभवद् यत् समाजस्य दुर्वलतरान् पददलितांश्च जनान् पीडयितुं परपीडनयन्त्रम् उदभावयत्, समाजे पशुचितायां हीनताम् अवनाम्य तान् सर्वथा सहायहीनेषु प्राणिषु परिणतान् करोति स्म। पुनरपि स एतद् अवलोक्य

आतङ्कविमूढोऽभवद् यत्– प्राचीनभारते याः स्त्रियः स्वर्गीयमातुः प्रतीकरूपेण श्रद्धापात्रम् आसन् तत् तथा अवनमितम् अभवद् यत्– ता एव स्त्रियः अधुना शिशूत्पादनयन्त्ररूपेण केवलं व्यवहृता भवन्ति पुरुषाणां स्वार्थनिष्पादनाय चोपयुज्यन्ते।

महान् स्वामिमहोदयः अनुभूतवान् यत्, समाजस्य पुनर्नवीकरणाय प्रथमं प्रयोजनम् पुरुषस्य स्त्रियाश्च पुनरपि समुन्नतायां वेद्यां स्थापनं यस्यास्ते पतिता जाताः। उपनिषदां तेजसः स्वात्मीकरणेन स्वामी विवेकानन्दः ताभिः प्रसारितं मानवताया अत्युन्नतम् आदर्शम् उपलब्धवान्, अनुभूतवांश्च यद् एतस्य दर्शनस्य व्यावहारिकः प्रयोग आवश्यकः। यतः एतस्य व्यावहारिकेण प्रयोगेनैव केवलं समाजस्य प्रत्येकं जनस्य मध्ये प्रेम्णः अनुशीलयितुं शक्यते, एका मानवता एका जातिः इति दर्शनस्य परमोत्कर्षञ्च प्रख्यापयितुं शक्यते। विवेकानन्दमहाभागो मन्यते यद् भारतीयेन कुसुमास्तीर्णेन आध्यात्मिकेन पथा धारावाहिकदृश्यमध्ये मानवताया यद् दर्शनं दृष्टिगोचरीभवति न तत् श्रेणीसंग्रामस्य न वा स्वार्थद्वन्द्वस्य पथि परिलोक्यते। तच्च यथार्थतया उल्लेखयोग्यम्। यतः एतत् प्राच्यपाश्चात्त्ययोः मनोभावस्य पार्थक्यं प्रकाशीकरोति। धर्मस्य प्रसारादपि भारतीयसमाजस्य पुनर्नवीकरणविषये स्वामी विवेकानन्दः अधिकतरं चिन्तान्वित आसीत्। तदनुसारं सः अवदद् यत् पञ्चाशद् वर्षाणि यावद् धर्मकर्मणां विरतिः शक्यते सोढुं न तु भारतीयसमाजस्य श्रीवृद्धिसाधकानाम् अनुशीलनानां रूपायणार्थं कथमपि अपेक्षणं सोढव्यम्। अयमेव हि नवीनायमानश्चिन्तायाः प्रकारो यः खलु महात्मनः स्वामिनो व्यक्तित्वं पुण्यपूर्णं करोति।

एका जातिः, एका मानवता इति धारणां विवेकानन्दो यदा प्रचारयति स्म तदा प्रत्येकं जातिः अन्याभिः जातिभिः सह सम्पर्केण विहीनाम् एकामेव जातिं सञ्चिन्तयति स्म। तस्मिन् मुहूर्ते स्वामी विवेकानन्दः अनुभवति स्म यत्, न कापि जातिः पृथग्भावेन जीवितुं शक्नोति, केवलम् एकस्यां च जातौ समवस्थितानाम् अवस्थानाम् उपरि दृष्टिप्रदानेनैव एकस्या जातेः समस्यानां समाधानं न सम्भवेत्। एतेषां तु समाधानाय जगति स्थितानां सर्वासां जातीनां साम्मुख्येन समवस्थितानां सर्वासां समस्यानां विषये सामग्रिकी दृष्टिः अवश्यं प्रदेया। इतिहासो विज्ञानं च एतस्या भावनायाः सत्यतां प्रमाणयतः स्म विंशशताब्देः शेषभागे, यदा जगत् तस्य प्रकृतेः समरूपतां समनुभवति स्म। एतत् तु विस्मयेन स्तब्धीभावं प्रापयति यन् मानवसभ्यताया उषालग्ने उपनिषदां द्रष्टारः सत्यमेतद् गभीरभावेन अनुभूतवन्तः

विघोषितवन्तश्च यद् अस्मिन् जगति सर्वा सत्ता परब्रह्मात्मना परिव्याप्ता, यस्य च फलेन जगति समवस्थितासु सर्वासु सत्तासु गभीरः सम्बन्धो विराजते पारस्परिकः। इयमेव विश्वजनीना दृष्टिभङ्गी महतः स्वामिनः, या तत्रभवन्तम् अन्तेभ्यो व्यक्तित्वेभ्यो विशिष्टं विदधाति, अतएव न केवलं भारतीयानाम् अपितु अखिलानां विश्ववासिनां हृदये तस्य वासस्थानं विरचयति।

आधुनिकं कार्यरतं विश्वसंघटनं सर्वजगद्व्यापिनीं सामग्रिकीं दृष्टिभङ्गीम् आददाति, समग्रताया दृष्ट्या समाधानाय यतते, येन जातिविशेषस्य कृते निर्दिष्टायाः समस्यायाः समाधानाय गृहीतात् सम्पादनस्य प्रयासाद् अन्या न कापि जातिः क्षतिग्रस्ता भवेत्। स्पष्टमेतद् यदेतद् दर्शनं पारस्परकप्रीतेः, पारस्परिकविश्वासस्य, विश्वजनीनस्य समन्वयस्य, सुचिरायाः शान्तेः, विश्वबन्धुत्वस्य तथा सहायतापूर्णस्य मनोभावस्य मौलिकाधारणाया उपरि कृतनिर्भरं वर्तते। स्वामी विवेकानन्दः अनुभूतवान् यद् बलप्रयोगेन मानवजातेः ऐक्यं संसाधयितुं न शक्यते। एतत् केवलं प्राचीनभारतीयमनसा समुद्भावितेन आध्यात्मिकतायाः स्निग्धोज्ज्वलेन बन्धनेन सम्पादयितुं शक्यते। मानवताया अत्युन्नतं दर्शनं तथा आध्यात्मिकतायाः स्निग्धोज्ज्वला बन्धनस्य धारणा–स्तम्भद्वयसदृशम् एतद्द्वयं ययोरुपरि विश्वसंघटनस्य आदर्शः कृतनिर्भरो भवेत्। एवं रूपेण विश्वसभ्यता प्रभूतभावेन स्वामिनो विवेकानन्दस्य निकटे अभीष्टस्य सम्पादनविषये अग्रगतिविषये च ऋणवती अस्ति।

-★-

# बालसाहित्यशब्दकोषः

राकेशदाशः*

## भूमिका

भाषापाठनाय संस्काराधानाय च सुप्राचीनकालाद् एव साहित्यस्य उपयोगः लोके प्रसिद्धः। साहित्यरचनस्य प्रयोजनम् एव सुखेन दुरवगाहविषयाणाम् अवगमः। अत एव कान्तासम्मिततया उपदेशः साहित्यम् इति प्रसिद्धिः। एवं च साहित्यस्य प्रयोजनम् उल्लिखद्भिः आचार्यैरपि साहित्यं शिवेतरक्षतये इति प्रत्यपादि भृशम्। एवं च रसवत्तया कर्तव्याकर्तव्यनिर्णयात्मकस्य उपदेशस्य प्रतिपादनम् एव साहित्यस्य मुख्यं प्रयोजनम् इति वचने न हानिं पश्यामः। तत्रापि बालसाहित्यस्य विषये तु इदं निश्चयेन एव वक्तव्यम्। बालानां कृते साहित्यरचनस्य तद् एकम् एव प्रयोजनं भवितुमर्हति इति आस्माकीना मतिः।

सामान्यतः पञ्चवर्षीयेभ्यः षोडशवर्षीयान् यावत् बालपदेन गृह्येरन्। एतादृशीभ्यः कोमलमतिभ्यः साहित्यसर्जनम् अपि क्लेशकरम् एव। नाल्पेन आयासेन बालसाहित्यसर्जनं शक्यम् इति निश्चप्रचम्। तस्माद् बालसाहित्यसर्जने बहुधा सावधानता अवलम्बनीया भवति।

## बालसाहित्ये शब्दचयनम्

मुख्यतः सावधानता भवेत् शब्दानां चयने। बालानां कृते साहित्यरचनकाले शब्दानां चयनं मुख्यं कार्यम्। बालसाहित्यपदे बालशब्देन गृहीताः अपि सर्वे न समानाः। प्रायः पञ्चमवर्षीयबालकेभ्यः आरभ्य षोडशवर्षदेश्यान् यावत् सर्वे बालाः इति भाव्यते। तत्र मनस्तात्त्विकदिशा सामान्यतः त्रयः गणाः भवेयुः।

**शिशुगणः**– नवमवर्षीयान् यावद् बालाः

**किशोरगणः**– द्वादशवर्षीयान् यावद् बालाः

**तरुणगणः**– षोडशवर्षीयान् यावद् बालाः

एतेषु अपि पुनः शब्दचयनदृष्ट्या अवान्तरगणाः सम्भवन्ति। कश्चन दशवर्षदेश्यः बालः बालसाहित्यं पठितुं प्रारभते। तस्य द्विधा अवस्था भवितुमर्हति–

स संस्कृतम् अधीतवान्। पूर्वतनवयोवर्गस्य साहित्यं पठितवान् च।

---

*सहायकाचार्यः, संस्कृताध्ययनविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षिकशोधसंस्थानस्य

ऐदम्प्राथम्येन संस्कृतं शिक्षित्वा साहित्यम् अधीते।

उभयोः कृते शब्दानां चयने वैविध्यं भविष्यति। स्पष्टतया यदा शिशुगणसाहित्यं पठित्वा कश्चन किशोरगणसाहित्यं पठति तदा तस्य भाषाज्ञानम् अन्यादृशम्। साक्षात् किशोरगणसाहित्यम् एव आरब्धवतः भाषाज्ञानम् अन्यादृशम्। द्वितीयप्रकारकस्य बालस्य कृते यदि भाषाज्ञानदृढीकरणाय शिशुगणयोग्यं साहित्यं प्रदीयते तदा स साहित्ये रुचिं न दर्शयिष्यति। शिशुगणाय यादृशं विषयवस्तु भवेत् साहित्यस्य तादृशं विषयवस्तु किशोरगणीयेभ्यः न रोचेत। अतः किशोरगणाय रुचिकरं विषयम् आधृत्य शिशुगणाय प्रयोगाय योग्यैः शब्दैः साहित्यग्रथनं द्वितीयस्य गणस्य कृते उपयुक्तं स्यात्।

तरुणगणस्य विषये अपि भेदः कल्पनीयः। विषयवस्तुदृशा तरुणगणयोग्यं साहित्यं भाषादृष्ट्या शिशुगणयोग्यं किशोरगणयोग्यं च सर्जनीयम्।

एवं बालसाहित्ये एतादृशा उपविभागाः भवेयुः–




एवं साहि साहित्यरचनसन्दर्भे गणानुसारिण्याः भाषायाः प्रयोगः भवति चेत् संस्कृतभाषाशिक्षणे अस्य साहित्यस्य विशिष्ट उपयोगः भविष्यति।

## बालसाहित्ये रसः

येन कारणेन साहित्यस्य कान्तासम्मितता प्रोक्ता तत् कारणं रसस्फूर्तिः इति निःसन्दिग्धं वक्तुं शक्यते। रसस्फूर्तिं विना साहित्यस्य साहित्यता एव न

स्याद् इति "वाक्यं रसात्मकं काव्यं", "ध्वनिरात्मा काव्यस्य" इत्यादिभिः वचनैः सुष्ठु प्रत्यपादि। बालसाहित्यम् अपि यदि रसव्यञ्जकं न स्यात् तर्हि नूनम् एव तस्मिन् बालानाम् आसक्तिः न भवति। अतः बालसाहित्ये अपि रसस्फूर्तेः विषयः विचारणीयः। बालसाहित्यम् अपि रसप्रधानम् एव भवेत् इति तात्पर्यम्।

किन्तु, केषां रसानां स्फूर्तिः कथं भवेत् इति कश्चन गहन एव विषयः अत्र चर्चनीयः। बालसाहित्ये अपि शृङ्गारादीनाम् एव अङ्गित्वं भवेद् उत अन्येषाम् अपि अङ्गित्वं स्वीक्रियेत इति विषयः इतोऽपि गहनः प्रतिभाति। किं भयानक-हास्या-द्भुतानाम् अपि अङ्गिरसत्वेन ग्रहणं शक्यम्? तद् विचार्यम्। भाषान्तरीयसाहित्यानि अलङ्कारशास्त्रं च आलोच्य निर्णयः अत्र कर्तव्यः भवेत्। तत्रापि किंवयस्कानां कृते साहित्यरचने कीदृशानां रसानां कुत्र कथं नियोजनम् इत्यपि विचारणीयः अंशः। भाषान्तरीयकथानाम् अनुसर्जनकाले अपि ईदृशाः अंशाः अवधातव्याः भवन्ति। अस्माकं दृष्ट्या बालसाहित्यस्य प्रयोजनं न केवलं बालमनोरञ्जनम्। बालसाहित्यस्य मुख्यं प्रयोजनं संस्कृते रुचिजननम्। द्वैतीयिकं प्रयोजनं भाषाशिक्षणं, संस्काराधानं च। मनोरञ्जकरीत्या भाषाभ्यासाय संस्काराधानाय च बालसाहित्यम् उपयुज्येत। अतः कान्तासम्मिततया उपदेशः साहित्यम् इति यत् कथ्यते तत्र बालसाहित्यस्य विषये पितामहीसम्मितत्वं मातामहीसम्मितत्वं वा वक्तव्यम् उत न इति सुधियः विभावयन्तु।

## शब्दकोषस्य प्रयोजनम्

प्रकृतप्रबन्धबन्धने पूर्वोक्ताः विषयाः विचारणीयाः भवेयुः इति धिया एव ते विषयाः उपास्थापिषत। प्रबन्धस्य शीर्षकं भवति बालसाहित्यशब्दकोषः इति। शब्दकोषरचनपरम्परा निरुक्ताद् अपि प्राचीनकालात् प्रवर्तते। यद्यपि संस्कृतभाषायाः व्याकरणेन संस्कृतत्वात् पदानि स्वयं प्रकृतिप्रत्ययाभ्यां पदार्थप्रकटने क्षमाणि इति दृढः वादः वर्तते तथापि निरुक्तामरकोषादिभिः अयं वादः तुच्छीकृतः इति निश्चप्रचम्। कोषस्य प्रयोजनं द्विधा निरूप्यते–

भाषायां रूढाः शब्दाः एव आधिक्येन प्रयुज्यन्ते। रूढिः च व्याकरणगम्या न भवति।

शब्दकोषसाहाय्येन सुप्-तिङ्-प्रत्ययान्तरूपज्ञानेन एव शब्दार्थनिर्णयः शक्यः। अन्यथा सम्पूर्णव्याकरणाध्ययनाद् ऋते साहित्याध्ययने अधिकारः न जायेत।

तस्मात् शब्दकोषस्य अस्ति महान् उपयोगः। शब्दकोषस्य च उपयोक्तारः पुनः द्विधा भवेयुः– अध्येतारः, सर्जकाः।

## संस्कृतशब्दकोषः

शब्दकोषः नाम शब्दानां परिचायकः ग्रन्थः। तत्र शब्दानाम् अर्थाः, प्रयोगकौशलं, निर्वचनम्, उच्चारणचिह्नम् इत्यादि उल्लिख्यते। निरुक्तग्रन्थः प्रायः संस्कृतशब्दकोषेषु प्राचीनतमः। स च वैदिकभाषायाः कृते। लौकिकभाषायाम् अपि अमरकोषः, मेदिनीकोषः, हलायुधकोषः इत्येवं विविधाः कोषाः प्रसिद्धाः।

प्राचीनपरम्परायाम् अमरकोषः कश्चन विशिष्टः प्रयोगः। तत्र शब्दानाम् अर्थाः लिङ्गं च निर्दिष्टम् आसीत्। स च निर्देशः श्लोकरूपः। श्लोकरूपत्वात् अयं कोषः कण्ठस्थीकरणयोग्यः भवति। श्लोकरूपाणां सूत्ररूपाणां च ग्रन्थानां कण्ठस्थीकरणं सुकरं भवति इति तु अनुभवसिद्धमेव समेषाम्।

अद्यत्वे ईदृशशब्दपरिचायककोषातिरिक्तः अन्ये अपि कोषप्रकाराः दृश्यन्ते। अद्यत्वे कोषस्य कण्ठस्थीकरणस्य कालः समाप्तः। कोषः सम्प्रति ग्रन्थत्वेन तिष्ठति। सति प्रयोजने ग्रन्थम् उपयुज्य उपयोक्तारः स्वकार्याणि साधयन्ति। तस्माद् अद्यत्वे आधुनिकरीत्या संस्कृतकोषनिर्माणम् अपि अतीव आवश्यकम् इत्यत्र का वा संशीतिः! इदम् एव प्रयोजनं मनसिकृत्य गतशताब्द्योः केचन विशिष्टाः कोषाः प्रणीताः। तेषु अन्यतमाः–

तारानाथतर्कवाचस्पतिसङ्कलितं वाचस्पत्यम्

राधाकान्तदेवबहादुरसङ्कलितः शब्दकल्पद्रुमः

वामनशिवरामाप्टेसङ्कलितः संस्कृताङ्ग्लकोषः, आङ्ग्लसंस्कृतकोषः, संस्कृत-हिन्दीकोषः, हिन्दीसंस्कृतकोषः

मोनियर्-विलियम्स्-सङ्कलितः संस्कृताङ्ग्लकोषः, आङ्ग्लसंस्कृतकोषः

ततः परं प्रान्तीयभाषाकोषाः अपि संस्कृतस्य कृते बहवः निर्मिताः। संस्कृतभारतीसंस्थया अपि व्यावहारिकशब्दकोषाः केचन प्रकाशिताः। किन्तु, सत्सु अपि एतेषु कोषेषु संस्कृतबालसाहित्यकोषस्य अस्ति महान् उपयोगः। तदग्रे विचारयामः। आदौ अस्माभिः शब्दकोषस्य प्रकारविषये किञ्चिद् विचारणीयम्।

## शब्दकोषस्य प्रकाराः

शब्दकोषः बहुविधः भवति। प्रायः शब्दकोषस्य इत्थं प्रकाराः सम्भवेयुः।

१. सामान्यशब्दकोषः– सामान्यशब्दकोषः सर्वसामान्यजनस्य उपयोगाय

भवति। तत्र शब्दानाम् अर्थाः तद्विषयकसामान्यविवरणं च प्राप्येरन्। अयं च कोषः पुनः भाषाभेदेन द्विधा भवेत्। संस्कृतशब्दानां संस्कृते एव विवरणं चेत् संस्कृतसंस्कृतकोषः इति। यदि भाषान्तरशब्दैः अर्थविवरणं तर्हि संस्कृत-तदितरभाषाकोषः इति भवति।

२. पारिभाषिकशब्दकोषः (Specialised Dictionary)– पारिभाषिकशब्दकोषः नाम विशिष्टविषयसम्बद्धशब्दानां कोषः। प्रतिशास्त्रं, प्रतिविषयं केचन पारिभाषिकशब्दाः भवन्ति। तेषां विवरणम् अस्मिन् कोषे भवेयुः। अयं च कोषः पुनः त्रिधा–

२.१. बहुविषयसम्बद्धकोषः (multi-field dictionary)– अत्र बहूनां विशिष्टविषयाणां शब्दाः विचार्यन्ते। यथा भारतीयदर्शनशब्दकोषः इति यदि कश्चन कोषः स्यात् तर्हि तत्र बहूनां दर्शनानां पारिभाषिकशब्दानां विचारः भविष्यति।

२.२. एकविषयसम्बद्धकोषः (single-field dictionary)– अत्र एकस्य एव विषयस्य शब्दाः विचार्यन्ते। यथा न्यायकोषः इति वक्तुं शक्यते। तत्र केवलं न्यायदर्शनस्य पारिभाषिकपदानाम् एव विचारः भविष्यति।

२.३. अवान्तरविषयसम्बद्धकोषः (sub-field dictionary)– ईदृशशब्दकोषे एकस्य विषयस्य अपि अवान्तरविषयसम्बद्धाः पारिभाषिकशब्दाः विचार्येरन्। यथा– पाणिनीयशब्दकोषः। संस्कृतव्याकरणशब्दकोषः इति स्वीक्रियते चेत् तत्र पाणिनीय-तदितरव्याकरणेषु उपयुक्तानां पारिभाषिकपदानां विचारः अपेक्षितः। किन्तु, पाणिनीयशब्दकोषे केवलं पाणिनीयतन्त्रे उपयुक्तानां पदानाम् एव विचारः स्यात्।

३. व्यवहारनिर्देशकशब्दकोषः (prescriptive dictionary)– अत्र शब्दकोषे शब्दानां प्रयोगः कथं करणीयः इति विषये निर्देशः भवति।

४. विवरणात्मकशब्दकोषः (descriptive dictionary)– अत्र शब्दकोषे शब्दानाम् अर्थादिकं विव्रियते।

अन्ये बहवः प्रकाराः भवन्ति शब्दकोषस्य। अस्माभिः एतावता प्रकारेण एव बालसाहित्यशब्दकोषस्य निर्माणं सुशकमिति धिया ते न विचार्यन्ते।

## बालसाहित्यशब्दकोषः

बालसाहित्यशब्दकोषः उपर्युक्तकोषप्रकारेषु एकविषयसम्बद्धः कोषः भवितुं अर्हति। किन्तु, अयं शब्दकोषः न सामान्यशब्दकोषः इव

भवेत्। यद्यपि तत्र सामान्यशब्दाः एव विषयीभूताः भविष्यन्ति। किन्तु, साधारणशब्दकोषः इव बालसाहित्यशब्दकोषः न भवेत्। बालसाहित्यशब्दकोषः वस्तुतः बहुविषयसम्बद्धशब्दकोषः इव विशिष्टशब्दकोषः। किन्तु न अयं पारिभाषिकशब्दकोषः। किन्तु, सत्याम् अपेक्षायां पदानां पारिभाषिकार्थाः अपि तत्र भवेयुः। अयं शब्दकोषः व्यवहारनिदेशकः अपि भवेत्, विवरणात्मकः अपि। साहित्यसर्जकानां कृते अयं शब्दकोषः व्यवहारनिदेशकः, पाठकानां च विवरणात्मकः।

आरम्भे शब्दकोषः संस्कृतभाषायाम् एव भवेत्। ततः प्रान्तीयभाषासु तस्य एव अनुवर्तनं शक्यम्। तेन समग्रदेशे बालसाहित्यशब्दकोषस्य समानता परिरक्ष्यते। पाठकानां सौकर्याय शब्दकोषे इमे विषयाः अवधातव्याः–

शब्दानां सङ्ख्यायां मितिः अपेक्ष्यते। कोषस्य अल्पकायत्वम् अवश्यं परिरक्षणीयम्।

किं किं विवरणं देयम् इति निश्चेतव्यम्। सामान्यतः शब्दस्य अर्थः, लिङ्गं, कस्य शब्दस्य इव तस्य रूपाणि चलन्ति इत्यादिविवरणानि भवेयुः।

शब्दकोषे शब्दानाम् अर्थाः विवरणसहिताः भवेयुः। अपेक्षायां सत्यां चित्राणि योजनीयानि। यथा–

वाष्पस्थाली (स्त्री– नदी[1]) पाकाय उपयुज्यमानः पात्रविशेषः। प्रेसर्-कुकर् इति नाम्ना प्रसिद्धं पात्रम्।[2]

शब्दकोषे धातूनाम् अपि विवरणम् अपेक्षितम्। परिगणितानां धातूनां सूचीं निर्माय तेषाम् एव धातूनां विवरणं देयम्। तत्र धातूनां विषये अपि कीदृशानि विवरणानि अपेक्ष्यन्ते इति विचारणीयम्। प्रायः धातोः अर्थः, गणः, लट्-लृट्-लङ्-विधिलिङ्-लकारेषु एकैकं रूपं, तव्य-अनीय-क्त-क्तवतु-शतृ-शानच्-ण्वुल्-तृच्-क्त्वा-ल्यप्-तुमुन्-प्रत्ययेषु रूपाणि च तत्र विवृतानि भवेयुः। कदाचित् भाषादृष्ट्या किशोरगणस्य कृते पृथक् शब्दकोषः क्रियेत चेत् तत्र लिट्-लुट्-लुङ्-आशीर्लिङ्-लृङ्-लकाराणां रूपाणि अपि प्रदीयेरन्।

कृदन्तशब्दानामपि पृथग्विवरणं भवेत्। तत्र कृत्प्रत्ययान्ताः शब्दाः देयाः।

[1]अत्र नदी इति पदेन नदी-शब्दस्य इव अस्य शब्दस्य रूपाणि चलिष्यन्ति इति ज्ञातव्यम्। अग्रे अपि एवम् एव बोध्यम्

[2]अत्र अस्य पात्रस्य चित्रं देयम्

यथा–

| |
|---|
| कर्तुम् (अव्ययम्) √कृ तुमुन्। (कृ-धातुं पश्यन्तु) |
| कुर्वत् (विशेषणम्– धावत्) √कृ शतृ। पुं– कुर्वन्, स्त्री– कुर्वती, क्ली– कुर्वत्। |
| कुर्वन् (विशेषणम् (पुं)– धावत्) √कृ शतृ। (कुर्वत् पश्यन्तु) |
| कुर्वती (विशेषणम् (स्त्री)– नदी) √कृ शतृ। (कुर्वत् पश्यन्तु) |

इत्थं शब्दकोषस्य विवरणात्मकता सम्पादनीया। सर्जकानां कृते अपि अत्र केचन व्यवहारसम्बन्धिनिर्देशाः दातव्याः। साहित्यसर्जकस्य याः समस्याः भवेयुः तासां निर्धारणेन इमे निर्देशाः वक्तव्याः। सामान्यतः उपरि विवेचनावसरे अस्माभिः विचारितं सर्जकस्य कीदृश्यः समस्याः भवेयुः। शब्दचयनम् एव तत्र मुख्या समस्या। शब्दस्य विवरणेन साकं शब्दचयनसम्बन्धिनिर्देशाः अपि यदि दीयन्ते तर्हि अयं कोषः व्यवहारनिदेशकः अपि भविष्यति। यथा–

| |
|---|
| पुत्र (पुं– राम) जनकस्य जनन्याः च सम्बन्धी पुमान्। [(शिशुः[३]। आत्मज, तनय, नन्दन[४]…)] |
| आत्मज (पुं– गोविन्द[५]) पुत्रः। [(किशोरः)] |
| मघवा (पुं– मघवन्) इन्द्रः। [(तरुणः। इन्द्र, देवराज, शक्र, शचीपति…)] |

तथा च तत्र अयं शब्दः कस्मिन् रसे उपयोगी कस्मिंश्च रसे निषिद्धः इति अपि विवरणं तत्र योजयितुं शक्यते।

एतादृशशब्दकोषेण बालसाहित्यसर्जकाः अपि उपकृताः भविष्यन्ति, पाठकाः अपि। सर्जकानां कृते ये निर्देशाः तेषाम् अर्थावगमनं यद्यपि पाठकानां न भवेत् तथापि तेन न महती हानिः। यतः पाठकानां कृते विवरणं पर्याप्तम्।

---

[३]अयं गणनिर्देशः। भाषादृष्ट्या कस्य गणस्य कृते अयं शब्दः प्रयोगार्हः इति विव्रियते अनेन।

[४]इमे पर्यायशब्दाः

[५]अत्र पूर्वस्मिन् विवरणे राम, अत्र गोविन्द इति कथनस्य तात्पर्यम् अस्ति। राम-शब्दे णत्वं भवति, गोविन्दशब्दे न भवति णत्वम्। तेन अकारान्तपुंलिङ्गेषु येषां शब्दानां णत्वं स्यात् तेषां प्रातिपदिकप्रकारः राम, अन्येषां गोविन्द इति वक्तव्यम्

किन्तु, एतादृशकोषस्य कलेवरबाहुल्यं तस्य प्रधानः क्लेशः। किन्तु प्रथमस्तरे स क्लेशः सोढव्यः। अस्य कोशस्य निर्माणात् परं सारल्येन अस्य विभाजनं कर्तुं शक्यते। द्वितीयस्तरे अस्माद् एव कोषाद् उपयोक्रनुसारिणः कोषाः पृथक्कर्तुं शक्यन्ते। यथा–

**शिशुकोषः**– अत्र शिशुगणोपयुक्ताः शब्दाः तथा विवरणम् अधिकम्। अस्मिन् चित्राणाम् आधिक्यं स्यात्। शब्दस्य परिचयात्मकः भागः त्यक्तुं शक्यः।

**किशोरकोषः**– अत्र किशोरगणोपयुक्ताः शब्दाः शिशुगणोपयुक्ताः शब्दाः च भवेयुः। चित्राणां न्यूनता कल्पयितुं शक्यन्ते।

**तरुणकोषः**– अयं पूर्वापेक्षया विस्तृतः कोषः भविष्यति। शब्दानां परिचयात्मकं विवरणादिकम् अपि देयम्।

**सर्जककोषः**– अत्र शब्दानां विवरणम् अपेक्षितं नास्ति। अस्य कोषस्य रचनप्रक्रिया शब्दावली (Glossary) इव भविष्यति। केवलं शब्दः, गणनिर्देशः, समार्थकशब्दाः च अत्र भवेयुः।

इत्थं बालसाहित्यस्य कृते शब्दकोषस्य निर्माणाय यत्नाः भवितुम् अर्हन्ति। तत्र व्यावहारिकशब्दानाम् आधिक्यं स्यात्। सम्प्रति कोषेषु अनुपलभ्यमानानाम् अपि शाक-पशु-विहग-वस्तु-यानादीनां कृते प्रयुज्यमानाः शब्दाः तेषां चित्रादिकं च योजनीयं भवेत्। एतेन बालसाहित्यस्य अपि प्रभूतम् औन्नत्यं साधयितुं शक्यते तथैव संस्कृतभाषायाः प्रयोगे अपि सर्वेषां महान् उपकारः स्यात् इति नः विश्वासः।

-★-

# मनूपदिष्टायाः शिक्षाव्यवस्थायाः साम्प्रतिकप्रासङ्गिकत्वविमर्शः

स्वपन-माझिः*

भारतीयसमाजसंस्कृतेः खनिपूर्णमणिजालं हि मनुसंहिता-नामकं धर्मशास्त्रम्। सदाचाराणां संस्काराणां च ज्ञापकं शास्त्रमेव धर्मशास्त्रपदवाच्यम्। सनातनहिन्दुधर्माणां कर्तव्यसमूहस्य स्वरूपं मनुसंहितायामेव समुपवर्णितम्। पुराणकालस्य विषयस्यात्र प्राधान्यात् स्मृतिशास्त्रनाम्नापि व्यपदिश्यते। धर्मशास्त्रस्य अभिधान्तरं हि स्मृतिशास्त्रम् – "धर्मशास्त्रं तु वै स्मृतिः"इति[१]। टीकाकृता कुल्लूकभट्टमहाभागेन आलोच्यश्लोकस्य व्याख्यायां न्यगादि – "मन्वादिशास्त्रं स्मृतिः"[२] इति। अत एव मनुसंहिता हि धर्मशास्त्रं स्मृतिशास्त्रं चोभयमेव। सुप्राचीनवैदिकसाहित्यसमयत आरभ्य ब्राह्मण-उपनिषद्-वेदाङ्गादियुगानां शिक्षाव्यवस्थां दर्शं दर्शं मनुमुनिना स्वकीये मनुसंहिताग्रन्थे शिक्षापद्धतिः निरूपिता। तां पद्धतिमाधारीकृत्य अद्यतनीयशिक्षया सह तुलनात्मकं समीक्षणं प्रस्तूयते।

## शिक्षा-शब्दस्य व्युत्पत्तिगतोऽर्थः

शिक्षाशब्दस्य व्युत्पत्तिः द्विधा कर्तुं शक्यते –

शिक्ष्-धातोः भावे अ-प्रत्यये स्त्रियां टापि शिक्षा-शब्दो निष्पाद्यते। यस्यार्थो हि – विद्याग्रहणम्[३] , अभ्यासः[४] , उपदेशश्च[५]।

शक्-धातोः सन्-प्रत्यये निष्पन्नात् शिक्ष्-शब्दाद् अ-प्रत्यये स्त्रियां टापि शिक्षा-शब्दो निर्मीयते। यस्यार्थो हि – शक्तेः प्रभावस्य वेच्छा, यत् कर्तुं समर्थः।

"Apte Dictionary" ग्रन्थे शिक्षा-शब्दस्य अर्थो भवति – ज्ञानम्,

---

*सहायकाचार्यः, संस्कृतविभागे, सुरेन्द्रनाथ-महाविद्यालयः।

[१]मनुसंहिता-१/१०।

[२]मनुसंहिता-१/१०।

[३]वङ्गीयशब्दकोषः।

[४]वाचस्पत्यम्।

[५]वाचस्पत्यम्।

शिक्षादानम् (Teaching), विनयश्च (Modesty)।

## शिक्षायाः संज्ञा

या मनुजनूनाम् अज्ञानरूपां तमिस्राम् अपाकृत्य ज्ञानप्रदीपं प्रज्वलितं करोति, सैव शिक्षापदवाच्या। यया केवलं जीविकार्जनं न भवति, अपि तु प्रकृतो मानवः सन् समाजे वसतिं करोति, सैव शिक्षा। अतो भारतनन्दनेन यतिप्रवरेण स्वामिविवेकानन्देन साधु खलु भणितम् –

"Education is the manifestation of perfection already in man", "Man-making and Character-building" इति।

कवीन्द्रेण रवीन्द्रनाथेन लोकहितप्रबन्धे व्यलेखि – "वयं शिक्षां वहनरूपां कुर्मः, न तु वाहनरूपाम्" इति।

संज्ञान्तरं हि – यत् कर्तुं शक्नोति, तदेव शिक्षा। शिक्षा न केवलं पाठ्यपुस्तकेभ्यो जायते, सर्वेभ्यः शिक्षार्जनं भवितुमर्हति। यथार्थशिक्षार्जनेन मानवः खलु सुखी स्यात्। तदुक्तम् –

"विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद् धनमाप्नोति धनाद्धर्मस्ततः सुखम्॥" इति।

धर्मशास्त्रकृता मनुना शिक्षार्जनं सर्वेभ्यः भवितुमर्हति इति सम्यग् निगदितम्। तेन विशेषतया वेदशिक्षाया विधिः विहितः। प्रस्तूयमानप्रबन्धे आधुनिकशिक्षयात्र विद्यालय-महाविद्यालय-विश्वविद्यालयानां शिक्षा ज्ञापिता। तया सह मनुमुनेः शिक्षाव्यवस्था समीक्ष्यते।

## शिक्षापद्धतिः

शिक्षापद्धतिः कीदृशी स्यादिति तु सुप्राचीनकाले उपनिषत्सु एव समुदीरितम्–

"सह नाववतु, सह नौ भुनक्तु, सह वीर्यम् करवावहै।
तेजस्वि नावधीतमस्तु, मा विद्विषावहै।"[६] इति।

अनेन वैदिकशान्तिमन्त्रेण कथ्यते –

१) यो वीतरागद्वेषः सन् शिष्याय यथार्थं शिक्षां प्रददाति, स एव प्रकृतः शिक्षकः।

२) यः सश्रद्धाभक्तिः गुरोः समीपात् शिक्षां गृह्णाति, स एव प्रकृतः छात्रः। तथा चोच्यते श्रीमद्भगवद्गीतायाम् – "श्रद्धावान् लभते ज्ञानम्" इति।

अत एव समानमनस्कयोः गुरुशिष्ययोः परस्परानुकूल्ये शिक्षादानं

[६] कृष्णयजुर्वेदः, तैत्तिरीयोपनिषद्।

शिक्षाग्रहणं च सम्यक् स्यात्, यथा नृपसचिवयोः आनुकूल्ये राज्यस्य समृद्धिः जायते। प्रसङ्गेऽस्मिन् श्लोकांशः अनुसन्धेयः –

"सदानुकूलेषु हि कुर्वते रतिं ।
नृपेष्वमात्येषु च सर्वसम्पदः।"[७]इति।

## मनुसंहितायाः समाजः

धर्मशास्त्रकारस्य मनुमुनेः शिक्षाव्यवस्थाया आलोचनायाः पूर्वं तत्कालीनसमाजव्यवस्थाया ज्ञानं किञ्चिद् आवश्यकम्, यदवलम्ब्य शिक्षाव्यवस्था निर्मिता। मनुना प्रकल्पितस्य समाजस्य प्रधानभित्तिः हि वर्णाश्रमव्यवस्था। गीतायामपि गीतं भगवता श्रीकृष्णेन –

"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागतः"[८] इति।

मनुनये चतुर्वर्णेषु ब्राह्मणस्य एव प्राधान्यं कीर्तितम्। चतुर्वर्णानां कर्तव्यं कर्म हि –

ब्राह्मणः > अध्ययनम्, अध्यापनम्, यजनम्,याजनम्, दानम्, प्रतिग्रहः।

क्षत्रियः > अध्ययनम्, यजनम्, दानम्, पशुपालनम्, जीविकार्जनम्।

वैश्यः > अध्ययनम्, यजनम्, दानम्, पशुपालनम्, कृषिः, वाणिज्यकर्म।

शूद्रः > द्विजातेः सेवा, पशुपालनम्, कृषिः, वाणिज्यकर्म, शिल्पकर्म।

एतेन ज्ञायते केवलं ब्राह्मण-क्षत्रिय-वैश्या वेदशिक्षाग्रहणे उपयुक्ताः। तत्र शूद्राणां स्थानं नास्त्येव।

आश्रमपदेन ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ-सन्न्यासानां ग्रहणम्।

## मनुसंहितायाः शिक्षाव्यवस्था

मनुमुनिना मनुसंहिताग्रन्थे सकलप्रकारविद्यानां यथा वेद-वेदाङ्ग-पुराण-तर्कशास्त्र-नीतिशास्त्र-नृत्यगीतादि-दण्डनीति-ब्रह्मविद्या-वार्ता-पशुपालनादीनाम् उल्लेख विहितः। वेदविद्याविषये तेन विशेषविधिः विधीयते।वेदविद्यामृते सर्ववर्णानां मानवाः सर्वां विद्यां शिक्षितुं पारयन्ति। हीनजतीयस्य मानवस्य समीपादपि ब्राह्मणादयः श्रेयस्करीं विद्यां ग्रहीतुं शक्नुवन्ति। ब्राह्मणाः, क्षत्रियाः, वैश्याश्च केवलं वेदविद्यायाम् अधिकारिणः। मनुमते – आदौ तत्र काचन परिषद् विद्यासभा वा निर्मिता स्यात्, यतः शिष्टा ब्राह्मणाः तत्रागत्य शास्त्रालोचनां

---

[७]किरातार्जुनीयम् – १/५।

[८]गीता – ४/१३ ।

विदधति। के शिष्टा ब्राह्मणाः, तेऽपि मनुना प्रोक्ताः –

"धर्मेणाधिगतो यैस्तु वेदः सपरिवृंहणः।
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः॥"[९] इति।

उपनयनसंस्कारात् परमेव गुरुगृहे द्विजातेः प्रकृतशिक्षा आरभ्यते। साधारणतो ब्राह्मणस्य अष्टमवर्षे, क्षत्रियस्य एकादशवर्षे, वैश्यस्य च द्वादशवर्षे उपनयनविधौ सत्यपि क्षेत्रविशेषेण उपनयनसंस्कारोऽयं यथाक्रमेण पञ्चमे, षष्ठे, अष्टमे च वर्षे विधीयते[१०]। उपनयनसंस्कारो यदि निर्दिष्टे काले न जायते तर्हि ते विद्यालाभाद् वञ्चिताः स्युः, समाजे च "व्रात्य" इत्यभिधया अभिधीयते। उपनयनसंस्कारात् परं गुरुदेव आदौ शिक्षार्थिभ्यो यथाक्रमं वाह्यिक-आन्तरशुद्धिकर्मत आरभ्य शिष्टाचारम्, अग्निकर्म, सन्ध्यावन्दनाञ्च शिक्षयति –

"उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः।
आचारमग्निकार्यञ्च सन्ध्योपासनमेव च॥[११]।इति।

विद्यालाभस्य प्रारम्भे विद्यार्थी अपि शुद्धवस्त्रं परिधाय संयतचित्तेन च गुरोः समीपाद् विद्यालाभं कर्तुम् आरभते। उपनयनत आरभ्य समावर्तनात् पूर्वं विद्यार्थिना गुरुगृहे वसतिं कृत्वा एव शिक्षा लभ्यते।

## गुरोर्भेदः

तदानीन्तने समाजे गुरुः द्विविध आसीत् – आचार्यः, उपाध्यायश्च। यो व्याख्यासहितं सकलं वेदशास्त्रम् अध्यापयति, स खलु आचार्यपदम् अलङ्करोति –

"उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते॥[१२] इति।

अपरतो वेदस्य एकदेशं मन्त्रं ब्राह्मणं च, वेदरहितानि व्याकरणादीनि अङ्गानि यो वृत्त्यर्थम् अध्यापयति, स उपाध्यायनाम्ना व्यपदिश्यते –

"एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः।
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते॥[१३] इति।

---

[९]मनुसंहिता – १२/१०९ ।
[१०]मनुसंहिता – २/३६, ३७ ।
[११]मनुसंहिता – २/६९।
[१२]मनुसंहिता – २/१४०।
[१३]मनुसंहिता – २/१४१।

मनुनये आचार्याद्, उपाध्यायात्, पितुः अपेक्षया माता एव प्रकृतो गुरुः।[१४]

## शिष्याणां भेदः

मनुसमये शिष्यो विद्यार्थी वा द्विविधः– श्रोत्रियः शास्त्री च।

गुरुकुले निवासी शिष्योऽपि द्विविधः –

१) स्नातकः – गुरुगृहे शिक्षां समाप्य गृहं प्रत्यागम्य विवाहसम्पादनपूर्वकं संसारधर्मं पालयति।

२) नैष्ठिकः – आजीवनं ब्रह्मचारी सन् गुरुगृहे वसन् गुरुं शुश्रूषते यः, स नैष्ठिक इत्युच्यते।

स्नातकः पुनस्त्रिविधः– १) वेदस्नातकः २) विद्यास्नातकः ३) व्रतस्नातकः।

१) ये वेदाध्ययनस्य समाप्तं चक्रुः।

२) ये वेदशिक्षाया अर्थज्ञानं लब्ध्वा विद्यासमाप्तं कृतवन्तः।

३) ये षट्-त्रिंशत्समा वेदत्रयस्य सम्पूर्णम् अध्ययनं कृत्वा वेदान्तं विचारयामासुः।

मनुमते धर्मतो गुरोः अध्यापनाया योग्याः शिष्या दश जनाः – १) आचार्यपुत्रः २) शुश्रूषापरायणव्यक्तिः ३) ज्ञानदः ४) धार्मिकः ५) शुचिः ६) स्वात्मीयः ७) यः सुलभतया विद्यामादत्ते ८) अर्थदानकारी ९) हितकामी १०) स्वपुत्र उपनीतः शिष्यो वा। तथा चोक्तं मनुना –

"आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः।
आप्तः शक्तोऽर्थदः साधुः स्वोऽध्याप्या दश धर्मतः॥"[१५]" इति।

## नारीशिक्षा

इह खलु संसारे यत्र नार्य्यो न पूज्यन्ते तत्र देवा अपि प्रसन्ना न जायन्ते। तथा चोच्यते धर्मशास्त्रकृता –

"यत्र नार्य्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥"[१६] इति।

अत एव धर्मशास्त्रकृता नार्य्यः प्रति सम्यक् सम्मानं प्रदर्श्यते। तेन एतदपि निगदितम् –

---

[१४]मनुसंहिता – २/१४५।

[१५]मनुसंहिता – २/१०९।

[१६]मनुसंहिता – ३/५६।

"कन्याप्येवं पालनीया शिक्षणीयेति यत्नतः" इति।

एतेन ज्ञायते कन्याभिः शिक्षापि गृह्यते। परन्तु वेदविद्याविषये मनुमुनिः चरम उदासीन आसीत् –

"नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्मे व्यवस्थितिः।
निरिन्दिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः॥"[१७] इति।

अपरस्मृतिशास्त्रादिग्रन्थेषु नारीणां वेदाध्ययनस्य अध्यापनायाश्च विधानं वर्तते। अतो बह्व्यो रमण्यः अध्यापिकाः, शिष्याः. तपस्विन्यः, ब्रह्मवादिन्यः चेत्यादीनां नाम प्राप्यते। यथा – लोपमुद्रा, विश्ववारा, आम्भृणी वाक्, पौलोमी, रोमशा चेत्यादिन्यो वैदिकयुगे द्विजपुरुषवद् रमणीनामपि उपनयनसंस्कारः अभवत्, ता वेदमपि अधीयते अध्यापयन्ति च। परन्तु मनुनये स्त्रीलोकानां विवाहसंस्कार एव वैदिकोपनयनरूपेण उल्लिख्यते[१८]। अत एव नार्य्यो वेदाध्ययने नोपयुक्ताः। नारीशिक्षां प्रति उदासीनतायाः कारणमासीत् – पुरुषा इव नारीणां शारीरिकशुचिताभावः।

## शिक्षायामवकाशः

निरन्तरम् अध्ययनकर्मणि कदाचिद् विराम आवश्यकः। तेन अध्ययनं प्रति आग्रह एव वर्धितः स्यात्। मनुनापि अध्ययनस्य कतिपया दिवसा अनध्यायरूपेण उल्लिखिताः –

१)विद्युद्गर्जनसमन्वितवर्षादिवसः
२) भूमिकम्पसमयः
३) जनसमागमसमयः
४) अधार्मिकसमीपे
५) उच्छिष्टमुखे
६) अमावस्या, चतुर्दशी, अष्टमी, पौर्णमासी च।
७) दुर्गन्धयुक्तस्थाने
८) क्रन्दनध्वनियुक्तस्थाने[१९]

तथापि अनध्यायदिवसे षड्वेदाङ्गानामध्ययने नासीत् कापि विप्रतिपत्तिः। किञ्च, नित्यकर्मसन्ध्यावन्दनादिसमये वेदमन्त्रा अपि उच्चार्य्यन्ते।

---

[१७]मनुसंहिता – ९/१८।

[१८]मनुसंहिता – २/६७।

[१९]मनुसंहिता – ४/१०३>१०९,११४।

## वर्तमानप्रासङ्गिकता

मनुसंहितायाः शिक्षादर्शविषये यानि तथ्यानि संगृहीतानि, वर्तमाने तेषां प्रासङ्गिकता वर्तते एव। अतो मनुशिक्षाव्यवस्थया सह अद्यतनीयशिक्षायाः तुलनात्मकं समीक्षणं विधीयते –

प्रथमतः, मनुमुनेः शिक्षाव्यवस्थायां काचन परिषत्सभा निर्मिता, यत्र विद्यार्थिनो विद्याचर्चां विदधति। अद्यत्वे सा सभा विद्यालये, महाविद्यालये, विश्वविद्यालये च "Workshop Or Seminar" परिणतिं प्राप्ता।

द्वितीयतः,शिक्षक-छात्रयोः मध्ये यथाक्रमं पाठदानस्य तथा पाठाभ्यासस्य रीतौ यद् विभाजनं दृष्टम्, तद् वर्तमानकालीनशिक्षाव्यवस्थायां प्रचलितपाठ्यक्रमभित्तिका विभाजनरीतिः।

तृतीय तः, मनुसंहितायाम् अध्ययनस्य कतिपया दिवसा अनध्यायरूपेण उल्लिखिताः। वर्तमाने अपि विद्यालये, महाविद्यालये, विश्वविद्यालये च बहवः अवकाशा वर्तन्ते। परन्तु अद्यनते काले अवकाशविषये विधिः भिन्नत्वं प्रतिपद्यते।

चतुर्थतः, धर्मशास्त्रकारसमये शिक्षाविषये जातिगतो भेद आसीत्। सम्प्रति तन्नास्त्येव, अपि तु आर्थिकं वैषम्यं दरीदृश्यते।

पञ्चमतः, मानवशास्त्रे नारीगणः वेदशिक्षातो वञ्चित आसीत्। आधुनिककाले सार्वजनीनशिक्षानीतिः (Mass-education) आश्रिता। अधुना जातिधर्मनिर्विशेषेण सर्वैः सर्वाभिश्च शिक्षा गृह्यते। केन्द्रियसर्वकारैरपि तादृशी व्यवस्था अवलम्ब्यते। न्यगादि च स्वामिविवेकानन्देन –

"A nation is advanced in proportion as education and intelligence spreads among the masses." इति।

षष्ठतः, मनोः युगे आचार्य उपाध्यायश्च शिक्षक इव अद्यत्वेऽपि समाजे शिक्षकस्य विभाजनद्वयम् अवलोक्यते। केचन शिक्षकाः निःस्वार्थतया छात्रान् पाठयन्ति। अपरतश्च केचन रूप्यकाणि (Money) नीत्वा छात्रान् पाठयन्ति। यत् सम्प्रति "Tuition" इति नाम्ना परिचीयते।

सप्तमतः, पुराकाले गुरुगृहे वसतिं कृत्वा पठनपाठनरीतिः प्रचलिता आसीत्। वर्तमाने तादृशी व्यवस्था नास्ति। परन्तु "Hostel" इति स्थाने वासं वासं छात्रा विद्यालये, महाविद्यालये, विश्वविद्यालये च पठन्ति।

परिशेषे एतदेव कथयितुं शक्यते – तत्कालीनसमाजव्यवस्थानुसारं मनुमुनेः शिक्षादर्शे शिक्षार्थिनो यथा शिक्षां लभन्ते तथैव धर्मशास्त्रकारस्य

**कतिपयक्षेत्राणि विहाय आधुनिकशिक्षाव्यवस्थापि तादृशी आधुनिकी जायते। मनोः शिक्षाव्यवस्थां पर्यालोच्य थिओसफिक्याल-सोसाइटिनामकस्थानस्य अध्यक्षपादेन ड.वि.एस.आराण्डेलमहाभागेन साधु खलु न्यगादि –**

"I am very clear after forty years experience of educational work in India that we shall never have National Education in this country until we have an education system which brings out the fundamental principles of living as set forth by Manu." [२०] **इति।**

-★-

[२०]**मनोः वर्णाश्रमवर्णः, पृ.१४२ ।**

# वर्तमानसन्दर्भे सम्पादनात्मकशोधप्रविधिविमर्शः

सच्चिदानन्दस्नेही*

सम्प्रति सर्वेषु संस्कृतविश्वविद्यालयेषु महाविद्यालयेषु शिक्षासंस्कृतिसंस्थानेषु च संस्कृतवाङ्मये प्रवर्त्तमानेषु विभिन्नेषु शोधप्रकारेषु[१] सम्पादनात्मकशोधप्रविधेः विशेषतः पाण्डुग्रन्थानां संरक्षणाय सम्पादनाय च परिचर्चापरिदृश्यन्ते। सुविदितमेव यत् भण्डारकर-प्राच्य-शोध-संस्थान पुनानगरे स्थिता ऋग्वेदस्य मातृका यूनेस्को इत्यस्य विश्वैतिह्यसूच्यां (for inscription in UNESCO'S Memory of the world register 2007) प्रवेशिता। इदानीं जिज्ञास्यते यत् संस्कृतवाङ्मये प्रवर्त्तमानाः साम्प्रतिकशोधप्रवृत्तयः के? तासु शोधप्रविधिषु कस्याः प्रविधेः चयनं मम् शोधकार्याय युक्तियुक्तमुपादेयञ्च भवेदित्यादयो बहवः प्रश्नाः समागच्छन्ति।

अतः जिज्ञासा स्वाभाविकी यत् किन्नाम सम्पादनम्? सम्पादनं कतिविधम्? पाण्डुग्रन्थानां नाना प्रकाराः कति सन्ति?, पाण्डुलिपीनां कालनिर्णयः कथं भवेत्?, पाण्डुग्रन्थसम्पादने सूचनाप्रौद्योगिकीनामुपयोगं कथं कर्तुं शक्नुमः? पाण्डुलिपिसङ्ग्रहकेन्द्राणि कुत्र सन्ति यतः वयं पाण्डुग्रन्थानां छायाप्रतिं प्राप्तुं शक्नुमः? पाण्डुग्रन्थानां छायाङ्कनाय प्रक्रिया का? पाण्डुलिपिसम्पादनस्य प्रक्रियां कथं ज्ञातुं शक्नुमः? पाण्डुग्रन्थप्रकाशनस्य ज्ञानं कथं प्राप्यते? आधारमातृकायाः चयनं कथम्? पाण्डुलिपिसम्पादने पुष्पिकायाः महत्त्वं किम्? के च संस्कृतविश्वविद्यालयाः यत्र पाण्डुग्रन्थानां सम्पादनं शिक्ष्यते? पाण्डुग्रन्थानां सम्पादनायोपयोगिनः संस्कृतसन्दर्भितशोधपत्रिकाणां माहात्म्यं किम्? उत्तमाः

---

*सहायकाचार्यः, व्याकरणविभागे, जे.एन्.बि.आदर्शसंस्कृतमहाविद्यालये लगमास्थिते

[१]डॉ० सत्यनारायण आचार्यः, संस्कृतशोधप्रविधिः, पृ० सं० ११, राष्ट्रियसंस्कृतसंस्थान, पुरी। संस्कृतवाङ्मये प्रवर्त्तमानाः केचन विशिष्टाः; अतिप्रचलिताः शोधप्रविध्यः सन्ति–
१. सम्पादनात्मकशोधप्रविधिः २. विश्लेषणात्मकशोधप्रविधिः ३. तुलनात्मकशोधप्रविधिः ४. समीक्षात्मकशोधप्रविधिः ५. व्यक्तित्वाध्ययनात्मकशोधप्रविधिः ६. सर्वेक्षणात्मकशोधप्रविधिः ७. भाषान्तरीयानुवादात्मकशोधप्रविधिः।

सुसम्पादिताः शोधग्रन्थाः के सन्ति? सम्पादनाय प्रबन्धानामवलोकनं कथं भवेत्? एषा मातृका प्रकाशिता अप्रकाशिता वा इति कथं ज्ञातुं शक्नुमः? अत एतेषां प्रश्नानां समाधानार्थं विशेषतः सम्पादनात्मकशोधप्रविधेः व्याख्यानाय च शोधपत्रमिदं विलिख्यते।

सम्पादनात्मक-विश्लेषणात्मक-तुलनात्मक-विमर्शात्मक-सर्वेक्षणात्मकभेदेन प्रचलिताः शोधप्रविधयः सन्ति। एतासु शोधप्रविधिषु प्राच्यपाण्डुग्रन्थानां सम्पादनात्मकशोधप्रविधेः स्थानमत्यन्तं महत्त्वपूर्णं विद्यते यतो हि अनुमीयते यत् भारते विदेशे च विभिन्नेषु ग्रन्थालयेषु, संग्रहालयेषु च एककोट्यधकिसंख्यकाः पाण्डुग्रन्थाः; डवतम जींद वदम ब्तवतम डंदनेबतपचजेद्ध सुरक्षिताः, प्रकाशनप्रतीक्षाधीनाश्च; असम्पादिताश्च सन्ति। अतः लुप्तप्रायस्य संस्कृतवाङ्मयस्य पुनरुद्धाराय सम्पादनात्मकशोधकार्यस्य विस्तारः अत्यावश्यकः वर्तते।

भारते नाना शिक्षणसंस्थासु, मन्दिरेषु, पुस्तकालयेषु, संग्रहालयेषु, शास्त्रागारेषु च सहस्रादिकवर्षप्राचीना अत्यन्तदुर्लभाः पाण्डुग्रन्थाः सन्ति। राष्ट्रियसंस्कृतसंस्थानस्यान्तर्जाले[२] संस्कृतस्य विकासाय दशवर्षीया योजना (Vision and Road Map for the developmentof Sanskrit Ten Year perspective plan) इति कश्चित् अभिलेखः प्रस्तुतः। तत्र योजनायाः प्रारूपे पाण्डुलिपीनां सम्पादनाय प्रकाशनाय च महत्त्वं प्रदर्शयन्नाह– “भारतदेशे पञ्चचत्वारिंशत् लक्षाधकिपाण्डुग्रन्थाः (More than fifty Lacs Manuscripts) सन्ति। तेषु 60% पाण्डुलिपयः संस्कृतभाषायां, देवनागरी-बङ्-नेवारी-ग्रन्थ-उडियादिषु चतुर्दशभारतीयालिपिषु लिखिताः वर्तन्ते। तासु लक्षाधकिपाण्डुलिपयः सुरक्षिताः प्रकाशनायोपलब्धाश्च विद्यन्ते। परञ्च तेषां ग्रन्थानां सम्पादनाय कुशलाः सम्पादकाः, अनुवादकाः, विषयविशेषज्ञाः, लिपिज्ञातारश्च अनुपलब्धाः सन्ति। अतः एतेषां प्राप्त्यर्थं पाण्डुग्रन्थसम्पादनाय च संस्कृतसंस्थासु अधकिाधकिपाण्डुलिपिसम्पादनप्रशिक्षणकार्यशालानां पाठ्यक्रमाणां सञ्चालनमपेक्षते।

भारतसर्वकारस्य संस्कृतिमन्त्रालयस्याधीनेसञ्चालिते ‘राष्ट्रियपाण्डुलिपि-मिशन्’ इति संस्थायाः अन्वेषणानुसारं सम्प्रति भारते चतुर्दशविभिन्नासु

[२]On the website of Rashtriya Sanskrit Sansthan www.sanskrit.nic.in

लिपिषु लिखिताः पञ्चचत्वारिंशत्-लक्षाधिकपाण्डुलिपयः; (More than 45 lacs manuscripts), चतुसहस्राधिकेषु (In more than 4000 institutions) पुस्तकालयेषु, मन्दिरेषु, ग्रन्थालयेषु वा उपलभ्यन्ते। तथा चानुमीयते यत् लक्षाधिकिपाण्डुग्रन्थाः अतीव महत्त्वपूर्णा अप्रकाशिताः सन्ति। न केवलं वर्तमानसन्दर्भे एते पाण्डुग्रन्थाः साहित्यदृष्ट्या शोधविषये, व्यवहारे; लौकिकजीवनक्षेत्रे महत्त्वपूर्णाः सन्ति अपितु पारलौकिकजीवनायापि चोपयोगिन्यः भविष्यन्तीति। अतः एतेषां पाण्डुग्रन्थानां सम्पादनपूर्वकं प्रकाशनं करणीयमस्माभिः।

पाण्डुग्रन्थानां सम्पादनमत्यन्तं दुरूहं कार्यम्। प्रायः पाण्डुग्रन्थानां वाक्येषु शिरोरेखाहीनं क्रमिकं लेखनं, विरामचिह्नादिनामभावः च प्राप्यते। तत्र वाक्यज्ञानाय प्रथमं तावत् पदच्छेदः ज्ञातव्यः। नानापदच्छेदैः अर्थज्ञाने संशयः जायते। लिपिज्ञाने अपि महान् परिश्रमः अपेक्ष्यते। लिप्यादिनां; लिपिज्ञान-भाषाज्ञान-सन्धिसमासादिसंस्कृत-व्याकरणतत्त्वानां ज्ञानं विना स नैव सम्भवति। पाण्डुलिपीनां सम्पादनाय व्याकरणशास्त्रस्य सन्धि-समास-कारक-लिङ्ग-वचन-विभक्ति-प्रत्यय-उपसर्ग-स्त्रीप्रत्ययादिविविधानां नियमानां ज्ञानमत्यन्तमपेक्षितं भवति। भवन्तः जानन्ति एव यत् पाण्डुग्रन्थानां सम्पादनाय सम्पादनात्मकशोधप्रविधेः प्रयोगो भवति। पाण्डुग्रन्थसम्पादने सम्पादनाय नानाशास्त्राणां विशेषतः व्याकरणशास्त्रस्यज्ञानमपेक्षितमस्ति। नानाविधशास्त्रैः सह तत् सम्बन्धति– विषयस्य च ज्ञानमत्यन्तमपेक्षितम्। पाण्डुलिपिसम्पादने विशेषतः अर्थज्ञानाय व्याकरणस्य, कालस्य ज्ञानाय ज्यौतिषशास्त्रास्य च महती उपयोगिता सिद्ध्यति। यतो हि व्याकरणस्य ज्ञानाऽभावे पाण्डुग्रन्थानां सम्पादनं नैव कर्तुं शक्यते।

पाण्डुग्रन्थस्यापरनामानि सन्ति– १. मातृका २. पण्डुलिपिः ३. पुस्तकम् ४. पोथी इत्यादयः। भ्रान्तिमूलकमिदं यत् लेखक एव ग्रन्थप्रणेता भवति। प्रायः लेखकेभ्यः रचनाकारः भिन्नः भवति। रचनाकारः, ग्रन्थप्रणेता, कृतिकारः आंग्लभाषायां (Author) इति पदेनोच्यते। लेखकः, लिपिकारः, कायस्थः इत्यादयः आंग्लभाषायां (Scribe) इति पदेनोच्यते।ज्ञानविज्ञानयुक्ताः हस्तलिखिताः शास्त्रीयग्रन्थाः येषामैतिहासिकं साहित्यिकं सांस्कृतिकं च महत्त्वं भवति 'पाण्डुलिपिः, पाण्डुग्रन्थः मातृका वा, आंग्लभाषाम् (Manuscript) इति

पदेनोच्यते। लिपिविज्ञाने उक्तं यत् लेखनाय वस्तुत्रयमपेक्षितम्– १. आधरः; यस्योपरि विलिख्यते यथा कर्गदादयः २. लेखनसामग्री; येन विलिख्यते यथा लेखन्यादयः ३. भाषायाः लिपेः ज्ञानं च; यस्यां भाषायां लिप्यां च विलिख्यते तस्याः ज्ञानम्। प्राचीने काले शिलासु, स्वर्णरजतताम्रादिभ्यः निर्मितेषु धतुपत्रेषु-भूर्जपत्रेषु-ताडपत्रेषु-पटेषु तथा च उत्तरकाले कर्गदादिषु लेखनं भवति स्म। प्राचीनकाले लिखिताः उपर्युक्ताः ग्रन्थाः पाण्डुलिपिरूपेणेदानीं सम्प्राप्ताः सन्ति।

पाण्डुग्रन्थेषु नानाविधविषयाः सग्रंहीताः सन्ति। तेषु वेदाः, पुराणानि, वेदाङ्गानि, भाषा, साहित्यं, सूक्तकाव्यानि, महाकाव्यानि, खण्डकाव्यानि, कथा, नाट्यशास्त्राम्, व्याकरणं, ज्यौतिषं, शिक्षा, दर्शनानि, र्धमः, आधयात्मं, समाजशास्त्राम्, राजनीतिविज्ञानं, गणितम्, शारीरिकशिक्षाशास्त्राम्, अर्थशास्त्राम्, इतिहासः, खगोलविज्ञानम्, आयुर्वेदविज्ञानम्, संगीतशास्त्राम्, योगशास्त्राम्, बालकथासाहित्यमित्यादयः प्रमुखाः विषयाः सन्ति। पाण्डुलिपिविषयकविविधनि शोधकृत्यानि सन्ति– पाण्डुग्रन्थान्वेषणम्, संरक्षणम्, पाठसम्पादनम्, सम्पादितपाठस्यानुवादकार्यम्, पाण्डुलिपेः ईछायांकनम् (Microfilming, Digitization), लिपेः उद्भेदनं, लिपिप्रशिक्षणम्, कालगणनादयश्च।

प्रायः पाण्डुग्रन्थाः विभिन्नेषु आसनेषु; आधरेषु यथा– ताडपत्रेषु भूर्जपत्रेषु, कर्पासपत्रिकासु, ताम्र-स्वर्ण-रजतपफलकेषु, शिलापट्टेषु, मृतिकशापफलकेषु, चर्मपफलकेषु काष्ठपफलकेषु,; पेपिरसपफलकेषु कर्गदादिषु च विलिखिताः प्राप्यन्ते। पाण्डुग्रन्थाः द्विविधेषु स्थलेषु १. व्यक्तिगतस्थलेषु; परम्परागतपरिवारेषु, मन्दिरेषु, मठादिषु २. सार्वजनिकस्थलेषु; पुस्तकालयेषु, संग्रहालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु, प्राच्यागारादिषु च लभ्यन्ते। पाण्डुग्रन्थानां संरक्षणं द्विविधम्– १. संग्रहालयादिषु भौतिकपुस्तकानां यथावत् संरक्षणम् (Preventative & Curative Prevention of manuscripts) २. पाण्डुग्रन्थानां ईप्रणाल्याः प्रतिलिपिजनितं संरक्षणम् (Microfilming, Digitization) इत्यादिमाधयमेन च क्रियन्ते।

सम्पादनस्योद्देश्यमस्ति ग्रन्थकर्तुः रचनाकारस्य वा मूलपाठस्य संस्थापनं, मूलं प्रति गमनं वा।सम्पादनात्मकशोधकार्येणानेन लोके लुप्तप्रायस्य ग्रन्थस्य पुनरुत्पत्तिः जायते। 'सम् पूर्वकात् पद्-धतोः ल्युट्' प्रत्ययेन प्रकृष्टार्थे सम्यक्

प्रतिपाद्यते गम्यते अनेनेति 'सम्पादनमिति' (Editing generally means a Systematic arrangements of author's work for presentation with necessary modification, revision and deletion as per the requirements of the editor.)[३] पदं निष्पद्यते। विविधयुक्तिभिः निर्मितोऽयं समालोचनात्मकः लघुशोधप्रबन्धः प्रामाणिकत्वेन स्वीक्रियते। किञ्च प्राचीनकाले एकस्यैव ग्रन्थस्य नानापुस्तकानां लिपिकारैः लिखित्वा संरक्षितम्। ते देशस्य अनेकेषु स्थानेषु स्वकीयग्रन्थस्य प्रचारप्रसाराय संरक्षणाय च प्रेषयन्ति स्म। तासु विविधासु मातृकासु देशस्य कालस्य लेखकस्य भेदेभ्यः भाषान्तरणकाले पाठभेदोऽपि जायते स्म। कदाचित् कालक्रमेण जनितोऽयं पाठभेदः विविधार्थान्तरान् जनयति। तदानीं अध्ययनाध्यापनकाले पाठस्य व्याख्याने पाठभेदजनितो संशयः जायते। तन्निवारणाय शुद्धपाठस्य निर्णयाय च एकाधिकानां मातृकाणां पाठभेदेन शुद्धपाठः अपेक्षते। अतः सम्पादनात्मकः शोध अत्यावश्यकः। शोधकार्येऽस्मिन् शोधकर्ता; सम्पादकः पाण्डुलिपिगतं मूलतथ्यं संरक्षयन् ग्रन्थकारस्य लेखकस्य वा मौलिकं पदसंयोजनं च अपरिवर्त्त्य शुद्धपाठं निर्णयति। प्राचीनसंस्कृतग्रन्थानां प्रकाशनं सम्पादकस्य कुशाग्रबुद्ध्या विषयगतपाण्डित्येन च सम्पादनात्मकशोधप्रविधेः अनुसारं विधीयते। सम्प्रति त्रिविधं सम्पादनं; सम्पादानात्मकशोधप्रविधीनां प्रयोगः दृश्यन्ते। तच्च–

१. शोधपत्राणां सम्पादनं पुस्तकनिर्माणञ्च– अस्मिन् सम्पादनकर्मणि सम्पादकः सम्पादकमण्डलं वा एकस्य विषयस्योपरि आलेखनां संग्रहं कृत्वा प्रकाशयति।

२. पाण्डुग्रन्थानां सम्पादनं प्रकाशनं वा– अस्मिन् सम्पादनकर्मणि सम्पादकः सम्पादकमण्डलं वा एकस्य अप्रकाशितस्य पाण्डुग्रन्थस्ययथासंभवे; न्यूनातिन्यूनाः त्रिस्त्रः मातृकाः स्वीकृत्य पाठान् अन्वीक्ष्य मूलमातृकामाधरीकृत्य शुद्धपाठस्य समालोचनां कृत्वा प्रकाशयति।

३. समालोचनात्मकं संस्करणम्[४]– अस्यां प्रविधौ प्रकाशितग्रन्थानां

[३]K.C. Dash, Elements of Research methodology in Sanskrit, Page No. 57, chokambha Sanskrit Sansthan, Varanashi

[४]K.C. Dash, Elements of Research methodology in Sanskrit, Page No. 57, chokambha Sanskrit Sansthan, Varanashi (Critical Edition is a representation of an author's work Without involving any change from the editors view

पाण्डुग्रन्थेभ्यः मूलपाठेभ्यश्च तुलनात्मकमधययनं विधय शुद्धपाठपुरस्सरं समालोचनात्मकं संस्करणं प्रकाशयति।

अस्य सम्पादनात्मकशोधस्य माहात्म्यं मौलिकपुस्तकरचनावदेव भवति। अप्रकाशितस्य लुप्तप्रायस्य जराजीर्णस्य कीटद्रंष्टस्य पाण्डुग्रन्थस्य जीर्णोद्धाराय सम्पादनात्मकं शोधकार्यमपेक्षते। "पाण्डुग्रन्थानां सम्पादनं यद्यपि नवीनतां न सृजति तथापि मौलिकतां न हन्ति।"[५] पूर्वलिखितस्य पाठस्य संशोधनेन शुद्धपाठप्रदर्शनपुरःसरं मूलपाठनिर्णयात्मकः शोधः अत्र जायते। तथा च संसारेऽस्मिनीश्वरेतरः मौलिकरचनाकारः न कोऽपि विद्यते। यत् सर्वं पूर्वमीश्वरेण रचितं तस्य वचोविन्यासमात्रां कविभिः रचनाकारैः वा क्रियमाणं विद्यते। यथाप्रतिपादितं न्यायमञ्जरीति ग्रन्थे–

कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः।
वचो विन्याससवैचित्र्यमत्र विचार्यताम्॥[६]

पाण्डुलिपिशास्त्राणां न केवलं कलाऽपितु विज्ञानमप्यस्ति। सर्वे विद्वांसः मन्यन्ते यत् पाण्डुलिपिशास्त्रं न केवलं कला; अपितु विज्ञानमप्यस्ति अतः पाण्डुलिपिविज्ञानं (Manuscriptology) इति नाम्ना अपि अभिधीयन्ते। किञ्च पाण्डुलिपिशास्त्रं विज्ञानं भवितुमर्हति यतो हि पाण्डुलिपिशास्त्रस्य अध्ययनाध्यापनं सिद्धता चान्यत् विज्ञानवत् सत्याधारितं तथ्याधारितं तार्किकं सुव्यवस्थितं क्रमबद्धप्रामाणिकप्रणाल्याः प्रवृत्तमानमस्ति। तथा च पाण्डुलिपिशास्त्रस्य सर्वप्राच्यविद्याशास्त्रैः सह अन्यसहायकविज्ञानेभ्यः, आधुनिकविषयेभ्यः; शोधप्रक्रियाविज्ञानं, लिपिविज्ञानं, भाषाविज्ञानं, पुरातत्त्वविज्ञानं, पुस्तकालयविज्ञानमित्यादिविज्ञानसम्बन्धविषयैः सह अन्तः अनुशासनात्मकं सम्बन्धोऽपि विद्यते। वस्तुतः "लिपिविज्ञानं (Palaeography), शिलालेखविज्ञानं (Epigraphy), पुरातत्त्वविज्ञानं (Archeology), इतिहासः संस्कृतिश्च (History & Culture), ज्यौतिषशास्त्रम् (Astrology),

---

point. It is characterized by a careful analysis in an objective manner without dismantling the nativity of the work. The critical edition is scholarly known as textual criticism.)

[५]डॉ० सत्यनारायण आचार्यः, संस्कृतशोधप्रविधिः, पृ० ११, राष्ट्रियसंस्कृतसंस्थान, पुरी

[६]जयन्तभट्टः, न्यायमञ्जरी, कारिका- ८

साहित्यशास्त्रम् (Rhetoric or Poetics), पुस्तकालयविज्ञानम् (Library Science), शासकीयलेखविज्ञानम् (Diplomatics) इत्यादयः विषयाः पाण्डुलिपिविज्ञानस्य सहायकशास्त्राणि सन्ति''[७]।

पाण्डुलिपिसम्पादने पुष्पिकायाः स्थानमतीव महत्त्वपूर्णं विद्यते। पुष्पिका द्विविधः– १. पूर्वपुष्पिका पाण्डुग्रन्थस्यारम्भे लभ्यते २. उत्तरपुष्पिका पाण्डुलिपेः अन्ते उपसंहारे वा प्राप्यते। पुष्पिकायां मङ्गलप्रतीकानि; पूर्णकुम्भ-स्वस्ति-ओंकार-स्वस्तिक-कलश-स्वाभीघङ्कष्टदेवीदेवतानां स्मरणमित्यादीनि नमस्कारादीनि; नमो नारायणाय, श्रीगुरूवे नमः, नमो सर्वसिद्धानाम् आशीर्वचनं मङ्गलकामाना, प्रशस्तिवाचनं, दातृस्तुतिः, खलस्य-निन्दा, रचनाकारस्य, लेखकस्य, उत्कीर्णकर्तुः च नामानि, रचनाकालः, लेखनकालः, प्रतिलिपिकालः, राजाज्ञा[८], पाण्डुलिपिलेखनस्य निमित्तं; पुत्राजन्मोत्सवादीनि शुभाशुभविवेचन-समर्पणमित्यादिविषयाणां ज्ञानं भवति। 'अङ्कानां वामतो गतिः' इति सिद्धान्तमधकृत्य रचनाकालस्य, लेखनकालस्य, प्रतिलिपिकालस्य च उद्बोधनाय अङ्कलेखनाय कूटसंकेतस्य विशिष प्रणाली पाण्डुग्रन्थेषु दृश्यन्ते।

पाण्डुलिपिनामाधुनिकप्रविधिमाध्यमेन निर्मितं सुविस्तृतं व्यवस्थितं सूचीनिबन्धनं 'विवरणात्मकं सूचीपत्रम्'[९] उच्यते। पाण्डुलिपीनां वर्णनात्मकं सूचीपत्रानिर्माणाय अत्यन्तसमुन्नता वैज्ञानिकीप्रक्रिया परिपाल्यते। तस्यां प्रक्रियायां पाण्डुग्रन्थस्य शीर्षकं; नाम तस्य प्राप्तिस्थलं, आकारगतविवरणम्, लिप्यासनस्य प्रकारः (Material) पृष्ठानां संख्या; पाण्डुलिपेः कालः, लिपीनां

---

[७]डॉ० अभिराजराजेन्द्रमिश्रः, शोधप्रविधिः एवं पाण्डुलिपिविज्ञान, अक्षयवटप्रकाशनम्, इलाहाबाद्, सं २००८

[८]संवत् ७४७ वैशाख शुक्ल तृतीय तिथौ। श्री श्री जय जगज्योतिर्म्मल्ल-देव-भूपानामाज्ञया दैवज्ञ-नारायण-सिंहेन लिखितमिदं पुस्तकं सम्पूर्णमिति शिवम्, विद्यापतिविरचितकीर्तिलतायां, वासुदेवशरण अग्रवाल, पृ0 सं0 4, द्वितीयक स्रोत-पाण्डुलिपिविज्ञान डॉ0 सत्येन्द्र पृ. सं0 52, राज0 हि0 ग्रन्थ अकादमी, जयपुर

[९]K.C. Dash, Elements of Research methdology in Sanskrit, Page No. 57, chokambha Sanskrit Sansthan, Varanashi (A Descriptive catalogue of Manuscripts is a systematic Sketch of scribe presenting the Counters of manuscripts. In other words, It is a critical record of methodical tabulation of salient points of manuscripts)

विवरणम्, भाषायाः विवरणम्, व्याख्यात्मकटिप्पण्यः, आरम्भिकः पाठः, उपसंहारे पाठः इत्यादीनि विवरणानि विलिख्यन्ते।

जैनग्रन्थेषु[१०] पाण्डुग्रन्थानां आकृत्याधारिते वर्गीकरणे पञ्चविधभेदाः प्रतिपादिताः। ते सन्ति– १. गण्डी; आयताकारताडपत्राधिङ्कतपाण्डुलिपयश्च, २. कच्छपी; मधयभागे विस्तृता प्रान्तभागे संकीर्णा कच्छपाकृतिवान्, वर्तुलाकारीपाण्डुलिपयः 3. मुष्टी; मुष्टीग्राह्याः पाण्डुलिपयः लोकभाषयां 'गुटका' इतिपदेनोच्यते, ४. सम्पुटपफलकीया; पत्राकारैः काष्ठफलकैः आद्यन्तसुरक्षिताः प्रायः पुराणां पाण्डुलिपयः, ५. छेदपाठी; अत्यल्पा स्थूला च। लेखनशैलीमाधरीकृत्य पाण्डुग्रन्थानां १. त्रिपाटपाण्डुलिपयः; त्रिपाठवान् वा, पृष्टेषु प्रत्येकं त्रिषु भागेषु विभज्यते। मध्ये मूलपाठः, उर्द्धमधोभागे च टीका विलिख्यते, २. पञ्चपाठपाण्डुलिपयः; पञ्चपाठवान् वा पृष्ठेषु प्रत्येकंपञ्चभागेषु विभज्यते। मध्ये श्लोकः, उर्ध्वमधोभागे च टीका तथा च वामे तस्य विपरीतभागे टिप्पण्यः विलिख्यन्ते ३. शुण्डाकाराः पाण्डुलिपयः; शुण्डादण्डस्य आकृतौ पघ्क्तीनां क्षीयमाणक्रमे लेखनम्, ४. सचित्रपुस्तकम्; चित्रासहितं लेखनम् ५. स्वर्णाक्षरीपाण्डुलिपयः; ६. रजताक्षरीपाण्डुलिपयः ७. सुक्ष्माक्षरीपाण्डुलिपयः ८. स्थूलाक्षरी पाण्डुलिपयःइत्यष्टौ भेदाः सन्ति।

पाण्डुलिपिषु पाठभेदस्य कारणानि सन्ति। १. पदविग्रहजनिता भ्रान्तिः २. अस्पष्टता ३. शास्त्रानुकूलपारिभाषिकशब्दकोशस्याज्ञानम् ४. प्रक्षेपाः ५. सरलीकरणम् ६. क्षेत्रजपाठः, देशजपाठश्च ७. प्रमादादयः। पाठसमालोचने एतेषां बिन्दूनां प्रति सतर्कता विधेयाः। पाठसमालोचनाय या मातृका प्राचीनतमा, शद्धा, सुस्पष्टा च सा आधारमातृकारूपेण स्वीकर्त्तव्या। तदनन्तरम् आधारमातृकायाः अन्यासां पाण्डुलिपीनाञ्च साङ्केतिकं नामकरणमपि करणीयम्। यथा आधारमातृकायाः 'क' इति नामकरणान्तरमाधारमातृकायाः पाठः उपरि भागे विलिख्यते। एतदनन्तरमन्यासां मातृकाणां पाठः; 'ख', 'ग', 'घ' इत्यादिषु मातृकासु ये पाठभेदा वर्तन्ते ते पाठाः अधोभागे पादटिप्पण्यां विलिख्यन्ते। कस्यचित् पाठस्य बह्व्यः पाण्डुलिपयः सन्ति चेत् तासां समूहकरणं

[१०] गंडी कच्छवि मुट्ठी संपुडफलए छिवाडीय।
एयं प्रत्ययपणयं वक्खाण मिणं भवेतस्य॥ दशवैकालिकोपरि हरिभद्री टीका।

कृत्वा वंशवृक्षस्य निर्माणमपि विधेयम्।

अन्याषां पाण्डुलिपीनां पाठभेदलेखनस्य पाठसमालोचनस्य वा विस्तृता प्रक्रिया तु 'भण्डाकर-प्राच्य-विद्या-संस्थानम्, पूना' इति संस्थानेन प्रकाशितस्य 'महाभारतमिति' ग्रन्थस्य, 'महाराजा-शिवाजीराव-विश्वविद्यालय-बडौदातः' प्रकाशितस्य वाल्मिकीरामायणस्य च समालोचनात्मकसंस्करणे विशेषतः भूमिकायां (Prolegomena) द्रष्टव्या। सम्पादनात् पूर्वं मार्गदर्शनाय सुसम्पादितानां ग्रन्थानां यथा रेवाप्रसादद्विवेदिमहाभागेन सम्पादितस्य 'कालीदासग्रन्थावली' इत्यस्य ग्रन्थस्य, कमलेशदत्तत्रिपाठीवर्येण सम्पादितस्य 'नाट्यशास्त्रस्य' प्रथमखण्डस्य चावलोकनं करणीयं भवेत्। अन्येषामपि विदुषां बहवः सुसम्पादिताः ग्रन्थाः सन्ति येषामवलोकनेन सम्पादनात्मकशोधप्रविधेः ज्ञानं भविष्यति। यथा संक्षेपेण हिन्दीभाषायां सम्पादनात्मकशोधप्रविधेः जिज्ञासुभ्यः पाठसमालोचनस्यसिद्धान्तानां परिज्ञानाय च अभिराजराजेन्द्रमिश्रस्य 'शोधप्रविधि एवं पाण्डुलिपिविज्ञान' इति ग्रन्थेऽपि द्रष्टुं शक्नुमः। संस्कृतभाषायां सम्पादनात्मकशोधप्रविधेः जिज्ञासुभ्यःराष्ट्रियसंस्कृतविद्यापीठ-तिरुपतितः प्रकाशितं 'भारतीय-ग्रन्थसम्पादनशास्त्रप्रवेशिनी'[११] इति पुस्तके सम्पादनञ्च यथाप्रतिपादितं तथा पाठसमालोचनप्रविध्यनुसारं वंशवृक्षस्य निर्माणं कृत्वा विधेयम्। सम्पादनप्रविधिज्ञानाय राष्ट्रिय-संस्कृत-संस्थानेन, नई दिल्लीतः प्रकाशितं 'अनुसन्धानस्य प्रविधिप्रक्रिया' इति ग्रन्थरत्नमप्यवलोकनीयम्। साहित्यशास्त्रस्य काव्यस्य वा पाण्डुलिपीनां सम्पादनं विवरणस्य तुलनात्मकरीत्या (by collation Sheet) इति प्रविधयाः करणीयम्। सम्पादनोपरान्तं पाठसमीक्षाकरणाय पाठभेदस्थलेषु पाठभेदसमीक्षात्मकः यथोचितः निष्कर्षः अपि प्रदेयः। अस्मिन् विषये "कालिदास साहित्य में पाठभेदः समीक्षा और निष्कर्ष"[१२] इति पुस्तकं मार्गदर्शनाय द्रष्टुं शक्यते।

प्रायः पाण्डुग्रन्थेषु शोधेच्छुकानां शोधार्थिनाम् अनेकाः जिज्ञासा जायन्ते। तासु प्रमुखाः सन्ति– पाण्डुलिपिसम्पादनप्रविधिज्ञानाय उत्तमाः

---

[११](Sanskrit translation of an Introduction of Indian Textual criticism of Prof. S.M. katre)

[१२]सदाशिवकुमार द्विवेदी, "कालिदाससाहित्य में पाठभेदः समीक्षा और निष्कर्ष" किशोरविद्यानिकेतनवाराणसीतः प्रकाशितं, २०११

ग्रन्थाः के सन्ति? पाण्डुलिपिसम्पादनस्य प्रशिक्षणं कुतः प्राप्तुं शक्नुमः? पाण्डुलिपिसम्पादनाय सोपानिकः क्रमः कः? पाण्डुग्रन्थानां संरक्षणं कथं कर्तुं शक्नुमः? पाण्डुग्रन्थस्यान्वेक्षणं कथं भवेत्? पाण्डुलिपिसम्पादनाय सामग्रीसंकलनम् कथं भवेत्? सम्पादनकर्मणि उपयुक्तानां सामग्रीणां नामानि कानि? पाण्डुलिपिसम्पादनं मौलिकं शोधकार्यंन वा? पाठशोधनस्य सामान्यसिद्धान्ताः के सन्ति? पाण्डुलिपिनां वंशवृक्षनिर्माणं कथं भवेत्? अप्रकाशितपाण्डुग्रन्थानां ज्ञानं कथं कुतः वा भवेत्?; पाण्डुलिपिरियं प्रकाशिता अप्रकाशिता वा? अप्रकाशितपाण्डुग्रन्थेषु शोधकार्याय उपर्युक्तस्य पाण्डुग्रन्थस्य ज्ञानं लब्धं, परञ्च तस्य छायाप्रति कथं प्राप्नुमः? तथा च पाण्डुलिपिसम्पादनस्य प्रशिक्षणमावश्यकलिपिनाञ्च ज्ञानं कथं प्राप्नुयाम?

प्रकाशिताप्राकशितपाण्डुग्रन्थानां ज्ञानं तत्तत् संस्थानस्य पाण्डुग्रन्थानां विवरणात्मकं सूचीपत्रास्यावलोकनेन भवेत्। नवदेहलीस्थितस्य 'इन्दिरा-गॉधी-राष्ट्रिय-कला-केन्द्रस्य' Digital Copies of these manuscripts can be seen at the IGNCA'S, New Delhi and details of-catalogue of Manuscripts can be accessed by searching the manuscript 'Catalogue of Catalogues' (CATCAT) अन्येषां संस्थानाञ्चविवरणात्मकं सूचीपत्राणां ज्ञानमन्तर्जालस्याऽन्वेषेणेन[१३] इत्यस्य ईसंकेतोपरि पाण्डुग्रन्थानामन्वेषणं कर्तुं शक्नुमः। सम्पादनाय चित्रस्य पाण्डुग्रन्थस्य छायाप्रति-प्राप्त्यर्थं व्यक्तिगतसम्पर्कस्य विश्वविद्यालयस्य, शोधसंस्थानस्य, मार्गनिर्देशकस्य च महत्त्वपूर्णं योगदानं भवति। व्यक्तिगतपाण्डुग्रन्थानां छायाप्रति स्वसम्पर्काधीनाः, पाण्डुलिपिसंस्थानेभ्यः छायाप्रति-प्राप्त्यर्थं मार्गनिर्देशकस्य विश्वविद्यालयस्य शोधसंस्थानेन अग्रसारितमावेदनपत्रां प्रार्थनापत्रां वा यथोचितमाध्यमेन तत्रा प्रेषणीयम्। निर्धारितशुल्कस्य प्रदानेन पाण्डुग्रन्थस्य छायाप्रति तत्तत्संस्थानस्य नियमानुसारेण प्रदीयते।

पाण्डुलिपिसम्पादनस्य प्रशिक्षणवर्गाः पाण्डुलिपिकार्यशालाः वा विभिन्नेषु

---

[१३]द्रष्टव्य ईसंकेत वेबसाइट्- & aahttp://ignca.nic.in/mss_org1.html, by visiting the website of concerned institution or by Search Engines like Gogle etc. द्रष्टुं शक्यन्ते। 'राष्ट्रियकृतिसम्पदा' इति विवरणात्मकसूचीपत्रोण राष्ट्रिय-पाण्डुलिपि-मिशन्[१४]

विश्वविद्यालयेषु, शोधसंस्थानेषु राष्ट्रिय-पाण्डुलिपि-मिशन्, नयीदिल्लीतः तत्तत्संस्थानस्य च संयुक्ततत्त्वावधनेन वर्षपर्यन्तं समायोज्यन्ते। एदर्थं सूचना तत् तत् संस्थानस्य नयीदिल्लीस्थितस्य राष्ट्रिय-पाण्डुलिपि-मिशन' इत्यस्यान्तर्जाले[१५] संस्थाप्यन्ते। भागगृहीतां प्रतिभागीनां अधययनाधयापन-भोजनावासयात्राव्ययस्य च व्यवस्था तेभ्यः प्रदीयन्ते। विशिष्टाचार्य-विद्यावारिधिशोधार्थिनां कृते षड्मासीयपाठ्यक्रमे शोधप्रविधिना सह पाण्डुलिपिसम्पादनमपि शिक्ष्यते। सारांशरूपेण सम्पादनात्मकशोधकार्यसम्पादनाय सोपानिकः क्रम अत्र प्रदश्यन्ते–

१. पाण्डुलिपि-लिपिशास्त्रास्य कार्याशालायां प्रशिक्षणं प्राप्नुयात्।

२. पाण्डुलिपिनां विवरणात्मकं विस्तृतं सूचीपत्रामवलोक्यताम्। अप्रकाशितं, सुस्पष्टं, सुसाधयं कार्यं सम्पादनाय चेयम्।

३. न्यूनातिन्यूनं तिस्त्रः मातृकाः सम्पादनाय चेयम्।

४. तत्तत्संस्थानेभ्यः यथोचितप्रक्रियया: पाण्डुलिपेः छायाप्रतिलिपयः प्राप्यताम्।

५. योग्यमार्गनिर्देशकस्य निर्देशेन कार्यं सम्पाद्यताम्।

पाण्डुलिपिसम्पादनं नाम रचनाकारेण कृतस्य मूलस्य साधुपाठस्य चान्वेषणम्। साधुशब्दज्ञानाय सम्पादकैः १. बहुसंख्यकपाठस्य नियमः २. सुसङ्गतपाठस्य नियमश्च इत्यनयोः द्वयोः नियमयोः परिपालनं क्रियते।

१. बहुसंख्यकपाठस्य नियमे विविधासु मातृकासु यः पाठः प्राप्यते सः पाठः साधुपाठः मन्यते। अन्यत् पाठान्तरं पादटीप्पण्यां विलिख्यते।

२. सुसङ्गतपाठस्य नियमे पाठस्य; शब्दस्य, वर्णस्य वा सम्यक् अर्थसङ्गतिं विचिन्त्य साधुपाठस्य निर्णयः क्रियते। सुगङ्गतः पाठः मूले विलिख्यते। पाठान्तरं पाठटीप्पण्यां विलिख्यते।

सङ्गतिविचारे विचार्यते यत् पाठोऽयं रचनाकारस्य व्यक्तित्वेन सुसङ्गतमस्ति न वा? पाठस्यात्रार्थसङ्गतिरस्ति न वा? पाठोऽयं विषयानुकूलं सन्दर्भे व्याकरणसङ्गतमस्ति न वा? इत्यादिप्रश्नानां समाधानं विचार्य साधुपाठस्य निर्णयः क्रियते। सङ्गतिविषये विस्तृतं वर्णनं न्याय-मीमांसा-वेदान्तदर्शनेषु च प्राप्यते। भाट्टसारे सङ्गतेः लक्षणमेवमस्ति– "अभिधानप्रयोजक-सम्बन्धः सङ्गतिः। तत्र

---

[१५] द्रष्टव्यं ईसंकेत वेबसाइट & www.namami.org

अभिधानस्य तात्पर्यमनन्तराभिधानमिति अस्ति। सङ्गतेः षट् भेदाः कृताः–

१. शास्त्रसङ्गतिः २. षड्कसङ्गतिः ३. अध्यायसङ्गतिः ४. पादसङ्गतिः ५. पेटिकासङ्गतिः ६. अधिकरण सङ्गतिश्च।

जैमिनीयन्यायमालाविस्तरे सङ्गतेः त्रयः भेदाः कृताः सन्ति– १. शास्त्रसङ्गतिः २. अध्यायसङ्गतिः ३. पादसङ्गतिश्च। तत्रौव अवान्तरसङ्गिरपि चतुर्थी सङ्गिरुक्तता अस्ति। अवान्तरसङ्गत्यामेव भाट्टसारोक्तपेटिका सङ्गतेः अधिकिरणसङ्गतेश्च अन्तर्भावः भवति। शास्त्रासङ्गत्यामेव षड्कसङ्गेरन्तर्भावः भवति।[१६] न्यायशास्त्रोऽपि[१७] सङ्गेः १. प्रसङ्गसङ्गतिः २. उपोद्घातसङ्गतिः ३. अवसरसङ्गतिः ४. हेतुतासङ्गतिः ५. निर्वाहकत्वसङ्गतिः ६. एककार्यतासङ्गतिः इति षड्विधभेदाः उक्ताः। अतः पाण्डुलिपिसम्पादने तत्तच्छास्त्रस्य सङ्गतिरपि द्रष्टव्या। प्रायः प्राचीनासु पाण्डुलिपिषु लब्धः क्लिष्टपाठः नवीनसरलपाठस्यापेक्षया शुद्धतमः भवति यतो हि उत्तरवर्ती मातृकासु सरलपाठस्य विस्तारः मानवस्य सरलीकरणप्रवृत्त्याः जायते।

'असङ्गतं मा प्रयुञ्जितः' इति नियमं परिपालयन् पाण्डुग्रन्थसम्पादने शब्दार्थस्य पदपदार्थस्य वा शास्त्रासङ्गतेः सामञ्जस्यं द्रष्टव्यम्। यथोक्तं भाट्टसारे शास्त्रासङ्गतेः लक्षणम्– "शास्त्राप्रतिपाद्यत्वतात्पर्यविषयार्थनिर्णयजनकत्वरूपः शास्त्रासम्बन्धः शास्त्रासङ्गतिः।"[१८] तत्रापि अध्यायसङ्गतिः द्रष्टव्या। अध्याये पादसङ्गतिः द्रष्टव्या। पादे वाक्यसङ्गतिः द्रष्टव्या। वाक्ये पदसङ्गतिः ज्ञातव्या। पदे वर्णसङ्गतिः धयातव्या। वस्तुतः एतेषां सर्वेषामपि सङ्गतिमूलकसम्पादनकर्माणां मूलं व्याकरणमेव। पाणिनीयव्याकरणस्य ज्ञानं विना कस्मिन्नपि शास्त्रे साधुपाठस्य ज्ञानं नैव सम्भवति। पाण्डुग्रन्थानां सम्पादनाय व्याकरणशास्त्रस्य महद्वदानमस्ति। अतः सिद्धं भवति यत् पाण्डुग्रन्थानां सम्पादनाय सम्पादनात्मकशोधप्रविधिः व्याकरणशास्त्रञ्च पठनीयमित्यलं विस्तरेण।

-★

[१६] 'मीमांसादर्शनविमर्शः' ड० माध्व जनार्दन रटाटे, भारतीयविद्याप्रकाशनम्, वाराणसीतः, सं० २००८, पृ० ४५

[१७] मथुरानाथतर्कवागीशः, 'व्याप्तिपञ्चकं' गदाटीकायाम्।

[१८] तत्रैव 'भाट्टसारः', पृ० १२

# त्रिपुराराज्यस्य राजशासनकाले शिलालेखेषु संस्कृतभाषायाः व्यवहारः


## शिप्रा-रायः*


त्रिपुरा भारतस्य उत्तरपूर्वाञ्चलस्य राज्यमस्ति। कदाचित् अत्र राजानः शासनं कुर्वन्ति स्म। तदानीन्तनकाले राजानः संस्कृतभाषा साहित्यस्य पोषिका आसन्। शिलालेखेषु, ताम्रलेखेषु, पत्रादिषु संस्कृतभाषायाः समुल्लेखो दृश्यन्ते। राजानः मुद्रायां संस्कृतभाषायाः उल्लेखो दृश्यते। तद् यथा– किलविदुवीरतां सारमेकम्। तदानीन्तनकाले विविधानां सामाजिकाचारनुष्ठानमुपलक्ष्य संस्कृतभाषायां पत्राणि लिखितानि। असमराज्यस्य राजा रुद्रसिंहस्वर्गदेवेन सह त्रिपुराराज्यस्य द्वितीयरत्नमाणिक्यस्य राजकाले बहूनां पत्राणां विनमयः अभवत्। तस्य भाषाऽपि संस्कृतमामीत्। त्रिपुराराज्यस्य राजशासनकाले बहवः संस्कृतपण्डिताः आसन्। एतत् विहाय त्रिपुराराज्यस्य शिलालेखेषु संस्कृतभाषायाः प्रयोगः दृश्यते। उदाहरणरूपेण उल्लेखः क्रियते।

चतुर्दशदेवतानां सिंहासने श्लोकद्वयं दृश्यते। महाराजा गोविन्दमाणिक्यः सिंहासनमिदं हिमगिरितनयायाः कृते दत्तवान्। तद्यथा–

श्रीकल्याणमहीमहेन्द्रतनयो वैर्य्युग्रदावानलः
श्रील श्रीयुवराजराजविजयी गोविन्ददेवः कृती।
दीप्याद्दीर्घ शटाप्तकेशरिलसत्सिंहासनं शोभनं
भक्त्या स्वर्णमयीतिसंज्ञगिरिजासत्पादपद्मेऽर्पयत्॥
अत्युद्दाम प्रतापप्रथित पुरुयशो व्याप्तलोकत्रयान्तः
श्रीश्रीकल्याणदेवत्रिपुरनरपते वात्मश्चण्डतेजाः।
शाकेऽङ्ग्रावबाणावनिमति समदादैर्ज्जशुक्लेनवम्यां
श्री श्रीगोविन्ददेवो हिमगिरितनयायै हि सिंहासनाग्र्यम्॥[१]

पुनः राधामाधवमन्दिरे शिलालेखः दृश्यते। यथा-

स्वस्ति आसीत् भूपैकभूपः क्षयितरिपुकुलः कल्याणदेवः क्षितौ,
तत् पुत्रः कीर्तिवल्लीप्रथित सुरपुरोगोविन्ददेवो नृपः।

---


*सहाचार्या, संस्कृतविभागे, त्रिपुराविश्वविद्यालयस्य


[१]शिलालिपि संग्रह, पृ. २८

तन्मृनुधर्मशीलः प्रवलनृपवरो रामदेवः प्रतापी
तज्जः श्रीकृष्णसेवा नवरत कृतधीदेवोमुकुन्दनृपः॥
तन्मृनुर्विप्रगोप्ताहारिकुलविजयैर्विश्वविभ्रन्तकीर्तिः
श्रीयुक्तः कृष्णदेवः क्षितिपतिरति तत्पत्नी महेषी शुभा।
नाम्ना श्रीजाह्नवी सा पतिचरणरता विष्णवे कृष्णप्रीत्या,
प्रादाद्रम्येष्टकाभिविरचितममलं मन्दिरं पञ्चरत्नम्॥
कालिकागञ्चके याम्ये दीर्घिकाद्वयमध्यतः
